SRI TYAGA-RAJA-CHARITA

BY

T. S. SUNDARESA SARMA

With a Foreword by

Diwan Bahadur

K. S RAMASWAMI SASTRIGAL Avl.

PUBLISHED BY

THE GENERAL STORES

Ayyan-Kadai Street, TANJORE

ghts Reserved] 1937 [Price Re

Printed at the
SRI VIDYA POWER PRESS,
KUMBAKONAM.

INTRODUCTION.

It is the duty of every man on this Earth to endeavour to seek Liberation. Books on Vedanta, not only expound the real form of the Liberation to be attained by us, but also demonstrate the Path to be pursued for the purpose. The Great Seers of this Punya-bhumi of ours, have revealed the sublime truths of the Sanatana-dharma in their great works, the Itihasas, Puranas and other sacred lore, with a view to regenerate the dull-witted, who cannot comprehend the system of Vedanta, and to enthuse towards further effort those who have partially understood the same. Those works elaborately dwell on the lines of righteous conduct which man should pursue in his seeking after Liberation, the fruits of compliance with the prescribed rules and the risks involved in breaches thereof. The chief aim of the writers of those works is, that their readers should follow the good example set by the characters delineated therein. Their major characters, *viz.*, the heros and heroines, are either Isvara Himself or those that partake of some of the essential features of Isvara, while the minor characters have their distinct purpose to serve in the unfolding of the plot. Readers of these great works would find, that they can at best hold aloft these heros and heroines as ideals to be followed, and not by any means try to imitate their example to the very letter or even make a near approach to them in certain respects. For instance, the incident of Lord Krishna, who is represented in the Srimad Bhagavata as having raised aloft Mount Govardhana on his little finger, to serve as shelter for his devotees during a storm, not only evokes the mute admiration of his

devotees for all time, but also serves to enhance the Bliss derived by them from their true devotion to the Lord. Similarly the ordeals of King Haris-chandra, leading to the miserable plight of his keeping watch over corpses mounted on funeral piles and the constancy of Emperor Sibi, who did not wince, when he cut off slice after slice of his flesh to equipoise the dove in the other pan of the scale, fill the reader with a profound sentiment of marvel and awe and cannot be literally copied by him in his daily conduct. Hence the study of these great works serves only to show the degree of disparity between things divine and human.

We also meet with another class of literature inspired by the same lofty motives, wherein the purely devotional element preponderates and we are introduced to characters more human and less divine, causing us to breathe more freely and find ourselves thoroughly at home. These relate to the life-stories of great devotees, who lived the lives of mortals, were subject to the same infirmities and temptations, but grew to a higher stature by leading a life of true devotion to the Supreme Being, hungering and thirsting after a nobler life in this world and the world hereafter, devoid of all attachment, and enjoyed the serene Bliss divine, while remaining in this world. These great men verily serve as beacon-lights, showing us the right path and dispelling the darkness, internal as well as external, that hampers us in our onward march. Most of these stories are apparently based on tradition and should not be deprecated on that account, so long as they serve the purpose for which they were intended by their authors. My humble conviction is, that the point of satiety can never be [illegible]d by the publication of any number of such works.

No apology will, therefore, be needed for this venture of mine, in adding one more to the list of such works. In my search for a suitable theme, I felt, I was magnetically drawn to the life of Sri Tyaga-raja, who was born and bred in the Chola country of ours and after fulfilling his divine mission of expounding the greatness of Music and of reaching godhead, through devotion to the Nada-brahman—which is after all an aspect of the Para-brahman—attained his Samadhi after renunciation, in the holy Panchanada-kshetra on the banks of the sacred Kaveri. Most of his soul-stirring strains are in glorification of the Hero of Valmiki's immortal epic, Sri Rama, whose name Sri Tyaga-raja has treated as the Taraka-mantra, wherewith to cross the ocean of worldly existence. The tradition of his being looked upon as a modern incarnation of that super-human bard, Sri Valmiki, has surely sprung out of the rhapsodies of his Kritis. We are fortunately circumstanced in having in our midst some disciples of the disciples of the great one and several of the incidents narrated in the story have been culled from those sources. Thanks to the endeavours of lovers of Music, hundreds of Sri Tyaga-raja's immortal Kritis have been reclaimed for posterity and are reminding us every day of their great author, whose life story I have ventured to present in Samskrit verse, to his countrymen and to the world at large. I have attempted therein to portray, to the best of my lights, the lessons that we learn from the life of Sri Tyaga-raja, regarding the ideal that one should set before himself for living the life of a true devotee, the excellence of Bhakti-yoga, the true marks of a Bhakta and other striking features of a saintly life.



FOREWORD.

It is always an honour and a privilege to be associated with a man of courage and I cannot conceive of a more courageous man than one who loves Samskrit and can think in Samskrit and dares to add to Samskrit literature. It is a measure of boldness to love Samskrit; it is audacity to think in it; and it is foolhardiness to write in it. I have myself been foolhardy that way and I know that Samskrit authors are exposed to cross fires. One set of sharpshooters asks if we have nothing better to do, and another asks how we dare write at all, after having Valmiki and Vyasa and Sankara and Kali-dasa and Bana. But faint heart never won fair lady, nor the fairer lady—the Muse of Poesy.

Mr Sundaresa Sarma belongs to that rare thin group that has the poetic heart and is more avid about the afflatus than about the laurel. This work is his first appearance before the public and must be judged with fairness—nay, even with leniency. But even if he is judged critically and even harshly, he will come out well. He belongs to the modest group which says that gold is tested by fire, and not to the self-conscious group which says that the Goddess of Speech is at its service.

He has a lofty and lovely theme and that itself *is rare good luck. He loves his theme and that is* better luck. He has a facile pen and his numbers flow with ease and grace and that is best luck of all. I am quite aware that in a great poem there must be a multiplicity of metres and a rich repast of *rasa-s* and that the grander phenomena of sky and the sea and earth should be described and that the author of this work is limited

by his theme and his talents in all these respects. But within his limited range, he has shown good work and I feel sure that the student of Samskrit, fed on very rich fare and somewhat fed up with the sameness of it all, will be tempted to taste a new morsel which is rare in this age.

Though the hero of the poem is Tyaga-raja *alias* Tyagayyar, as he is called in an abbreviated and affectionate manner, the work is a paean of praise of the hero's hero—Sri Rama himself. A famous Samskrit verse says that the Ramayana poured down from the Valmiki-hill and made the entire world holy and entered the ocean of Sri Rama The author refers to the beautiful tradition that Valmiki was born as Tyagayyar. It is not much a miracle for a river to flow down from a hill into a sea. But it is a miracle for a mighty river to spring from the deltaic lowlands and go up the whole of India and surge up the Himalayas and go right up to Paradise. Another famous verse says that when God, who is knowable by the Veda alone, put on the lovely human form as Sri Rama, the Veda also took form as the charming Ramayana In the same way, when Valmiki became Tyaga-raja, the Veda became yet more charming and melodious poesy became pure melody, flowing above us and about us and around us, "in notes, with many a winding bout of linked sweetness long drawn out".

The author refers to the illustrious band of devotees of Sri Rama:—

भाद्राचलो रामदासस्तुकारामः पुरंदरः ।
रामभद्रमखी चैव ये चान्ये रामपूजकाः ॥
शरभङ्गोऽथ वाल्मीकिः सुतीक्ष्णो गाधिनन्दनः ।
भरद्वाजस्तथाऽन्ये च वसन्त्यत्र महर्षयः ॥ (I, 36 and 42.)

He then bursts a charming anthem about Sri Rama himself :—

तत्रैव भगवान्रामो जानकीसहितः प्रभुः ।
मन्दहासशुभास्येन दृष्ट्वा कारुण्यपूर्णया ॥

सर्वान्समुत्सुकान्कुर्वन्नास्ते सर्वहिते रतः ।
किरीटमर्कसंकाशं धरन्स शिरसा विभुः ॥

पाण्डुरै रत्ननिचयैर्नीलमारकतैरपि ।
कल्पितैर्वरैः कुण्डलैश्च भूषितश्रोत्रयुग्मकः ॥

कटकानि च हैमानि कुण्डलान्यङ्गदानि च ।
वपुषा धारयन्रामः शोभयन्सकलं गृहम् ॥

पीताम्बरमधो धृत्वा हेमतन्तुविनिर्मितम् ।
उत्तरीयं दधानश्च तथा मारकतच्छवि ॥

कौस्तुभं सूर्यसंकाशं वैजयन्तीं च सुप्रभाम् ।
उरसा धारयन्सर्वाः स्वभासाऽभासयद्दिशः ॥

जानकी मुदिता पार्श्वे तप्तकाञ्चनसंनिभा ।
सर्वाभरणसंपूर्णा शुशुभे नियता सदा ॥ (I, 53 to 58).

The words of Sri Rama are even more charming :—

बहिश्चरा मे प्राणास्ते नोत्सृजेयं क्षणं च तान् ।
तेषां तोषाच्च तुष्यामि विषीदामि विषादतः ॥

सर्वबन्धविमुक्तोऽपि स्वाधीनहृदयोऽप्यहम् ।
भक्तबन्धान्मोचयितुं न शक्नोमि च मां पुनः ॥ (I, 15, 77)

Then follows a fine description of the present Kali *ge from Narada's mouth* :—

वदन्तो विविधान्वादान्वञ्चयन्तः परस्परम् ।
अलसा इन्द्रियारामाः पापमेवाचरन्ति च ॥ (II, 39)

Then comes a command from Sri Rama to Valmik to be born as Tyaga-raja and to flood the world with the nectar of song. Valmiki then goes to Ganga and Godavari and eventually to Cauveri and prays to her that he might be born and bred up as her child :—

भवदङ्के जनिं लब्ध्वा भवदङ्कविवर्धितः ।
भवत्तीरे वसन्पुण्ये मर्तुकामोऽहमम्बिके ॥ (IV, 36)

Such is the gold robe of poesy thrown by the poet about the humdrum frame of fact. But the inner blossoming of Thyaga-raja's genius is more wonderful and attractive than any magic flower of poesy. Tyagayyar had none of the petty ambitions or achievements of the wordly souls. He was poor in his earthly possessions, but was rich in the love of his noble wife Kamalambal and rich beyond description in the love of the chosen deity of his heart. I have stood in the humble house where he lived and worshipped Sri Rama with the fading flowers of daily adoration and the fadeless flows of daily song. The poet "hidden in the light of thought," sang "hymns unbidden, till the world was wrought to sympathy with hopes and fears it heeded not". The author describes the singer-saint's life thus :—

उपास्य संध्यां सायाह्ने दृष्ट्वा पञ्चनदेश्वरम् ।
अलंकृतस्य रामस्य संनिधौ गायति स्म सः ॥
संगीतशास्त्रनैपुण्यं शारीरसुखसंपदम् ।
श्रुत्वा तु विस्मिताः सर्वे संयशस्तत्र संययुः ॥ (V, 51, 52.

I have seen the very painting and the very image of Sri Rama which claimed and got the offering of the loveliest flowers of the loveliest art of the world. Happy was Tyaga-raja to have devotion to such a deity

and happy are we to have devotion to such a devotee of such a deity !

As the author charmingly describes :—

लावण्यस्य परीवाहं सद्यो जातं ददर्श सः
आश्चर्यवदपश्यच्च विस्मयस्तिमितेक्षणः ।
अदृष्टपूर्वां तां शोभां पश्याम्यद्य कथं न्वहम् ॥
अहो रूपस्य माधुर्यं सभ्रातू राघवस्य मे ।
दृष्टिं च हृदयं चाद्य विवशीकृत्य कर्षति ॥ (IV, 10 to 12.)

I do not think that it is fair for the writer of a Foreword to run a race with the author in dealing with the hero of the work or to run a race with the reader in reading and revealing the heart of the poet. I therefore leave the reader face to face with the author and his work and wish good luck and God-speed to both.

Kumbakonam,
1st October, 1937. } K. S. RAMASWAMI SASTRI.

शास्त्रतिलक-शास्त्ररत्नाकर-महोपदेशक-महामहोपाध्याय-

ब्रह्मश्री यज्ञस्वामिशास्त्रिणाम्

अभिनन्दनपत्रिका ।

॥ श्रीत्यागराजचरितम् ॥

इदं किल त्यागब्रह्मेति प्रतीतस्य परमार्थभक्तप्रवेकस्य चरित्रमधिकृत्य सुन्दरेशनाम्ना कविना प्रणीतं खण्डकाव्यं स्थालीपुलाकन्यायतः पर्यशीलयम्, अविन्दं च परमानन्दधुर्यं । भगवत इव भागवतानामपि सुचरितं श्रूयमाणं महीयसे श्रेयसे कल्पत इति पुराणेतिहासादिषु घण्टाघोषः । न खलु कलावस्मिन्शमदमविवेकवैराग्यादिगुणगणभूषणोनारदादिमहानुभावानुभावस्त्यागब्रह्मसदृशः कश्चिदासीदस्ति भविष्यतीति निश्चप्रचम् । यद्यपि द्राविड्यादिभाषाभिश्चरितमस्य निबद्धं कैश्चित्, तथाऽपि संस्कृतभाषामयं समग्रोदन्तप्रतिपादकं निबन्धनं केनापि न रचितमिति विदितमेव समेषाम् । तस्मात्कमनीयतममस्य कवेः कर्म श्लाघनीयमुपादेयं च सर्वेषां भवतीत्यभिप्रयन्—

यज्ञस्वामिशास्त्री ।

अनुक्रमणिका ॥

सर्गः	विषयाः
१.	सांतानिकलोकवर्णनम् ।
२.	नारदागमनं वाल्मीकिप्रस्थापनं च ।
३.	वाल्मीकिर्गोदावरीदर्शनं कावेरीगमनं च ।
४.	कावेर्युपदेशेन वल्मीकपुरगमनं तत्र जननं च ।
५.	पञ्चनदक्षेत्रगमनम् पित्रोर्वियोगः, तारकमन्त्रप्राप्तिश्च ।
६.	रामलक्ष्मणयोः प्रत्यक्षसंदर्शनम् ।
७.	नारदात्क्षरार्णवप्राप्तिः ।
८.	गोव्विलि-केशवार्य-संधिः ।
९.	गोविन्ददास-रामदास-समागमः, जप्येशोपदेशश्च ।
१०.	जप्येशेन कावेरीजले रामादिविग्रहप्रक्षेपः ।
११.	त्यागराजाक्रन्दनं विग्रहलाभश्च ।
१२.	शरभोजिराजमन्त्रिसमागमः ।
१३.	शरभोजिसमागमः ।
१४.	भार्यायाः कमलाम्बायाः प्रत्यक्षरामदर्शनम्, कान्तारे रामलक्ष्मणाभ्यां रक्षणं च ।
१५.	भर्याविवियोगः सांतानिकलोकगमनं च


FIG 32.

॥ श्रीरामो जयति ॥

॥ श्रीत्यागराजचरितम् ॥

प्रथमः सर्गः ।

चकास्ति सर्वलोकानां श्रेष्ठः सांतानिकाभिधः ।
स्वभक्तकुलवासार्थं स्वयं रामेण निर्मितः ॥१॥
समासाद्यो न तपसा दानयज्ञमुखैर्न च ।
गम्यः पुनर्नरश्रेष्ठै रामानुग्रहभागिभिः ॥२॥
चतुर्भी राजतैर्हेमैः प्राकारैः संवृतो महान् ।
इन्द्रनीलकृतै रत्नखचितैश्च मनोहरैः ॥३॥
चतुरश्रसमाकारः संविभक्तचतुष्पथः ।
दशयोजनविस्तीर्णो दर्शनीयः सकौतुकम् ॥४॥
इन्द्रादिभिर्देववरैर्दूरात्समुपसेवितः ।
हेमकूटसमाकारैर्गृहसंघैः सुशोभितः ॥५॥
गजयूथसुगम्यैश्च विशालैर्गोपुरैर्वृतः ।
कपाटहीनैः संगुप्तो वानरेन्द्रैः स्वतेजसा ॥६॥
नापणो न धणिग्वाऽस्ति न रोगी न चिकित्सकः ।
न सन्ति राजपुरुषा दण्डयुक्ताश्च निर्दयाः ॥७॥
वीथीमध्ये तथा संघा वाप्यो निष्कर्दमाः शुभाः ।
हेमपुष्करसंघैश्च सुगन्धैस्तु समावृताः ॥८॥
मधुरः शीतलस्तोयः पूर्णाभिश्चशरीरकैः ।
वज्रवैदूर्यवर्णैश्च सारसैः सर्वतो वृताः ॥९॥
उद्यानानि च रम्याणि वापीनां सन्ति पार्श्वतः ।
मन्दारपारिजाताद्यैः सीमार्धमुपकल्पितैः ॥१०॥

बहिः प्रथमवीथीषु गृहा दन्तकृताः शुभाः ।
भवन्ति द्वित्रभौमाश्च वरासनसमावृताः ॥११॥
चतुरा रूपवत्यश्च सर्वाभरणभूषिताः ।
उपासते जनान्धान्यश्चतस्रस्तत्र संगतान् ॥१२॥
मनसा कल्पितैरन्नैः पानैश्च विविधैस्तथा ।
वस्त्राभरणैश्चैव तोषयन्ति सुराङ्गनाः ॥१३॥
उच्चारयन्ति ये रामनामापदि यदृच्छया ।
स्खलन्त्याऽपि गिरा तेषां निवासोऽत्र प्रतिष्ठितः ॥१४॥
द्वितीयासु च वीथीषु पञ्चभौमकृता गृहाः ।
वरास्तरणसंवीता राजता हेमचित्रिताः ॥१५॥
आपद्यपि कृतं यैस्तु बुद्धिपूर्वं महात्मभिः ।
श्रीरामनामोद्गिरणं ते वसन्त्यत्र मानुषाः ॥१६॥
अष्टौ हि रुचिरा वामा एकैकं परिवार्य तु ।
तर्पयन्ति च तानेवं भक्ष्यभोज्यैरमानुषैः ॥१७॥
वीथीषु च तृतीयासु गृहाः सप्ताष्टभौमकाः ।
हेमरत्नविचित्राङ्गाश्चित्रसोपानसंयुताः ॥१८॥
नवरत्नासनैश्चैव वरार्हास्तरणैः शुभैः ।
नाट्यसंगीतमवर्नेर्दृष्टिहारिभिरन्विताः ॥१९॥
ये सत्फलमभीप्सन्तः श्रीरामायणमादरात् ।
पारायणमकुर्वंस्ते सर्वे तत्र प्रतिष्ठिताः ॥२०॥
तान्षोडश वरा नार्यो रूपवत्यः कुलोद्भवाः ।
स्नपयन्त्यो गाङ्गतोयैर्मकरन्दसुवासितैः ॥२१॥
परिचर्यां प्रकुर्वन्ति सर्वाभरणभूषिताः ।
वस्त्रैराच्छादयन्त्येवं हेमसूत्रविनिर्मितैः ॥२२॥
अलंकुर्वन्ति ताःकन्या भूषणैरतुलैरपि ।
भोजयन्ते च विविधैर्भोज्यैर्मानसकल्पितैः ॥२३॥

शय्यासु सुप्तान्ससुखं सुगन्धपरिलेपितान् ।
वीजयन्ति च जाग्रत्यो व्यजनैर्महिलाः पुनः ॥२४॥
वीथ्यां चतुर्थ्यां सद्मानि सर्वरत्नमयानि हि ।
दशोत्तरास्तेषु भौमा विराजन्तीव विद्युतः ॥२५॥
स्नानपानगृहाण्यत्र निर्मितानि पृथक् पृथक् ।
गीतवादित्रशालाश्च संलापार्थं गृहाणि च ॥२६॥
वितानानि च रम्याणि वाप्यश्च किल निर्मिताः ।
हेमसूत्रकृतैस्तत्र नवास्तरणैरावृताः ॥२७॥
सुखासनानि दीप्तानि नवरत्नाञ्चितानि च ।
सर्वत्र परिदृश्यन्ते दीपा रत्नसमाचिताः ॥२८॥
उदकुम्भाश्च दृश्यन्ते पूर्णाः शीतजलेन च ।
स्वर्णपात्रेषु पात्रेषु लतिकाः पुष्पसंकुलाः ॥२९॥
वाहनानि महार्हाणि मनसा निर्मितानि च ।
चित्तेप्सितप्रदेशांश्च प्रापयन्ति हि वेगतः ॥३०॥
कामितार्थं विना ये तु भक्त्या युक्ता रघूत्तमम् ।
अपूजयंश्च सततं तेषां वासोऽत्र निर्मितः ॥३१॥
असंख्येया वरा नार्यश्चतुराः शीलसंयुताः ।
रूपे चाप्रतिमा लोके वराभरणभूषिताः ॥३२॥
एकैकं परिवार्यात्र शुश्रूषन्ते च सादरम् ।
स्नपयन्ति परार्घ्यैश्च चन्दनोदैः सुगन्धिभिः ॥३३॥
महार्हाणि च वस्त्राणि नवान्याभरणानि च ।
धारयन्ति सुसंहृष्टा मालां रत्नमयीमपि ॥३४॥
भोजनैः षड्रसोपेतैर्गीतैर्वादित्रनिस्वनैः ।
नाट्यैश्च विविधैर्नार्यो रमयन्ति च संगतान् ॥३५॥
भद्राचलो रामदासस्तुकारामः पुरंदरः ।
रामभद्रमखी चैव ये चान्ये रामपूजकाः ॥३६॥

ते वसन्तः शुभास्तत्र रममाणाश्च देववत् ।
कथयन्तो रामगुणान्भगवद्ध्यानतत्पराः ॥३७॥
तदन्तस्तत्र सप्ताष्ट गृहा आकाशगामिनः ।
निर्मितानीह सर्वाणि रामेण मनसा किल ॥३८॥
अशक्यवर्णनं वाग्मिरूह्यं न मनसाऽपि च ।
इन्द्रः प्रार्थयते द्रष्टुं द्वारपालमिति ह्यलम् ॥३९॥
रम्येषु गृहमुख्येषु पार्वतीसहितः शिवः ।
निविष्टस्तत्र सुखितो रामायत्तस्वमानसः ॥४०॥
स्वयंभूर्भगवान्ब्रह्मा सरस्वत्या च संगतः ।
तत्रास्ते स महाभागो रामदृष्टिप्रसाधितः ॥४१॥
शरभङ्गोऽथ वाल्मीकिः सुतीक्ष्णो गाधिनन्दनः ।
भरद्वाजस्तथाऽन्ये च वसन्त्यत्र महर्षयः ॥४२॥
तन्मध्ये तु महद्गेहं प्रासादशतसंकुलम् ।
दृश्यं चक्षुष्मतां सिद्धविमानमिव निर्मितम् ॥४३॥
गोपुराट्टालकफुलैः संवृतं रत्ननिर्मितम् ।
अन्तर्गृहसहस्रैश्च वरास्तरणशोभितम् ॥४४॥
सरोभिर्निर्मलाम्भोभिरत्यन्तमभिशोभितैः ।
संकीर्णं शतशस्तत्र हेमपुष्करभासुरैः ॥४५॥
आस्तीर्णास्तरणं सम्यग्वरासनसमावृतम् ।
दीप्रं दीपैर्दर्शनीयैर्लम्बमानैस्ततस्ततः ॥४६॥
धूपैश्च विविधैः साधु धूपितं घ्राणहारिभिः ।
तन्मध्ये प्रणवाकारो मण्डपो मणिनिर्मितः ॥४७॥
सहस्रासनसंवीतो दृश्यः सर्वत्र तिष्ठता ।
बिन्दुस्थाने महाडोला सहस्रकिरणप्रभा ॥४८॥
वराहास्तरणोपेता वितानसमलंकृता ।
उपधानशतैश्चैव दृष्टिहारिभिरावृता ॥४९॥

सुवर्णशृङ्खलाभिश्च युता चतसृभिः शुभा ।
लम्बमानैश्च संकल्पैर्मणिदीपैः प्रकाशिता ॥५०॥
पार्श्वनिक्षिप्तसद्रत्नसालभञ्जिकया युता ।
वालव्यजनहस्ताभिः कन्याभिरभिसंवृता ॥५१॥
नवकुड्मलसंशोभिलतापात्रैश्च संकुला ।
तत्रैव भगवान्रामो जानकीसहितः प्रभुः ।
मन्दहासशुभास्येन दृष्ट्या कारुण्यपूर्णया ॥५२॥
सर्वान्समुत्सुकान्कुर्वन्नास्ते सर्वहिते रतः ।
किरीटमर्कसंकाशं धरन्स शिरसा विभुः ॥५३॥
पाण्डुरै रत्ननिचयैर्नीलमारकतैरपि ।
कल्पैर्वरैः कुण्डलैश्च भूषितश्रोत्रयुग्मकः ॥५४॥
कटकानि च हैमानि कुण्डलान्यङ्गदानि च ।
वपुषा धारयन्रामः शोभयन्सकलं गृहम् ॥५५॥
पीताम्बरमधो धृत्वा हेमतन्तुविनिर्मितम् ।
उत्तरीयं दधानश्च तथा मारकतच्छवि ॥५६॥
कौस्तुभं सूर्यसंकाशं वैजयन्तीं च सुप्रभाम् ।
उरसा धारयन्सर्वाः स्वभासाऽभासयद्दिशः ॥५७॥
जानकी मुदिता पार्श्वे तप्तकाञ्चनसंनिभा ।
सर्वाभरणसंपूर्णा शुशुभे नियता सदा ॥५८॥
भरतः शत्रुहन्ता च लक्ष्मणः शुभलक्षणः ।
विभीषणश्च सुग्रीवो हनूमाञ्जाम्बवानपि ॥५९॥
नलो नीलः सुषेणश्च ये चान्ये वानरोत्तमाः ।
तिष्ठन्तः सविधे रामं विनीताः समुपासते ॥६०॥
शत्रुघ्नः स्वयमागत्य सायं प्रातर्दृढव्रतः ।
प्रथमायां तथा वीथ्यां सर्वान्पृच्छत्यनामयम् ॥६१॥

शुश्रूषन्ते किमेता वो नियता नियतेन्द्रियाः ।
ईप्सितं मनसो ज्ञात्वा सर्वकामैरिहाङ्गनाः ॥६२॥
तथा द्वितीयवीथीषु भरतः स्वयमागतः ।
पृच्छति प्रणतो नित्यं महाभागानवस्थितान् । ६३॥
लक्ष्मणश्च समागत्य तृतीयासु महाबलः ।
अनामयं च कुशलं पृष्ट्वा वक्ति विनीतिभाक् ॥६४॥
रामायणस्य पठनं दुष्करं ह्यकृतात्मभिः ।
कृतं पुण्यतमं लोके भवद्भिरिह संगतैः ॥६५॥
महाप्रलयकालेऽपि नायं लोको विनङ्क्ष्यति ।
अस्माभिः पूजिताः सम्यग्भूयास्त भयवर्जिताः ।६६॥
अप्येताः संनताः सत्यः शुश्रूषन्ते सुराङ्गनाः ।
यद्यद्वाञ्छथ तान्सर्वान्किमिहोपाहरन्ति च ॥६७॥
इत्येवं सूनृतैर्वाक्यैस्तोषयित्वाऽप्यवस्थितान् ।
ललनाश्च स्थापयित्वा पदे गच्छति लक्ष्मणः ॥६८॥
वीथ्यां चतुर्थ्यां स पुनः स्वयं राघवपुंगवः ।
सीतया सहितोऽभ्येत्य कुशलं पृच्छति प्रभुः ॥६९॥
निष्कामा मामुपासीनाः संगताः किल निर्मलाः ।
कथं वा प्रतिकुर्यां च भवत्कृतसुकर्मणाम् ॥७०॥
निवृत्ताः पापकर्मभ्यो विरलाः प्राणिनः पुनः ।
आपथपि तथा नूनं विरला देवचिन्तकाः ॥७१॥
आराधयन्ति सदेवं नराः कामफलेप्सया ।
अतीव विरलास्तत्र महाभागवतोत्तमाः ॥७२॥
ये पुमांसो विना कामं मत्प्रसादाय केवलम् ।
अर्चन्ति मां नमस्यन्ति देवाः कीर्त्या न ते नराः ॥७३॥
तेन लोका जिताः सर्वे पावितास्तेन भूमयः ।
त्रिःसप्त पितरः पूर्वे तारिताः पापिनोऽपि ते ॥७४॥

बहिश्चरा मे प्राणास्ते नोत्सृजेयं क्षणं च तान् ।
तेषां तोषाच्च तुष्यामि विषीदामि विषादतः ॥७५॥
न मे प्रीतिकरं ह्यन्यद्भवतस्तोषणादिह ।
सीता च मन्यते साध्वी तथैव नियतात्मना ॥७६॥
सर्वबन्धविमुक्तोऽपि स्वाधीनहृदयोऽप्यहम् ।
भक्तबन्धान्मोचयितुं न शक्नोमि च मां पुनः ॥७७॥
अपि वो मनसः प्रीतिर्जायतेऽत्र निवासतः ।
शुश्रूषन्तेऽङ्गनाः साध्व्यः संयता नियतेन्द्रियाः ॥७८॥
यद्यद्वाञ्छन्ति मनसा भवन्तः सुखलालसाः ।
अवधार्याचिरादेव साधयन्ति किमङ्गनाः ॥७९॥
कृच्छ्रादुपास्य मां यूयं संगता नरपुंगवाः ।
पश्चात्तापो यथा न स्यात्किमेतास्तर्पयन्ति वः ॥८०॥
प्रातः सायं समागम्य ससीतो राघवः स्वयम् ।
परिपृच्छति तान्सर्वान्सुप्रियं सादरं तथा ॥८१॥
सर्वे संतुष्टचित्ताश्च सर्वकामैश्च तर्पिताः ।
श्रीराघवमुखाम्भोजदर्शनप्रीतमानसाः ॥८२॥
महान्तमपि कालं ते नयन्तश्च क्षणार्धवत् ।
रमन्ते मानुषा भक्ताः सर्वकामैश्च तर्पिताः ॥७३॥
आश्चर्यमिदमत्यर्थं क्षणमभ्यर्च्य राघवम् ।
सांतानिके तु मनुजाः पूज्यन्ते सततं शुभाः ॥८४॥

॥ इति श्रीसुन्दरेशार्यविरचिते श्रीमत्त्यागराजचरिते
सांतानिकलोकवर्णनं नाम प्रथमः सर्गः ॥

अथ द्वितीयः सर्गः ।

एकदा भगवान्रामः ससीतः समलंकृतः ।
उपविष्टस्तु डोलायां परिवारैः समावृतः ॥१॥
उपधाने महार्हे च दक्षिणं बाहुमुत्सृजन् ।
वामेन पङ्कजं हैमं लीलयाऽऽलोलयन्विभुः ॥२॥
पारिजातसुमाकीर्णे कौशेयपरिमण्डिते ।
विन्यस्य चरणावङ्के सीतायाः कोमलौ पुनः ॥३॥
शोभया भूषणानां च स्वभासा च रघूत्तमः ।
प्रदीपयन्दिशः सर्वा व्यराजत विशांपतिः ॥४॥
भरद्वाजादयः सर्वे महात्मानो महर्षयः ।
रामदासादयो भक्ता रामानुग्रहभागिनः ॥५॥
विभीषणश्च सुग्रीवः सर्वे ते वानरोत्तमाः ।
संगताः परमात्मानमुपासाञ्चक्रिरे मुदा ॥६॥
ततस्तु निनदं रम्यं श्रोत्रमानसहारिणम् ।
सद्यः समुद्गतं श्रुत्वा सर्वे ते विस्मयं ययुः ॥७॥
सकौतुकमवैक्षन्त चोद्ग्रीवाः सर्वतो दिशः ।
ततोऽपश्यन्महात्मानं वीणापाणिं समागतम् ॥८॥
जटाभारेण महता हेमवर्णेन शोभितम् ।
विशालफालविन्यस्तेनोर्ध्वपुण्ड्रेण भासितम् ॥९॥
तुलसीकाष्ठसंकल्पमणिसंकलितात्मभिः ।
उरसा धियमाणाभिर्मालाभिरुपशोभितम् ॥१०॥
वल्कलेनोपविद्धाङ्गं मौञ्जीसंबद्धवल्कलम् ।
रामनामलसद्वक्त्रं राघवस्य परं प्रियम् ॥११॥
चरन्तं गगने रामगुणामृतविवर्षुकम् ।
सर्वथा दृश्यरूपं तं सर्वेषां च मनोहरम् ॥१२॥

व्यपोहन्तं च दृष्ट्वैव कामादीन्भक्तिदूषकान् ।
ददृशुस्ते समायान्तमन्यं चन्द्रमिवोद्गतम् ॥१३॥
दृष्ट्वा सकौतुकाः सर्वे स्वासनात्स्वयमुत्थिताः ।
अपूजयंश्च पूजार्हं नारदं तं तपोधनम् ॥१४॥
समाश्लिष्यंश्च तं केचित्पस्पृशुः केऽपि तत्पदम् ।
कुशलं चाव्ययं चैव पर्यपृच्छंस्तु केचन ॥१५॥
सर्वान्संमानयन्पूज्यान्यथान्यायं विचक्षणः ।
ववन्दे रामचन्द्रस्य चरणौ नियतेन्द्रियः ॥१६॥
दृष्ट्वा प्रसादितस्तस्य मन्दस्मेरमुखेन च ।
उत्थाय पार्श्वेऽतिष्ठच्च मुनिः स विनयान्वितः ॥१७॥
लक्ष्मणः सहसोत्थाय नारदं राघवप्रियम् ।
समुपावेशयत्पूज्यं स्वासने रत्नकल्पिते ॥१८॥
अथोपविष्टं पप्रच्छ भगवान्राघवस्तदा ।
कच्चित्त्वं कुशली वत्स कच्चिन्नन्दसि नित्यशः ॥१९॥
त्रिलोकी रमते किं नु मद्गुणैर्भुवि विस्तृतैः ।
रघूणां सुकृतव्रातफलत्वेन गते मयि ॥२०॥
यदा दाशरथिर्भूत्वा न्यवसं पृथिवीतले ।
तदा लोका हि मुदिताः शास्त्रानुगतमद्गुणैः ॥२१॥
स्मरन्ति किमु मां लोका जानकीमपि मत्प्रियाम् ।
लक्ष्मणस्य सुखत्यागं सौशील्यं भरतस्य च ॥२२॥
कलौ हि कर्मणो यज्ञात्तपोयोगाच्च नारद ।
साध्वीश्वरे भक्तिरेव किमिदं जानते नराः ॥२३॥
भक्त्याः सत्यमहिंसां च सर्वभूतहिते रतिम् ।
समबुद्धिं च देवेषु चाधाराज्ञानते किमु ॥२४॥
सत्यपूतवचाः किं नु सर्वभूतदयायुतः ।
अर्चयन्मां सदा भक्त्या परया भजते जनः ॥२५॥

इत्थं पृष्टो भगवता रामेण विदितात्मना ।
जगाद नारदस्तत्र साञ्जलिस्तपसां निधिः ॥२६॥
सर्वज्ञोऽसि भवान्राम पृच्छत्यविदितं नु किम् ।
यदस्ति तन्ममैवोक्त्या विशदीकर्तुमिच्छति ॥२७॥
अवतारात्प्रभोः पूर्वमन्धे तमसि तिष्ठता ।
लोकेन किंचिन्न ज्ञातं धर्माधर्मविवेचनम् ॥२८॥
कौसल्याभक्तिपाशेन निबद्धस्तत्सुतोऽभवः ।
धर्मबीजं यल्लिखितं व्यासलोकत्रयं पुरा ॥२९॥
हृद्यैर्भवद्गुणैः सर्वे स्वयं संकृष्टमानसाः ।
अनुकर्तुं भवन्तं हि प्रायतन्त महीतले ॥३०॥
एकादश सहस्राणि वर्षाणां किल भूतले ।
रामो रामो राम इति कथाश्चावर्णयन्मुदा ॥३१॥
ये स्वयं भवता धर्माः श्रद्धयाऽनुष्ठिताः पुरा ।
सर्वे तानन्वतिष्ठन्तो मुदिता अभवन्किल ॥३२॥
यदा भवानिदं स्थानमागतो भक्तसंवृतः ।
स्वस्वाभिमत एवाद्य धर्म इत्युपदिश्यते ॥३३॥
केचिज्जाति न मन्यन्ते वर्णमन्ये न मानवाः ।
पूर्वं धर्मं विमुञ्चन्ति सर्वे नास्तिक्यवादिनः ॥३४॥
सामान्यधर्महीनाश्च मन्वाना धार्मिकं स्वयम् ।
उदाहरन्तो वाक्यानि श्रुतिभ्यो गर्वशालिनः ॥३५॥
गरीयसी भक्तिरिति वदन्तो वचनैः पुनः ।
न यान्ति तत्समीपेऽपि नयन्त्येवमहानि च ॥३६॥
भक्तिर्मनोवृत्तिरेव न हि शारीरिकीत्यहो ।
यदंश योगयज्ञाश्च कर्मनिरता जनः ॥३७॥
प्रतिमापूजनं व्यर्थं तद्धि शास्त्रविगर्हितम् ।
पापावहा रूपकल्पनिरूपस्य किलेत्यपि ॥३८॥

वदन्तो विविधान्वादान्वञ्चयन्तः परस्परम् ।
अलसा इन्द्रियारामा· पापमेवाचरन्ति च ।३९॥
अध्यापयन्ति वेदांश्च केचिच्छास्त्राणि सादरम् ।
अनाचरन्तो वेदोक्तं स्वोदरस्यैव पूर्तये ॥४०॥
इत्थं चेत्सुचिरं कालमकार्याण्याचरेत्पुनः ।
लोकोऽयं भविता क्षीणो नूनं राघव सर्वथा॥४१॥
अयुक्तं वाऽप्यभूतं वा मद्वचःसु भवेद्यदि ।
दयार्द्रेण मयोक्तेषु क्षमस्व रघुनन्दन ॥४२॥
इत्युक्तो नारदेनाथ विह्वलेन दयालुना ।
उवाच भगवान्रामः स्मयमानः सभासदः ।।४३॥
अपि श्रुतं नारदस्य वचनं सत्यसंश्रितम् ।
त्रिलोकीक्षेमनिरतो दयया वक्ति साम्प्रतम् ॥४४॥
यदुक्तं नारदेनाद्य सर्वं तत्सत्यमेव हि ।
असत्यं भाषते नायमापद्यपि तपोधनः ॥४५॥
सकृदाचरितं पापं वासनामर्पयद्धृदि ।
उद्योजयति पापानि कर्तुमेव पुनः पुनः । ४६॥
आचरन्ति यदा पापमसकृद्याति भीरुता ।
इन्द्रियाणि बलं प्राप्य लघूकुर्वन्ति चेतनाम् ॥४७॥
चेतनाबलहीनास्तु मनःकरणयन्त्रिताः ।
अनीशास्ते चिन्तयितुं कर्म कुर्वन्ति कुत्सितम् ॥४८॥
कुकर्मणैत्य नरकं प्राप्य जन्म कुयोनिजम् ।
आचरन्नेव पापानि यात्यधः किल मानुषः ॥४९॥
एकः करोति पापानि तत्सङ्गाद्बहवः परे ।
पापमेवाचरन्तश्च गच्छन्ति नरकं बत ॥५०॥
इत्थं ज्ञातवताऽनेन दयार्द्रहृदयेन च ।
तापाक्रान्तेन गदितं शृण्वन्तु सदसि स्थिताः ॥५१॥

पापमूलं पापफलं पापस्य विषमान्गुणान् ।
ज्ञातवद्भिः कथं तूष्णीं भूयते च शुभात्मभिः ॥५२॥
उपायं कंचिदचिराद्विचिनुध्वं महाशयाः ।
यथा लोकः शान्तपापो भूयः सौख्यमुपैष्यति ॥५३॥
इत्थमुक्तास्तदा सर्वे सर्वलोकहितैषिणा ।
प्रतिवक्तुमजानाना मौनमेव प्रपेदिरे ॥५४॥
ज्ञात्वा तु भगवानेतानुत्तरं वक्तुमक्षमान् ।
मुदा प्रोवाच गम्भीरनिनदेन सकौतुकम् ॥५५॥
तूष्णीमाध्वे कुतो यूयं पुण्येन तपसाऽऽगताः ।
पापौघमग्ने लोके च सर्वस्मिन्क्षयमागते ॥५६॥
अन्धकारेषु गच्छन्तं निम्नोन्नततले वने ।
पश्यतो दीपहस्तस्य युक्तं किं मौनभागिता ॥५७॥
उन्नतैश्चापि निम्नैश्च शुभाशुभफलैर्युते ।
पुत्रकण्टकसंयुक्ते स्त्रीविषव्रततीवृते ॥५८
बन्धुव्यालसमाक्रान्ते मोहध्वान्तसमाकुले ।
भवारण्ये संचरन्त उपेक्ष्याः किं भवत्समैः ॥५९॥
भक्तिदीपं प्रकाश्याशु तारयध्वं महाधिया ।
येनैव निरयं यातास्तरेयुश्च भवाम्बुधिम् ॥६०॥
पापान्निवृत्तिर्युक्ता तु न पापिभ्यो विशेषतः ।
पापिनस्तु समासाद्य वसन्तस्तैश्च संगताः ॥६१॥
पापेभ्यस्तान्निवर्त्याशु भक्तिं समुपदिश्य च ।
कर्तुमेव हिते युक्तं नाज्ञाते भवतामिदम् ॥६२॥
युष्माकेको भुवं गत्वा भक्तियोगमनामयम् ।
सुलभं सर्वसाध्यं च प्रकाशयतु मोदतः ॥६३॥
आधिव्याधिभिराकीर्णः कथं कर्मानुतिष्ठतु ।
बहूपकरणैः साध्यं बहुलैर्मन्त्रवेदिभिः ॥६४॥

न चिन्तयेद्धि मनसा तपोयोगस्य साधनम् ।
पिशाचीव मनोवृत्तिर्मोहमापाद्य कर्षति ॥६५॥
दृढान्धकारमग्नानां यः समुद्धरणे क्षमः ।
गच्छत्वसौ महीलोकं तानुद्धर्तुं भवाम्बुधेः ॥६६॥
इत्युक्त्वा भगवान्रामो ददर्श परितो दिशः ।
सर्वे संभ्रान्तमनसो न किंचिदपि चाब्रुवन् ॥६७॥
अस्माकं तु कथं साध्यं लोकानां पापमोचनम् ।
इत्येवं चिन्तयन्तस्ते तूष्णीमासन्मुनीश्वराः ॥६८॥
ततोऽब्रवीद्विरूपाक्षः प्रथमासनसंस्थितः ।
भूपाभुजंगमुद्वीक्ष्य समीकुर्वन्करेण सः ॥६९॥
उक्तं यद्राघवेणाद्य कर्तव्यमचिरादिव ।
दुष्करं तदहं कर्तुं न वेद्मि सदृशं प्रभो ॥७०॥
वेदार्थाज्ञानिनस्ते हि कल्पयन्तो यथामतम् ।
असदाचारसंमूढा अभवन्मनुजाः पुरा ॥७१॥
आविर्भूय च कालड्यामालवायसरित्तटे ।
शंकराचार्यनामाऽहं सदाचारानबोधयम् ॥७२॥
हिमाचलादाकुमारि संचरन्सर्वतो महीम् ।
अद्वैतं प्रकटीकुर्वञ्शास्त्रयुक्तिविनिश्चितम् ॥७३॥
प्रकटीकरणार्थं च मोक्षोपायस्य तस्य तु ।
सर्वत्रास्थापयं भूयो मठान्संन्यासधिष्ठितान् ॥७४॥
सूक्ष्मं तच्छास्त्रसंघस्य ज्ञातुं पुनरनीश्वराः ।
कामात्मानोऽभवन्सर्वे किं वाऽद्य करवाण्यहम् ॥७५॥
इत्युक्तवति कैलासनाथे योगविदां वरे ।
हनुमानब्रवीद्रामपादमूलात्समुत्थितः ॥७६॥
महार्हमपि कालं तं नयतो व्यर्थमेव तान् ।
दृष्ट्वा करुणयाऽऽक्रान्तो मध्वनामाऽज्जनिष्यहम् ॥७७॥

संसारान्तर्निमग्नानां तारणाय कथंचन ।
भक्तिप्रदं सुसंवेद्यं शास्त्रं द्वैतं व्यबोधयम् ॥७८॥
संचरन्पृथिवीं सर्वां वर्णयन्भवतो गुणान् ।
अस्थापयं मठांश्चापि भक्तियोगस्य सिद्धये ॥७९
अनीशा ज्ञातुमद्वैतं कुर्वन्तो ये यथामति ।
द्वैतं कृच्छ्राज्ज्ञातवन्तः केचिद्भक्तियुता नराः ॥८०॥
तेऽपि कालवशाज्जाताः सङ्गदोषेण चाहताः ।
अकार्यमेव कुर्वन्ति किं मया क्रियतामितः ॥८१॥
इत्थमुक्त्वाऽनिलसुतो विनीतः समुपाविशत् ।
शुकः प्राह तदा सर्वान्स्वासनात्स्वयमुत्थितः ॥८२॥
काममोहयुताँल्लोकान्ब्रह्मा दृष्ट्वा दयान्वितः ।
अचोदयन्मां दयया गन्तुं भूमिं पुरा किल ॥८३॥
गत्वा भुवं कबीर्दास इति नाम्ना चरन्नहम् ।
भक्तियोगस्य माहात्म्यं सर्वेभ्यः समुपादिशम् ॥८४॥
यदा भूमिं विहायाथ लोकमेनं समाश्रयम् ।
भक्तवेषेण केचित्तु वञ्चयन्त्यखिलाञ्जनान् ॥८५॥
भक्तिहीना जनाः कालं नयन्त्युदरपोषकाः ।
मत्कृतिर्व्यर्थतामागात्किंयेत किमितो मया ॥८६॥
नारदः प्राह तान्सर्वान्किंचिद्धैर्यं समास्थितः ।
अनुष्ठितं मया यच्च शृणुतैतन्महर्षयः ॥८७॥
भक्तियोगं पुनर्लोके विस्तारयितुमञ्जसा ।
सर्वेषां मानसे रामवृत्तं स्थापयितुं महत् ॥८८
तुलसीदास इत्येव वहन्नाम मुदा युतः ।
भारतं वर्षमासाद्य व्यचरं किल सर्वतः ॥८९॥
वाल्मीकिरकरोद्रामचरितं संस्कृते यथा ।
तद्भाषाज्ञानहीनानां हिन्द्यामकरवं पुनः ॥९०॥

अथोवाच च संविग्नो राघवं भक्तवत्सलम् ।
अशीतिं ताः कथं वाऽहं नेष्ये देव त्वया विना ॥११७॥
मन्दसेरमुखो रामः सान्त्वयन्निदमब्रवीत् ।
महीतले तु वर्षाणि दिनानीह महामते ॥११८॥
तस्माद्गच्छ भुवं सौम्य लोकानां हितकाम्यया ।
सानुजं सीतया युक्तमात्मानं दर्शयामि ते ॥११९॥
इत्युक्तः स च रामेण सर्वभूतहिते रतः ।
संत्यज्य दुःखं शुद्धात्मा भुवं गन्तुं मनो दधे ॥१२०॥
पुनः पुनर्नमस्कृत्य राघवं धर्मवत्सलम् ।
रक्षां प्रार्थयमानश्च प्रतस्थे सर्वसंस्तुतः ॥१२२॥

इति श्रीसुन्दरेशार्यविरचिते श्रीत्यागराजचरिते
"श्रीवाल्मीकिप्रस्थानं" नाम द्वितीय. सर्गः ॥

अथ तृतीयः सर्गः ।

सोऽधिरुह्य विमानं तं हेमरत्नविनिर्मितम् ।
घण्टाशतसमाकीर्णं मुक्तामणिविचित्रितम् ॥१॥
प्रतिमाभिः सुरूपाभिर्भूषिताभिश्च भूषणैः ।
सर्वत्र परिकल्पाभिर्हेमीभिः समलंकृतम् ॥२॥
प्रयत्नान्निर्मितेनापि वरास्तरणशोभिना ।
आज्ञासनेन संदीप्तं कामगं च मनोहरम् ॥३॥
मेरुशृङ्गगतं सूर्यं तिरस्कुर्वन्स्वतेजसा ।
प्रतस्थे भुवमुद्दिश्य वाल्मीकिर्भगवानृषिः ॥४॥
प्रस्थितं तं मुनिवरं सांतानिकनिवासिभिः ।
बहुमानेन चापश्यद्राघवः सहलक्ष्मणः ॥५॥
गच्छन्तं गगने देवाः प्रतियुर्यामवोदितम् ।
उद्ग्रीवाः समपश्यंस्ते तेजसा तस्य विस्मिताः ॥६॥

अनुजानातु मां रामः करुणानिलयः प्रभुः ।
बहिर्वीथिगतं वाऽपि प्रार्थये च पुनः पुनः ॥१०४॥
वाल्मीकिरित्थमुक्त्वा तु दीनचित्तस्तथा प्रभुम् ।
पश्यन्नेव तथा तस्थौ नियच्छन्नश्रु लोचनात् ॥१०५॥
ततः प्राहारविन्दाक्षो वाल्मीकिं भृशदुःखितम् ।
तोषयन्मन्दहासेन वचोभिर्मधुरैस्तदा ॥१०६॥
सांतानिके पदं प्राप्य पुनर्भूमिं गतो यदि ।
लज्जाकरं ममैवैतज्जन्तूनां न हि गच्छताम् ॥१०७॥
यद्यहं प्रेषये त्वां तु लोकानां हितकाम्यया ।
सर्वेषामपि तत्कार्यं प्रयत्नाद्धर्मनिश्चयात् ॥१०८॥
लोकानां हितमिच्छन्वै दधीचिः स्वानश्नदात् ।
शिविः स्वमांसं श्येनाय गाधिजः स्वतपस्तथा ॥१०९॥
अन्ये राजर्षयः पूर्वे महात्मानो महर्षयः॥
परेषामुपकाराय सर्वमेव ददुः किल ॥११०॥
वाल्मीके गच्छ भूलोकं मा शोकेषु मनः कृथाः ।
त्वया किल महत्कार्यं यत्पुराऽपि कृतं मुने ॥१११॥
सर्वे किलेन्द्रियारामाः सुखास्वादनलम्पटाः ।
न शृण्वन्ति दुरूहाणि शास्त्राणि विविधानि च ॥११२॥
औषधानि यथा माता शर्करान्तर्निवेश्य च ।
ददाति स्वसुतेभ्यस्त्वं भक्तिं गानेषु योजय ॥११३॥
इत्युक्तवति रामे तु वाल्मीकिः प्राह दीनवत् ।
क्षमा नयामि कवि वा दर्शनं भवतो विना ॥११४॥
वत्सराणामशीत्यैव ददामि तव दर्शनम् ।
नारदोऽपि समागत्य त्वां तु द्रक्ष्यति सादरम् ॥११५॥
राघवेणेत्थमादिष्टो वाल्मीकिर्विह्वलान्तरः ।
भुवीपतीः क्षमा नेष्ये कथं वेति विचिन्तयन् ॥११६॥

अथोवाच च संविग्नो राघवं भक्तवत्सलम् ।
अशीतिं ताः कथं वाऽहं नेष्ये देव त्वया विना ॥११७॥
मन्दसेरमुखो रामः सान्त्वयन्निदमब्रवीत् ।
महीतले तु वर्षाणि दिनानीह महामते ॥११८॥
तस्माद्गच्छ भुवं सौम्य लोकानां हितकाम्यया ।
सानुजं सीतया युक्तमात्मानं दर्शयामि ते ॥११९॥
इत्युक्तः स च रामेण सर्वभूतहिते रतः ।
संत्यज्य दुःखं शुद्धात्मा भुवं गन्तुं मनो दधे ॥१२०॥
पुनः पुनर्नमस्कृत्य राघवं धर्मवत्सलम् ।
रक्षां प्रार्थयमानश्च प्रतस्थे सर्वसंस्तुतः ॥१२२॥

इति श्रीसुन्दरेशार्यविरचिते श्रीत्यागराजचरिते
" श्रीवाल्मीकिप्रस्थानं " नाम द्वितीयः सर्गः ॥

अथ तृतीयः सर्गः ।

सोऽधिरुह्य विमानं तं हेमरत्नविनिर्मितम् ।
घण्टाशतसमाकीर्णं मुक्तामणिविचित्रितम् ॥१॥
प्रतिमाभिः सुरूपाभिर्भूषिताभिश्च भूषणैः ।
सर्वत्र परिकल्पाभिर्हेमीभिः समलंकृतम् ॥२॥
प्रयत्नान्निर्मितेनापि वरास्तरणशोभिना ।
आक्षासनेन संदीप्तं कामगं च मनोहरम् ॥३॥
मेरुशृङ्गगतं सूर्यं तिरस्कुर्वन्स्वतेजसा ।
प्रतस्थे भुवमुद्दिश्य वाल्मीकिर्भगवानृषिः ॥४॥
प्रस्थितं तं मुनिवरं सांतानिकनिवासिभिः ।
बहुमानेन चापश्यद्राघवः सहलक्ष्मणः ॥५॥
गच्छन्तं गगने देवाः प्रतिरथ्यामवोदितम् ।
उद्ग्रीवाः समपश्यंस्ते तेजसा तस्य विस्मिताः ॥६॥

नीलाभ्रान्कर्षयन्हेमान्स्वभासा चावभासितान् ।
क्वचिद् द्रुतं क्वचिन्मन्दं यात्वा तिष्ठन्क्वचित्पुनः ॥७॥
ज्ञानभानू राघवेण भुवं प्रस्थापितः किमु ।
इति विस्मितचित्तांस्तान्पश्यन्नाकाशगामिनः ॥८॥
अथाधस्तलमागत्य हिमाचलमुपागमत् ।
तमागतं परं ज्ञात्वा योगदृष्ट्यैव तापसाः ॥९॥
मन्वानाः सुकृतं भूम्याः पापघ्नं जलाशयम् ।
संगताः परमप्रीतास्तोषयामासुरर्हणैः ॥१०॥
सांतानिकात्समायान्तं विमानं सूर्यवर्चसम् ।
दृष्ट्वा स्पृष्ट्वा च मुदिताः पश्यन्तोऽनिमिषा इव ॥११॥
विस्मयाविष्टहृदयाः पप्रच्छुः कुशलं मुनिम् ।
सादरं सस्पृहं चैव बहुमानेन तापसाः ॥१२॥
पूर्वं भागीरथीतीरे रामनाम जपन्सदा ।
यद्भवानवसच्चेति ह्यज्ञासिष्म मुने वयम् ॥१३॥
ततः श्रुतं भगवता राघवेण महात्मना ।
सशरीरो भवान्नीतः सांतानिकभुवं त्विति ॥१४॥
अहो रामस्य करुणा स्वभक्तेषु विशेषतः ।
यद्राघवः स्वयं प्राप्य भवन्तं समनीनयत् ॥१५॥
न पश्यामो दयामेनां देवेष्वन्येषु तादृशीम् ।
अवतारेषु वाऽन्येषु नारायणकृतेष्वपि ॥१६॥
कृष्णः सख्ये कुचेलायार्थित एव श्रियं ददौ ।
अज्ञातकपये रामः स्वयं गत्वा श्रियं ददौ ॥१७॥
कृष्णस्तु फलविक्रेत्र्या आगतायै श्रियं ददे ।
कण्टकाविद्धचरणः शबर्या एत्य राघवः ॥१८॥
शत्रोर्भ्रातरमायान्तमरक्षद्रघुपुंगवः ।
स्वसख्यर्जुनपुत्रस्य यत्नो नाशाय नन्दभूः ॥१९॥

मातुलं च सुतान्हत्वा मुमोद वसुदेवजः ।
हन्तुं चानुत्सुकः शत्रुं प्रैषयद्दूतमङ्गदम् ॥२०॥
स्वपत्नीहरणाख्यात्रे पक्षिणामवराय च ।
कः कुर्याद्राघवादन्य इष्टिमन्त्यां तु सादरम् ॥२१॥
का प्रीतिर्मुनिवृन्देऽपि राघवस्य महौजसः ।
अहो धर्मरतिश्चापि सौलभ्यं प्रियवक्तृता ॥२२॥
एकजिह्वस्तच्चरितं वर्णयेत्कथमुत्तमम् ।
सहस्रवदनः शेषो वर्णयेदंशमेव हि ॥२३॥
इति संवदतो दृष्ट्वा पुलकाङ्कितविग्रहान् ।
आनन्दाश्रुपरिक्लिन्नवल्कलाजिनवाससः ॥१४॥
तपःसंक्लिष्टसर्वाङ्गान्वह्निसूर्यसमप्रभान् ।
मुमोद परमप्रीतो वाल्मीकिर्मुनिपुंगवः ॥२५॥
ततः प्राह स वाल्मीकिस्तान्मुनीन्भृशविस्मितान् ।
महात्मानस्त्वहो यूयं पूतोऽहं दर्शनाद्धि वः ॥२६॥
सद्राघवगुणास्वादलम्पटा इह संगताः ।
भवद्भिस्तारितान्येव भुवनानि चतुर्दश ॥२७॥
क एष देशः संप्रोक्तो महाभागवतोत्तमाः ।
जनयन्मनसः प्रीतिं परां शान्तिं च यच्छति ॥२८॥
ऊचुस्ते मुदितास्तां तु नारायणसमाश्रयाम् ।
बदरीं सर्वपापघ्नीं केदारस्याविदूरतः ॥२९॥
इत्युक्तोऽथ स वाल्मीकिः केदारं बदरीमपि ।
कृत्वा प्रदक्षिणं पुण्यं तत्र दृष्ट्वा च देवताः ॥३०॥
संमान्य च ऋषीन्सर्वान्प्रतस्थे दक्षिणां दिशम् ।
पश्यत्सु मुनिसंघेषु बहुमानेन चादरात् ॥३१॥
ततोऽपश्यद्धरिद्वारं यत्र गङ्गा भुवं गता ।
अवस्थितानश्मकल्पं निर्विकल्पसमाधिगान् ॥३२॥

दीप्यमानैः स्वतेजोभिः पूरकांस्तांश्चतुर्दिशाम् ।
आत्मानं सर्वभूतस्थं सर्वानात्मनि पश्यतः ॥३३॥
प्रदक्षिणीकृत्य च तानवरुह्य विमानतः ।
स्नात्वा गङ्गाजले यत्नो नारायणपदोद्भवे ॥३४॥
प्राचीं प्रतस्थे तेजस्वी जने पश्यति विस्मिते ।
किमस्तादुदयं याति रविरित्याप्तकौतुके ॥३५॥
ततः समाययौ काशीं पुण्यां पुण्यतमैर्वृताम् ।
रामनामोपदेशेन यत्र तारयतीश्वरः ॥३६॥
सांतानिकागतान्यत्र विमानानि सहस्रशः ।
नयनाय गतात्मनां संगतानि ददर्श सः ॥३७॥
अथ विश्वेश्वरं नत्वा भवानीं माधवं च सः ।
मार्गेण दक्षिणप्राच्यः प्रयागमगमन्मुनिः ॥३८॥
यत्र पूर्वं भरद्वाजो वसन्राममपूजयत् ।
यत्समीपे वसन्सोऽपि रामनामाजपन्मुदा ॥३९॥
स तं वीक्ष्य भृशं दीनो ह्ययथापूर्ववर्तिनम् ।
व्याकुलश्चिन्तयामास चोज्जीवेयुरिमाः कथम् ॥४०॥
पूर्वमत्र महात्मानः सर्वे संनियतेन्द्रियाः ।
महर्षिकल्पाः श्रीरामनाममन्त्रपरायणाः ॥४१॥
कथमेते गता इत्थं पाषण्डाश्चेन्द्रिये रताः ।
तथाऽपि पावनी गङ्गा कुत्सितानुद्धरेदपि ॥४२॥
इत्थं समाधाय मनः प्रययौ दक्षिणां दिशम् ।
पूरीं समाययौ यत्र कृष्णः सादरमर्च्यते ॥४३॥
तत्र नत्वा हृषीकेशं प्रतिमारूपसंस्थितम् ।
अपश्यद्दक्षिणाशायां कृष्णां गोदावरीमपि ॥४४॥
दृष्ट्वा गोदावरीं पुण्यां विमानादवरुह्य सः ।
स्नात्वा च विधिवत्तस्यास्तीरे तु समुपाविशत् ॥४५॥

पश्यन्बहूदकां रम्यां तीरवृक्षान्मनोरमान् ।
विस्मयाविष्टहृदयः पश्यन्नेवाभ्यवर्तत ॥४६॥
अथापश्यत्समायान्तीं देवीं सर्वाङ्गसुन्दरीम् ।
रक्तमञ्जीरसंशोभिरत्ननूपुरधारिणीम् ॥४७॥
दधानां वाससी रक्ते हेमरत्नविनिर्मिते ।
नवरत्नकृतैर्हारैर्मौक्तिकैश्च विभूषिताम् ॥४८॥
कटकाङ्गदकेयूरताटङ्कसमलंकृताम् ।
वर्णचित्रैः सुगन्धैश्च सुमैः कल्पितशिरोरुहाम् ॥४९॥
दैवीमृद्धिमनुप्राप्तां देवतां भूगतामिव ।
स्वस्याभिमुखमायान्तीं दृष्ट्वोत्तस्थौ मुनिस्तदा ॥५०॥
पार्श्वमागत्य तिष्ठन्तीं जानकीमिव रूपिणीम् ।
विनीतस्तामुपागम्य ववन्दे चरणौ यतः ॥५१॥
कारुण्यामृतकल्लोललोचनैरुपवीक्ष्य तम् ।
जगाद देवता मन्दमुत्थाय विनयास्थितम् ॥५२॥
गोदावरीति मां विद्धि यतमानां सुभूतये ।
महदद्धा त्वया कार्यं भूलोकमनुगच्छता ॥५३॥
भवरोगाकुलो लोक आधिव्याधिप्रपीडितः ।
भक्त्यौषधं प्रदायाशु संतारय दृढव्रत ॥५४॥
इत्युक्तः स तु वाल्मीकिर्देव्या पूर्वप्रसन्नया ।
पूतां गोदावरीं ज्ञात्वा भक्तियुक्तो मुमोद सः ॥५५॥
स तां प्रदक्षिणीकृत्य हर्षगद्गदया गिरा ।
विस्तार्य नेत्रे पश्यंश्च प्रोवाच वचनं तदा ॥५६॥
भगवत्पादसङ्गेन स्वयं पूता तु जाह्नवी ।
पवित्रीकृत्य लोकान्सा पाति नित्यमनिन्दिता ॥५७॥
भवत्यास्तीरमासाद्य वसंश्च बहुवत्सरान् ।
ससीतः सानुजश्चैव राघवः प्रमुमोद ह ॥५८॥

यः स्वयं पूतनामाऽपि त्रिसंध्यं स्वात्मशुद्धये ।
स्नात्वा भवत्यास्तीर्थेषु कृतात्मानममन्यत ५९
अहो राघवसर्वाङ्गसङ्गलाभपवित्रिते ।
भवत्याः स्मरणं सर्वपापापहमिहाद्य नः ॥६०॥
भवत्या दर्शनादद्य कृतार्थोऽस्मि शुचिस्मिते ।
कारुण्यदृष्ट्या संपेक्ष्य पूर्णोद्योगं कुरुष्व माम् ॥६१
अथोवाच भृशं तुष्टा विनीतं पार्श्वसंस्थितम् ।
भद्रमस्तु महाभाग शाश्वतीं कीर्त्तिमाप्नुहि ॥६२॥
गोपन्नेति महात्माऽत्र राघवस्य महालयम् ।
निर्माय स्वर्गतः पूर्वं दृश्यं राघवदैवतैः । ६३॥
कान्तारैरावृतं तीरं वृकगोमायुसंकुलैः ।
अनेनैवालयेनाहं कावेरीव समुज्ज्वला ॥६४॥
गच्छ भद्राचलं वत्स पश्य रामस्य चालयम् ।
तानीपं स्वयमभ्येत्य ददौ यो व्ययितं धनम् ॥६५॥
पश्यंश्चोलान्भृशं रम्यान्क्षेत्राणि विविधानि च ।
कावेरीं गच्छ तां रम्यां सा ते क्षेमं विधास्यति ॥६६॥
सह्यपर्वतसंभूता हृदयेऽङ्गे च जानुनि ।
धारयन्ती च रङ्गेशं शोभतेऽतीव सुन्दरी ॥६७॥
रत्नाकरस्य मे भर्तुर्गङ्गायां मयि वा सुत ।
न प्रीतिर्बहुमानो वा कावेर्यामिव विद्यते ॥६८॥
कान्तारैर्दुर्गमैश्चैव सिंहव्याघ्रभयानकैः ।
आवृतोमयतीरां मां गङ्गां च हसति प्रियः ॥६९॥
आ जन्मभूमेः सा देवी स्वभर्तुश्चा समागमाम् ।
उद्यानैर्नन्दनामैस्तु शोभते तटयोर्द्वयोः ॥७०॥
सस्नेहं भ्रुवतीमित्थं जनयित्रीमिवात्मजम् ।
करिष्ये वचनं मातरित्यूचे प्रणतः पदे ॥७१॥

अदूरादेव सोऽपश्यद्वकुलं हेमनिर्मितम् ।
नीलैर्मारकतैश्चैव वल्लपर्णं महाद्युतिम् ॥४॥
मौक्तिकैर्वज्रवैदूर्यैः पुष्पसंघैश्च वासितम् ।
मूलविक्षिप्तसद्रत्नवरासनपरिष्कृतम् ॥५॥
प्रभया परिणाहेन सर्वदृष्टिमनोहरम् ।
ददर्श तीरे तस्यास्तु वाल्मीकिर्मुनिपुंगवः ॥६॥
पश्यन्नेव यदा तस्थौ विस्मयस्तिमितेक्षणः ।
तदैव दृष्ट्वा संभ्रान्तो देवीं मूलासनस्थिताम् ॥७॥
वराभरणसंपूर्णां दिव्यकौशेयवाससम् ।
सुमैस्तीरसमुद्भूतैः शोभमानशिरोरुहाम् ॥८॥
यावकाञ्चितपादाब्जां वरनूपुरधारिणीम् ।
देवतां मुखमायातां स्वर्गादिव मनःप्रियाम् ॥९॥
पूर्वं क्षणाच्छून्यमेतत्कथं देव्या स्वलंकृतम् ।
इति संचिन्तयन्नेव तत्पार्श्वमगमन्मुनिः ॥१०॥
विनयाद्गौरवाच्चैव ननाम चरणौ पुनः ।
दृष्टिप्रसादितश्चायं वचनं त्विदमब्रवीत् ॥११॥
दृष्ट्वा तु भवतीं हृष्टं हृदयं मम वर्तते ।
अविज्ञाय पुरावृत्तं मातृभक्तिं च विन्दति ॥१२॥
अगोपनीयं चेद्वृत्तं वद तत्त्वेन भामिनि ।
वाल्मीकिरहमायातो मुनिः सांतानिकादिह ॥१३॥
रायवेणाहमादिष्टो वस्तव्यमिति भूतले ।
पापाचारानिमान्दृष्ट्वा परिद्यूनेन वै भृशम् ॥१४॥
गोदावर्या प्रेरितोऽहं कावेरीं द्रष्टुमागतः ।
सा किं कावेरजा देवी तत्त्वतः कथयस्व मे ॥१५॥
इति पृष्ट्वा तदा देवीं पूर्णचन्द्रनिभाननाम् ।
विनीतः पार्श्वमातिष्ठदुत्तरश्रवणोत्सुकः ॥१६॥

अवरुह्य यदा भूमिं गतो विस्मयमागतः ।
अदूरादागतं दृष्ट्वा व्याघ्रपादं पतञ्जलिम् ॥८५॥
सोऽभिपूज्य यथान्यायं ताभ्यां च प्रतिनन्दितः ।
चिदाकाशमयं ब्रह्म ताभ्यां सह ददर्श सः ॥८३॥
रूपवच्चापि तद्ब्रह्म सुनृत्यत्पार्श्वतः पुनः ।
ज्ञानदृष्टिविहीनानां लोचनद्वयतर्पकम् ॥८७॥
अरूपं रूपवद्ब्रह्म तदेकत्र समास्थितम् ।
न तृप्तिमुपलेभे स चिरं पश्यन्नपि स्वयम् ॥८८॥
अभिनन्द्य मुनी तौ तु त्वरितः कार्यगौरवात् ।
कावेरीमभ्ययाद्यत्र जाग्रत्स्वपिति माधवः ॥८९॥
अपश्यच्च भृशं तुष्टो रङ्गेशं सर्पशायिनम् ।
विभीषणाय रामेण प्रीतिदानमिवार्पितम् ॥९०॥
कवेरजां मुदा दृष्ट्वा वृतां चैत्ररथोपमैः ।
तटाद्यानैर्मनोरम्यैरुवास सुखितः क्षणम् ॥९१॥
पश्यन्नेव ययौ प्राचीं तीरमार्गेण विस्मितः ।
सर्वत्र हृदयाह्लादं संप्राप्य सुखमास सः ॥९२॥

॥ इति श्रीसुन्दरेशार्यविरचिते त्यागराजचरिते
'कावेरीदर्शनं' नाम तृतीयः सर्गः ॥

अथ चतुर्थः सर्गः ।

कावेरीं पुण्यसलिलां कदलीकाननावृताम् ।
पूगैश्च नालिकेरैश्च प्रोन्नतैस्तु समञ्चिताम् ॥१॥
तीरयोरुभयोश्चापि पुण्यक्षेत्रैः समावृताम् ।
ग्राहवद्भिर्महागर्तैः सर्वत्राप्युपशोभिताम् ॥२॥
दृष्टिरम्यां तीरवृक्षैः सारकैर्नन्दनस्य तु ।
पश्यन्नेव मुनिस्तत्र चचार भृशविस्मितः ॥३॥

अदूरादेव सोऽपश्यद्वकुलं हेमनिर्मितम् ।
नीलैर्मारकतैश्चैव कल्पपर्णं महाद्युतिम् ॥४॥
मौक्तिकैर्वज्रवैदूर्यैः पुष्पसंघैश्च वासितम् ।
मूलविक्षिप्तसद्रत्नवरासनपरिष्कृतम् ॥५॥
प्रभया परिणाहेन सर्वदृष्टिमनोहरम् ।
ददर्श तीरे तस्यास्तु वाल्मीकिर्मुनिपुंगवः ॥६॥
पश्यन्नेव यदा तस्थौ विस्मयस्तिमितेक्षणः ।
तदैव दृष्ट्वा संभ्रान्तो देवीं मूलासनस्थिताम् ॥७॥
वराभरणसंपूर्णां दिव्यकौशेयवाससम् ।
सुमैत्तीरसमुद्भूतैः शोभमानशिरोरुहाम् ॥८॥
यावकाञ्चितपादाब्जां वरनूपुरधारिणीम् ।
देवतां भुवमायातां स्वर्गादिव मनःप्रियाम् ॥९॥
पूर्वं क्षणाच्छून्यमेतत्कथं देव्या स्वलंकृतम् ।
इति संचिन्तयन्नेव तत्पार्श्वमगमन्मुनिः ॥१०॥
विनयाद्गौरवाच्चैव ननाम चरणौ पुनः ।
दृष्टिप्रसादितश्चायं वचनं त्विदमब्रवीत् ॥११॥
दृष्ट्वा तु भवतीं हृष्टं हृदयं मम वर्तते ।
अविज्ञाय पुरावृत्तं मातृभक्तिं च विन्दति ॥१२॥
अगोपनीयं चेद्वृत्तं वद तत्त्वेन भामिनि ।
वाल्मीकिरहमायातो मुनिः सांतानिकादिह ॥१३॥
राघवेणाहमादिष्टो वस्तव्यमिति भूतले ।
पापाचारानिमान्दृष्ट्वा परिद्यूनेन वै भृशम् ॥१४॥
गोदावर्या प्रेरितोऽहं कावेरीं द्रष्टुमागतः ।
सा किं कावेरजा देवी तत्त्वतः कथयस्व मे ॥१५॥
इति पृष्ट्वा तदा देवीं पूर्णचन्द्रनिभाननाम् ।
विनीतः पार्श्वमातिष्ठदुत्तरश्रवणोत्सुकः ॥१६॥

ततः सा देवता मन्दं वरासनसुखोपिता ।
सस्मितं च ससौहार्दमिदमूचे मुनिं तदा ॥१७॥
यामेव त्वं मृगयसे कावेरीं विद्धि तामिमाम् ।
आकाङ्क्षन्ती वसाम्यत्र तवैवागमनं मुने ॥१८॥
वयं तिस्रः सहोदर्यो गङ्गा गोदाऽप्यहं तथा ।
गङ्गा पात्युत्तरं भागं मध्यं गोदावरी पुनः ॥१९॥
अहं च दक्षिणं भागं रक्षामि सततं प्रियम् ।
यथा रक्षाम इत्येतच्छ्रुणोत्ववहितो मुनिः ॥२०॥
साधारणजलस्नानात्काय एवैति शुद्धताम् ।
पुण्यतीर्थे कृतात्स्नानान्मनः कायश्च शुध्यतः ॥२१॥
कालुष्येण विहीनं तु मनो निर्मलतां गतम् ।
वर्धयित्वा बुद्धिशक्तिं दुरूहेऽपि प्रवर्तते ॥२२॥
उद्योजयत्यनुदिनं पुरुषं शुभकर्मणि ।
शुभकर्मरता नित्यमश्नुवन्ति शुभं फलम् ॥२३॥
इत्थं पुराऽभवन्सर्वे तीर्थस्नानेन पावित्राः ।
शास्त्राण्यधीत्य सर्वाणि रचयन्तः शुभानि च ॥२४॥
अद्य सर्वे दुराचारास्तामसाश्चेन्द्रिये रताः ।
स्नानेनास्तां बुद्धिशक्तिं योजयन्ति कुकर्मसु ॥२५॥
स्वस्वेष्टमनुसृत्यैव शास्त्राण्यपि विधुन्वते ।
इन्द्रियाणां यथा तृप्तिः सा कृतिः शास्त्रसंमता ॥२६॥
मत्स्नानकुशलां बुद्धिं व्यर्थयन्ति दुरुक्तिभिः ।
पश्यन्ती तानहं दूये हतवत्सेव गौः स्वयम् ॥२७॥
ज्ञातं सर्वं मया पूर्वं राघवेण दयावता ।
भुवं प्रस्थापितोऽसीति भक्तियोगप्रकाशकः ॥२८॥
वल्मीकनाम्ना विख्यातं गच्छ क्षेत्रं पुरातनम् ।
पुण्यं पुण्यप्रदं चैव वृतं पुण्यैर्महात्मभिः ॥२९॥

त्यागेशः पूज्यते तत्र मघवा यं ददौ पुरा ।
मुचुकुन्दस्य राजर्षेः प्रीतिदानमनुत्तमम् ॥३०॥
तत्र रामब्रह्मनामा पत्न्या शान्ताभिधानया ।
राघवे त्यागराजे च भक्तिमान्वसति द्विजः ॥३१॥
गच्छ तं पितरं ब्रह्मन्महाभागं जितेन्द्रियम् ।
त्वया पुत्रेण तस्यापि तरन्तु पितरो भवम् ॥३२॥
इत्यादिष्टस्तु कावेर्या सादरं सप्रियं मुनिः ।
बहुमानाच्च तां पश्यन्नुवाच भृशतोषितः ॥३३॥
कृतकृत्योऽस्मि यन्मात्रा कावेर्या लोककान्तया ।
सानुग्रहा दृष्टिरस्मिन्दीने मयि निपातिता ॥३४॥
जानकीमिव वेद्मि त्वां रूपेण च गुणेन च ।
तस्या दया या भूतेषु सा दया तेऽपि भासते ॥३५॥
भवदङ्के जनिं लब्ध्वा भवदम्बुविवर्धितः ।
भवत्तीरे वसन्पुण्ये मर्तुकामोऽहमम्बिके ॥३६॥
साधुवृत्तिर्यथा गोघ्नं किं मां त्यजसि दूरतः ।
दयार्द्रेण कटाक्षेण पश्येमं पादमूलगम् ॥३७॥
इत्युक्त्वा च पुनः पादौ प्रणम्य मुनिपुंगवः ।
अश्रुधारापरिक्लिन्नवासास्तां समुदैक्षत ॥३८॥
कावेरजा भृशं तुष्टा सौशील्यविनयादिभिः ।
सवात्सल्यान्तरा तं तु सस्मितं प्राह तापसम् ॥३९॥
परित्यजेयं त्वां नाहं नापि मे त्वय्यनादरः ।
तत्क्षेत्रप्रेषणे वच्मि कारणं शृणु तत्त्वतः ॥४०॥
अपुत्रः पुत्रलाभाय रामब्रह्मा पुरा यतः ।
अपूजयत्त्यागराजं बहुसंवत्सरं मुने ॥४१॥
त्वामेव पुत्रं सद्वृत्तं प्रापयिष्यन्न ईश्वरः ।
कालं प्रतीक्षमाणोऽभूत्तपोयोगेन तर्पितः ॥४२॥

एकदोद्योजितः पत्न्या शान्तया त्वरमाणया ।
त्यागेशं दैववशगो निन्दास्तुतिभिरार्चयत् ॥४३॥
कोपितस्तस्य वाक्येन त्यागेशस्त्यागवानपि ।
प्रादात्पुत्रं दीर्घकोपं मूढं पण्डितमानिनम् ॥४४॥
स दृष्ट्वा गर्भसंपन्नां प्रेयसीं रुचिराननाम् ।
मुदाऽन्वितः स्तुतिं चक्रे त्यागेशं स्वेष्टपूरणात् ॥४५॥
कालेन तनयो जातो जप्येश इति नामतः ।
अकार्यकरणे व्यग्रः कोपनो बहुमत्सरः ॥४६॥
सुतस्य दुर्गुणानेतान्स वीक्ष्य भृशविह्वलः ।
चिन्तयन्दुष्कृतं पूर्वं पश्चात्तापमवाप सः ॥४७॥
तमेव करुणासिन्धुं त्यागेशं भक्तवत्सलम् ।
करणत्रितयेनापि सपत्नीकः समार्चयत् ॥४८॥
ऐक्ष्वाकतपसो दातुं फलं रामो यथा गतः ।
गन्तुमर्हसि पुत्रत्वं तथैवास्य महात्मनः ॥४९॥
वसंस्तत्राचिरं कालं त्वं गुणैर्विनयादिभिः ।
मोदयन्पितरौ पुण्यौ तैः सहात्रागमिष्यसि ॥५०॥
एतत्पञ्चनदं क्षेत्रं ब्रह्मणाऽपि सुपूजितम् ।
वसन्नत्र चिरं कालं लप्स्यसे भूतिमुत्तमाम् ॥५१॥
नारदो राघवश्चैव द्रक्ष्यतस्त्वामिहागतम् ।
समाधिमत्र संप्राप्य शाश्वतीं कीर्तिमाप्नुहि ॥५२॥
इति प्रतिसमादिश्य कावेर्यन्तर्दधे तदा ।
पश्यत्येव मुनौ तस्मिन्विस्मयास्तिमितेक्षणे ॥५३॥
विमानेनार्कवर्णेन प्राचीं गत्वा दिशं तदा ।
ददर्श तत्क्षेत्रवर्यं त्यागेशायतनं च सः ॥५४॥
स्वतः पूतं तु तत्क्षेत्रं कावेर्युपनदीजलैः ।
त्यागेशसमधिष्ठानात्ततः पूततमं पुनः ॥५५॥

अवरुह्य विमानात्स शान्तचित्तस्तदा मुनिः ।
मेने कृतार्थमात्मानं तत्क्षेत्रस्य च दर्शनात् ॥५६॥
विमानं कामगं दृष्ट्वा किंचित्संभ्रान्तचेतनः ।
नियच्छन्नेत्रजं वारि प्रोवाच मुनिपुंगवः ॥५७॥
गच्छ सांतानिकं पुण्यं राघवाय निवेदय ।
यद्दृष्टं भुवमासाद्य चरता गहने पथि ॥५८॥
इदं च मम वक्तव्यं वचनं दीनजल्पितम् ।
प्रणामशतसंयुक्तं स्मारयन्गादितं प्रभोः ॥५९॥
अनुल्लङ्घ्य तवाज्ञां तु भुवमद्यागतं मया ।
प्रस्थापितो यदर्थं च यतिष्ये नियतात्मवान् ॥६०॥
यदि तेऽनुग्रहमयी दृष्टिर्मयि निपातिता ।
पारं यायां भवाम्भोधेरन्यथा न कथंचन ॥६१॥
यदुक्तं भवता पूर्वमाहरिष्येऽचिरादिति ।
स्मर्तव्यं तत्कृतज्ञेन भवता स्मारये पुनः ॥६२॥
इत्युक्त्वा तु विमानं तं प्रदक्षिणशतैः स्तुतम् ।
अनुमेने दिवं गन्तुं सस्पृहं समुदीक्ष्य च ॥६३॥
क्षणादेव विमानं तदादित्यद्वयमण्डितम् ।
नभस्तलं कुर्वदेव चिरादन्तर्दधे पुनः ॥६४॥
विमानविरहक्लान्तो मन्दं मन्दं चरन्महीम् ।
कमलालयविख्यातां कमलालयशोभिनीम् ॥६५॥
कमलाम्बाजन्मभुवं कमलोद्भवविश्रुताम् ।
पुण्योदकां समासाद्य निर्वृतश्चाभवन्मुनिः ॥६६॥
स्नात्वा च विधिवज्जप्त्वा जप्यं मन्त्रविदुत्तमः ।
अस्ताचलशिरोरत्नं ददर्श दिनमणिर्यदा ॥६७॥
दीपैः शतसहस्रैश्च दीपितं दृष्टिहारिभिः ।
त्यागेशं द्रष्टुमुद्युक्तः प्रययौ चालयं मुदा ॥६८॥

सायंतनाराधनाय जनौघः संकुलोऽभवत् ।
वाल्मीकिरपि तान्दृष्ट्वा भक्तिपूतान्मुमोद ह ॥६९॥
यदाऽर्धमण्डपं गत्वा देवलोकादिहागतम् ।
पश्यन्भक्त्या त्यागराजं ध्यानयोगमुपागतः ॥७०॥
तदैव तच्छरीरं तु तिरोभूतं शिवाज्ञया ।
अनुप्रवेशितं सूक्ष्मरूपेणान्ने निवेदिते ॥७१॥
रामब्रह्मा सपत्नीको यथावदभिगत्य च ।
पूजान्ते स्तोत्रमालाभिस्त्यागेशं तं समार्चयत् ॥७२॥
निवेदनेन पूतं तदन्नं दत्तं द्विजन्मना ।
जग्राह न क्षुधाशान्त्यै प्रसाद इति केवलम् ॥७३॥
पाणिभ्यां स गृहीत्वा तद्भक्त्या च विनयेन च ।
प्रेयस्यै प्रददौ सा च तुष्टा जग्राह सादरम् ॥७४॥
गृहीतमात्रेऽस्या अङ्गे क्षणं कम्पो व्यजायत ।
निर्वृतं च मनस्तूर्णं क्षेमाशंसि तदा ह्यभूत् ॥७५॥
पुलकश्च समुद्भूतो वामं नेत्रं तदाऽस्फुरत् ।
रामब्रह्मणश्चापि तोषयुक्तं तु तत्क्षणात् ॥७६॥
अचिरादेव कालात्तु गर्भचिह्नानि वीक्ष्य तौ ।
त्यागेशस्य प्रसादं तं मन्यानौ मुदमूहतुः ॥७७॥
संपूर्णे दशमे मासि शिशुश्च समजायत ।
उदयाचलमारूढे प्रसन्ने च दिवाकरे ॥७८॥
अविह्वलशरीरां तां सुलग्ने जनितं सुतम् ।
रामब्रह्मा समुद्वीक्ष्य बभूव भृशनन्दितः ॥७९॥
प्रदक्षिणार्चिर्जज्वाल जातवेदाः शुभप्रदः ।
मारुतश्च सुखस्पर्शो मल्लिकासुरभिर्ववौ ॥८०॥
यथावज्जातकर्माणि चक्रे स त्वरयाऽन्वितः ।
दानानि च यथाशक्ति रामब्रह्मा तदाऽकरोत् ॥८१॥

वसूधे च शिशुः सम्यक्प्रतिपच्चन्द्रदर्शनः ।
त्यागराजप्रसादेन लब्धस्तन्नामकोऽभवत् ॥८२॥
प्रीणयन्स्वगुणैः रम्यैः पितरौ भृशतोषितौ ।
अनयत्पञ्च वर्षाणि बालक्रीडासु सक्तधीः ॥८३॥
पाषाणमेकमाहृत्य वदन्विष्णुमुमापतिम् ।
कलशैर्जलमानीय स्नापयत्यनिशं मुदा ॥८४॥
हस्तलब्धैस्तु कुसुमैर्निर्गन्धैरपि सत्वरः ।
आदरादार्चयद्बालो यत्किंचिच्च वदन्वचः ॥८५॥
पुरातनं वा पक्वान्नं तदभावेऽपि तण्डुलान् ।
न्यवेदयत्तदा बालो वासनाबलचोदितः ॥८६॥
स्तम्भताडनसंनद्धं बालं हस्तशलाकया ।
सर्वव्यापीश्वरः सोऽयमित्युक्त्वा स न्यवारयत् ॥८७॥
भक्तिमङ्कुरितां दृष्ट्वा बालस्यास्य महात्मनः ।
संगतास्तोषयामासुराशीर्वचननन्दनैः ॥८८॥
पिताऽपि दृष्ट्वा व्यत्यासं तथा ज्येष्ठकनिष्ठयोः ।
गुणकर्मसु विद्यासु कनिष्ठेऽरमतात्मजे । ८९॥
वसूधे त्यागराजोऽपि पितरौ सुहृदस्तथा ।
तोषयन्बान्धवांश्चापि स्वयं तुष्टो व्यराजत ॥९०॥

॥ इति श्रीसुन्दरेशार्यविरचिते श्रीमत्त्यागराजचरिते "त्यागराजजननं" नाम चतुर्थः सर्गः ॥

अथ पञ्चमः सर्गः ।

प्राप्ते तु पञ्चमे वर्षे रामब्रह्मोपदिष्टवान् ।
अष्टाक्षरं महामन्त्रं विद्यानां प्रथमं स्वयम् ॥१॥
क्रमेण भाषां गैर्वाणीमुपदिश्य मुदाऽन्वितः ।
गर्भाष्टमोपनीतं तं श्रुतीरग्राहयत्सुधीः ॥२॥

त्यागराजोऽपि तेजस्वी भक्त्याऽग्निसमुपासकः ।
अर्घ्येष्ट साङ्गान्वेदांश्च मिथाचर्येण वर्तयन् ॥३॥
अग्रे जातस्तु जप्येशो वृक्षाग्रेषु स मन्दधीः ।
विजहार मदोन्मत्तो वानरैः सह कौतुकात् ॥४॥
कण्ठे रज्जुं निधध्यायं लम्बजिह्वाननं मुदा ।
ग्रामैकसरिणं मूढः कर्षन्याति स्म गर्वितः ॥५॥
बालानताडयद्दीनानबन्धून्बलदर्पितः ।
तिरश्चकुः कुकर्माणं जप्येशं पुरवासिनः ।५॥
रामब्रह्मा महात्मा तं कर्तुं सन्मार्गवर्तिनम् ।
कृच्छ्रात्प्रयतमानोऽपि नाशकत्पापनिश्चयम् ॥७॥
जप्येशदुष्कृतिप्राप्तकृच्छ्रैः पौरैः पिता तदा ।
बहिष्कृतः कुटुम्बेन मंलापाहारवर्जितः ॥८॥
उञ्छवृत्तिमुपादायापोषयद्यः कुटुम्बकम् ।
सर्वैश्च स परित्यक्तः कृच्छ्रात्कालमनीनयत् ।९॥
जप्येशस्यापि दुर्वृत्तं न शान्तिमुपगच्छति ।
स्थलस्याग्यस्य गमनाद्गतिमन्यां न वेद सः ॥१०॥
करस्थमुक्तेर्वल्मीकाच्च गन्तुमपि चोत्सुकः ।
शान्तया च समालोच्य प्रस्थातुं स मनो दधे ॥११॥
सपुत्रजायस्त्यागेशं भक्तबन्धुमनामयम् ।
नत्वा स्तुत्वा भृशं दीनः प्रतीचीं दिशमभ्यगात् ॥१२॥
तज्ज्ञानगरमासाद्य बृहदीश्वरशोभितम् ।
तुलजाख्यमहाराजवर्येण परिपालितम् ॥१३॥
दिनानि कानिचिन्नीत्वा पश्यन्वै देवताः शुभाः ।
अर्थस्यैवोन्नतिं दृष्ट्वा कौबेरीं प्रययौ दिशम् ॥१४॥
क्रोशार्धगमनादेव पुण्यघातैस्तु निर्वृतः ।
मोक्षराज्यं समानेतुं दूतैरिव समागतैः ॥१५॥

न ग्लानिमुपगच्छन्तो जग्मुस्ते भृशतोषिताः ।
अदूरादेव तेऽपश्यन्कावेरीं हृदयंगमाम् ॥१६॥
अगाधसलिलां रम्यां सत्त्वैश्च बहुभिर्वृताम् ।
तुलजावनिपालेन्द्रदानशौण्डत्वदर्शकैः ॥१७॥
पञ्चापगानां नाथेन परिशोभितपार्श्वकाम् ।
वेदाध्ययनशीलैश्च भूसुरैर्ब्रह्मचारिभिः ॥१८॥
दुरूहानपि शास्त्रार्थान्बोधयद्भिः परस्परम् ।
गानशास्त्ररतै रक्तकण्ठैश्च बहु शोभिताम् ॥१९॥
प्रीतिमीयुश्च ते दृष्ट्वा पुण्यतोयां कवेरजाम् ।
उत्तरं तीरमासाद्य सर्वे ते न्यवसन्सुखम् ॥२०॥
रामब्रह्मा रमेशस्य गुणान्गायंश्च सुस्वरम् ।
उञ्छवृत्त्या समानीतैर्वर्तयामास तण्डुलैः ॥२१॥
नवागतं शान्तचित्तं महर्षिसमतेजसम् ।
पौराः सर्वे प्रीतिमापुः प्राप्य बन्धुमिव स्वकम् ॥२२॥
पञ्चषड्गेहगमनात्प्राप्यासौ भूरितण्डुलान् ।
कुटुम्बं पोषयन्नास्त तर्पयन्ब्राह्मणानपि ॥२३॥
यथालाभं सुसंतुष्टः प्रशान्तात्मा जनप्रियः ।
पूजयन्राघवं देवमनयत्कालमादृतः ॥२४॥
जप्येशस्य शमं यान्ति चेष्टतानि स बाल्यवत् ।
यौवनेन सहैवास्य ववृधे विषयस्पृहा ॥२५॥
परेषां वीक्ष्य रम्याणि गृहाणि ललनाः शुभाः ।
आज्ञाकरांस्तथा वाहान्मात्सर्येणाकुलोऽभवत् ॥२६॥
तातं मातरि वा तस्य कनिष्ठे सोदरेऽपि वा ।
न रतिर्बहुमानो वा स्मरतो हीनवृत्तिताम् ॥२७॥
अनुभोक्तुं महार्हाणि स्पृहाऽभूत्तस्य दुस्त्यजा ।
प्रारब्धकर्म तु पुनराशां तस्य स्म कृन्तति ॥२८॥

अनाप्तकामपूर्तिः स कोपमात्सर्यदूषितः ।
दुरहंकारमूढात्माऽनीनयत्कालमार्तिमान् ॥२९॥
त्यागराजं सुतं दृष्ट्वा वेदशास्त्रेषु निष्ठितम् ।
विनीतं साधुशीलं च पितरौ मुदमापतुः ॥३०॥
अधीतसाङ्गवेदं तं सर्वशास्त्रार्थकोविदम् ।
आजन्मसिद्धज्ञानेन गानशास्त्रेषु शोभितम् ॥३१॥
स्थिरायिसुगमस्वच्छसुखशारीरसंयुतम् ।
दृढबुद्धिं लये चापि श्रद्दधानं जितेन्द्रियम् ॥३२॥
सोण्डिवेङ्कटरामार्यो दृष्ट्वा सुप्रीतमानसः ।
गानशास्त्रेषु विख्यातः शिष्यत्वेनाग्रहीत्स्वयम् ॥३३॥
अचिरेणैव कालेनाप्सरसं भूगतामिव ।
कमलाम्बाभिधां कन्यामुपयेमे गुणोज्ज्वलाम् ॥३४॥
जप्येशोऽपि स्वयं गृह्णन्स्वगुणस्यानुरूपिणीम् ।
कान्तां कामवशो दक्षस्तुतोष मदविह्वलः ॥३५॥
विप्रेभ्यस्तु तदा राजा प्रादाद्देहशतं मुदा ।
ग्राहितः सोऽपि तेष्वेकं कृच्छ्रात्तद्गुणतोषिभिः ॥३६॥
त्यागराजेन पुत्रेण स्नुषया भार्ययाऽपि च ।
वसन्सुरुचिरं कालं रामब्रह्माऽन्वगादिवम् ॥३७॥
शान्ता च सह पुत्राभ्यां भर्तुर्विरहविह्वला ।
दूयमाना भृशं साध्वी कृच्छ्रात्कालमनीनयत् ॥३८॥
अदीर्घेणैव कालेन शान्ता च त्रिदिवं ययौ ।
भर्तुर्विरहसंजातासह्यवेदनया सती ॥३९॥
जप्येशस्त्यागराजश्च पितुर्मरणजां व्यथाम् ।
व्यपोहन्तौ च मात्राऽपि रहितौ भृशविह्वलौ ॥४०॥
त्यागराजोऽचिरादेव वैराग्येण च विद्यया ।
लोकस्वभावज्ञानेन शान्तचित्तो बभूव ह ॥४१॥

पित्रोर्मरणजं दुःखं नियञ्छन्नात्मनाऽपि सः ।
न शशाक तु तत्सोढुं जप्येशाज्ञानसंभवम् ॥४२॥
स विव्यथे त्यागराजो ज्येष्ठस्य विषमैर्गुणैः ।
उपदेशाद्धर्मानैराज्यसेकैस्तु वह्निवत् ॥४३॥
विषयेष्वेव संसक्तं दुःशीलं चेन्द्रिये रतम् ।
अनिवार्यं च तं दृष्ट्वा विभक्तं तं व्यधात्सुधीः ॥४४॥
गृहकोणं तथा रामं परिवारैः समावृतम् ।
परंपरागतं प्राप्य त्यागराजो मुमोद च ॥४५॥
स्वाकार्यकरणे विघ्नमाचरन्तं तु सोदरम् ।
परित्यज्य सपत्नीको जप्येशोऽपि ननन्द सः ॥४६॥
त्यागराजस्तु धर्मात्मा षोडशे वयसि स्थितः ।
संप्राप्तयौवनोऽप्यार्ये वर्त्मन्येव स्थिरोऽभवत् ॥४७॥
प्राप्याल्पं पैतृकं द्रव्यं गृहकोणे वसन्नपि ।
पैतामहानां लाभेन विग्रहाणां मुमोद सः ॥४८॥
ब्राह्मे मुहूर्ते चोत्थाय कावेर्याः सलिले शुचिः ।
मन्त्रवन्नियतः स्नात्वा राघवं पर्युपास्त सः ॥४९॥
संपूज्य विधिवद्रामरामाभ्यां दृढव्रतः ।
अपराह्णे तु शास्त्राणि गानादीन्यपठत्सुधीः ॥५०॥
उपास्य संध्यां सायाह्णे दृष्ट्वा पञ्चनदेश्वरम् ।
अलंकृतस्य रामस्य सांनिध्ये गायति स्म सः ॥५१॥
संगीतशास्त्रनैपुण्यं शारीरसुखसंपदम् ।
श्रुत्वा तु विस्मिताः सर्वे संघशस्तत्र संययुः ॥५२॥
सायंसंध्यावसाने तु नूतनाश्च शताधिकाः ।
संगताः परमप्रीताः श्रोतुं तद्गानमुत्तमम् ॥५३॥
दिने दिने तु षष्ठ्ये संघस्तत्पुरवासिनाम् ।
गातुं वितर्दिकायां स यन्त्रितः सकुतूहलैः ॥५४॥

त्यागराजश्च संतुष्टो गानं स्वं श्रोतुमागतान् ।
तर्पयामास मधुरैर्गीतैः शास्त्रानुगामिभिः ॥५५॥
अचिरेणैव कालेन ग्रामेषु नगरेषु च ।
व्याप्ता तत्कीर्त्तिरमला तांश्चानीनयदत्र तु ॥५६॥
ग्रामीणान्नागरान्दृष्ट्वा स्वगानश्रवणोत्सुकान् ।
उपचर्य यथाशक्ति मुदितस्ताननन्दयत् ॥५७॥
संपूजयन्रामचन्द्रं गीतैः स्वैस्तोषयन्पुरम् ।
विस्तारयन्कीर्त्तिमालामुवास सह भार्यया ॥८८॥
सोण्डिवेङ्कटरामोऽपि गुरुस्तद्दानविस्मितः ।
आत्मोत्कृष्टं च तं मत्वा साधुशीलस्तुतोष ह ॥५९॥
अध्यापनं च तत्याज त्यागेशस्य तदा गुरुः ।
शिष्यानध्यापयामास त्यागराजेन चादरात् ॥६०॥
एवं गतेषु कालेषु परं वर्षद्वयात्पुनः ।
स्नात्वा हुताग्निः श्रीराममास्ते संपूजयन्मुदा ॥६१॥
विमाने चित्रसंयुक्ते मुक्तामणिविचित्रिते ।
स्वासने राघवं न्यस्य परिवारसमावृतम् ॥६२॥
कावेरीपुण्यतोयेन स्वानीतेनाभिषिच्य च ।
सुगन्धिकुसुमैश्चैव भूषयन्वर्तते स्म सः ॥६३॥
पार्श्वद्वये नवा दीपा लम्बमानास्तु पञ्चपाः ।
प्रभया स्पृहणीयाश्च शोभयन्ति स्म मण्डपम् ॥६४॥
रामादयस्तु ते शिष्याः शुश्रूषन्ते स्म सादरम् ।
रचयन्तश्च मालास्ते चन्दनानि विधाय च ॥६५॥
तदा ससंभ्रमं द्वारस्थः शिष्योऽन्तः समुपागतः ।
आवेदयामास नतः प्राप्तं ब्राह्मणमुत्तमम् ॥६६॥
त्यागराजस्तु संहृष्टो बहिरेत्य सकौतुकम् ।
अपश्यद्भूसुरं कंचिन्महर्षिसमतेजसम् ॥६७॥

ऊर्ध्वपुण्ड्रं दधानं च विशाले फालपट्टके ।
तुलसीकाष्ठमालाश्च धारयन्तं गले शुभाः ॥६८॥
अक्षसूत्रं करे धृत्वा स्वाङ्गुष्ठाग्रनिपीडितम् ।
ददर्श मूर्तिमन्तं तं रामभक्तिमिवागतम् ॥६९॥
दृष्ट्वा सुप्रीतहृदयो नत्वा च विनयान्वितः ।
अन्तस्तमानिनायासौ पूजयन्वचनैः शुभैः ॥७०॥
स्वासने समुपावेश्य पाद्याचमनतोषितम् ।
विनीतः पार्श्वमातिष्ठंस्त्यागराजोऽब्रवीदिदम् ॥७१॥
कृतकृत्योऽस्म्यहं ब्रह्मन्भवन्तं प्राप्य मद्गृहे ।
समागमस्तु साधूनां महापुण्यफलोद्भवः ॥७२॥
मन्ये भवन्तं श्रीरामो मदनुग्रहकारणात् ।
प्रैषयद्दयया नूनमन्यथा संभवः कथम् ॥७३॥
अपि श्रान्तो न भगवन्दूरमार्गपरिक्रमात् ।
किमर्थमागतश्चात्र किं वाऽद्य करवाण्यहम् ॥७४॥
एते च शिष्याः संयत्ता भवच्छुश्रूषणे स्वयम् ।
विधेयश्चास्मि भवत आज्ञापय यथेप्सितम् ॥७५॥
इत्युक्तस्त्यागराजेन प्रीत्या च विनयेन च ।
बभाषे मधुरं वाक्यं ब्राह्मणः स मृदुस्मितः ॥७६॥
त्यागराज महाभाग रामब्रह्मसुते त्वयि ।
सौशील्यं च विनीतिश्च नेदमाश्चर्यकारणम् ॥७७॥
त्वं तु पौत्रो महार्हस्य गिरिराजकवेस्तु यः ।
भक्तिकीर्तनतुष्टेन पाजिराजेन पूजितः ॥७८॥
तुष्यामि च त्वया विद्वञ्शास्त्रनिश्चितबुद्धिना ।
भक्त्या त्वनर्घया रामे पूर्वपुण्येन चाप्तया ॥७९॥
श्रुत्वा त्वदीयं पाण्डित्यं शास्त्रेषु निखिलेष्वपि ।
तथा गान्धर्ववेदे च दुरापमितरैः पुनः ॥८०॥

शास्त्रानुसारिकर्माणि सौशील्यं सत्यसंधताम् ।
भक्तिं चानुपमां रामे त्वां दिदृक्षुरिहागतः ॥८१॥
काञ्चीपुरादागतोऽस्मि वरदेशविभूषितात् ।
न किंचिन्मम कर्तव्यं न मे वाञ्छाऽस्ति वस्तुषु ॥८२॥
कथं पूजयसे रामं केन मन्त्रेण वा पुनः ।
मन्त्ररूपं मन्त्रगम्यं मन्त्राराध्यमथादरात् ।८३॥
इति पृष्टो ब्राह्मणेन सुरर्षिसमतेजसा ।
उवाच वचनं मन्दं त्यागेशः सत्यसंगरः ॥८४॥
गायत्र्येव मया प्राप्ता सकाशाज्जनकस्य मे ।
जपामि सततं तां वै न जाने त्वितरत्पुनः ॥८५॥
प्रयच्छतु महाभागो यद्यन्यो मन्त्र उत्तमः ।
यं जपन्नियतो नित्यं श्रेयः परमवाप्नुयाम् ॥८६॥
येन प्रीतिमवाप्नोति राघवः सहलक्ष्मणः ।
तं ममाचक्ष्व मन्त्रं तु पुण्यं श्रद्धान्वितस्य मे ।८७॥
वृणे भवन्तमाचार्यं शिष्योऽहं शिष्यवत्सल ।
इत्युक्त्वा प्रणनामासौ पादयोर्भक्तिसंयुतः ॥८८॥
संप्रेषितस्तु श्रीशेन काञ्चीपुरनिवासिना ।
ब्राह्मणो भृशसंतुष्टस्त्यागेशविनयेक्षणात् ।८९॥
अथोवाच मुदा युक्तस्त्यागेशं पुरतः स्थितम् ।
भद्रमस्तु महाभाग मन्त्रं दास्याम्यनुत्तमम् ॥९०॥
यं शिवायै पुरा तुष्टः प्रेयस्यै शंकरः प्रभुः ।
रहस्युपादिशन्मन्त्रं येन सा च शुभान्विता । ९१॥
तारयत्युपदिश्यैतं महापापानपीश्वरः ।
काशीक्षेत्रगतान्सर्वांस्तं गृहाण ददव्रत ॥९२॥
इत्युक्त्वा श्रोत्रयोस्तस्य मन्त्रं पूतमुपादिशत् ।
तारकं सर्वपापेभ्यस्तारकं नाम नामतः ॥९३॥

उपदिष्टो ब्राह्मणेन सुप्रीतहृदयेन च ।
दृष्ट्वैव राघवं साक्षात्त्यागेशो मुदमावहत् ।९४॥
पुलकाञ्चितसर्वाङ्गः शीताश्रुभृतलोचनः ।
त्रिस्तं प्रदक्षिणीकृत्य ववन्दे नियतो गुरुम् ॥९५॥
अथोवाच गुरुं दीप्तं ब्राह्मणं पुरतः स्थितम् ।
ब्रह्माणमिव तेजोभिर्ज्वलन्तं मुदितस्तदा ॥९६॥
धन्योऽस्मि भूसुरश्रेष्ठ स्वयमागत्य यच्च मे ।
पथिकस्येव पाथेयं वितीर्णं तारकं विभो ॥९७॥
महोपकारकर्तुस्ते किं करिष्येऽल्पसंचयः ।
प्रणामेनाद्य संतुष्टस्त्वनुगृह्णीष्व मां पुनः ॥९८॥
ततः प्रोवाच विप्रेन्द्रस्त्यागराजं तपोधनम् ।
मा विषादं गमः शिष्य गुरुदक्षिणयाऽप्यलम् ॥९९॥
नाहं स्वर्णचयैर्नापि तुष्येयं राज्यदानतः ।
यथा गुरुवचः कर्तुः श्रद्धया नियमेन च ॥१००॥
उपदिष्टं महामन्त्रं जप नित्यमतन्द्रितः ।
पञ्चविंशतिसंयुक्तशतसाहस्रकं स्वयम् ॥१०१॥
इत्थं जप महाभाग कोटीः पण्णवतिं पुनः ।
ततो द्रक्ष्यसि साश्चर्यं तत्फलं भक्तपुंगव ॥१०२॥
इत्यादिश्य प्रियं शिष्यं प्रतस्थे भूसुरस्तदा ।
याचितोऽप्यनुरागेण न मोक्तुं स मनो दधे ॥१०३॥
गत्वा सुदीर्घं ते श्रान्ता अनवाप्य मनोरथम् ।
अदृश्यं भूसुरं ज्ञात्वा न्यवर्तन्त समाकुलाः ॥१०४॥
भूसुरस्य स्वरूपेण स्वयं रामः समागतः ।
अन्यथा कथमस्मासु पश्यत्स्वन्तर्दधे स्वयम् ॥१०५॥
अहो तेजश्च कारुण्यं सूनृतप्रियवक्तृता ।
अहो जन्तुषु वात्सल्यमित्यूचुर्विस्मिता जनाः ॥१०६॥

त्यागराजः स्वयं गत्वा सुदीर्घं घर्मतापितः ।
समाहूय चिरायोच्चैरनवाप्तोत्तरोऽगमत् ॥१०७॥
प्रत्यागम्य गृहं दीनो गुरोर्विरहविह्वलः ।
मन्त्रोपदेशतुष्टोऽपि विषसाद महामतिः ॥१०८॥
आश्वासितः सुहृद्भिश्च शिष्यैश्च विनयान्वितैः ।
उपदिष्टं महामन्त्रं जजाप प्रभुसंनिधौ ॥१०९॥
आवर्तयद्वशी नित्यं नित्यं यथोक्तं च पुराविदा ।
पञ्चविंशतिसाहस्रं शतसाहस्रसंयुतम् ॥११०॥
आराधयन्रामचन्द्रं शिष्यानध्यापयन्नपि ।
जपंश्च तारकं मन्त्रं गमयामास वत्सरान् ॥१११॥

इति श्रीसुन्दरेशार्यविरचिते श्रीत्यागराजचरिते
"मन्त्रोपदेशो" नाम पञ्चम सर्गः ॥

अथ षष्ठः सर्गः ।

जजाप स महातेजास्त्यागेशः श्रद्धयाऽन्वितः ।
एकविंशतिमब्दान्वै मन्त्रं तं तारकं स्वयम् ॥१॥
परिचर्य रघूत्तंसमामध्याह्नं दृढव्रतः ।
अपराह्णे च नियतो मन्त्रमावर्तयद्वशी ॥२॥
जपता तेन संप्राप्तं तेजश्च सुदुरासदम् ।
निग्रहानुग्रहे शक्तिर्या लभ्या योगिभिर्वरैः ॥३॥
योगीव शुशुभे दीप्तस्त्यक्तसर्वपरिग्रहः ।
पश्यंश्च निखिलाँल्लोकान्रघूत्तममयान्मुदा ॥४॥
निरवद्यं सुखं तस्मिन्ननुभूय जपे सुधीः ।
निशास्वपि च शान्तासु शान्तचित्तो जजाप तम् ॥५॥
एवं जपपरो नित्यं राघवं मनसीडयन् ।
ध्यानयोगमुपागत्य स्थाणुवन्न चचाल सः ॥६॥

ब्राह्मेषु च मुहूर्तेषु बोधितः शिष्यपुंगवैः ।
कावेरीमन्वगात्तुष्टो रामनाममनुं स्मरन् ॥७॥
स्नात्वा हुताग्निस्तं जप्त्वा यथाकालं यथाविधि ।
पूजां रामस्य विधिवत्कृत्वा कालमनीनयत् ॥८॥
एकदा संगवे काले संतुष्टहृदयः स्वयम् ।
पुरातनानि पुष्पाणि व्यपाकर्तुं कृतोद्यमः ॥९॥
विमानस्य पुरः स्थित्वा यावत्पश्यति राघवम् ।
लावण्यस्य परीवाहं सद्यो जातं ददर्श सः ॥१०॥
आश्चर्यवदयश्यच्च विस्मयस्तिमितेक्षणः ।
अदृष्टपूर्वां तां शोभां पश्याम्यद्य कथं न्वहम् ॥११॥
अहो रूपस्य माधुर्यं सभ्रातू राघवस्य मे ।
दृष्टिं च हृदयं चाद्य विवशीकृत्य कर्षति ॥१२॥
विमानमपि नूत्नं मे प्रतिभाति किमद्य च ।
कथं ज्वलति पक्ष्माणि दिधक्षदिव तेजसा ॥१३॥
छात्राश्च क्व गतास्त्वद्य परिचर्यापरायणाः ।
सर्वमाश्चर्यभूतं मे मनश्च परितुष्यति ॥१४॥
इत्येवं चिन्तयन्धीमान्कौतुकाक्रान्तमानसः ।
पश्यन्नेव रघूत्तंसं बभूवानिमिषेक्षणः ॥१५॥
ससंभ्रमस्तदाऽपश्यत्सद्यो जातं मनोहरम् ।
नीलकान्तिप्रवाहं स व्याप्तं सर्वत्र भूरिशः ॥१६॥
कान्तिवन्नीलचन्द्रस्य गृहान्तरुदितां प्रभाम् ।
अदृष्टपूर्वां संप्रेक्ष्य स विस्मयमुपागमत् । १७॥
क्षणादपश्यत्यागेशो बालकद्वितयं तदा ।
परिणामेन रूपेण हरन्तमिव चक्षुषी ॥१८॥
काकपक्षेषु विन्यस्तमन्दारसुमशोभितम् ।
फालविन्यस्तकस्तूरीतिलकेन सुभूषितम् ॥१९॥

सुष्णद्भ्यां चक्षुषी दीप्तकुण्डलाभ्यामलंकृतम् ।
मुखकान्तिसमापूतराकाहरिणलाञ्छनम् ॥२०॥
नवमौक्तिकवैदूर्यमालाभिरुपशोभितम् ।
धारयन्तं च वलयान्कटकान्यङ्गदानि च ॥२१॥
परार्घ्यचन्दनेनाक्तं महार्घवसनान्वितम् ।
नूपुररनुरूपैश्च भूषितं चरणे पुनः ॥२२॥
वयसा द्वादशं दिव्यतेजोयुक्तमरिंदमम् ।
हरन्तं दृष्टिचित्तानि कंदर्पसमविग्रहम् ॥२३॥
वामे भुजंगभोगाभे हस्ते कृत्वा शरासनम् ।
बाणं दक्षिणहस्तेन धरन्तमरिमर्दनम् ॥२४॥
मन्दस्मेरमुखेनापि दृष्ट्या कारुण्यपूर्णया ।
स्वस्याभिमुखमास्थाय परानुग्रहकारिणम् ॥२५॥
चिरं पश्यन्नपि श्रीमान्नेत्रैरनिमिषैरिव ।
न किंचिज्ज्ञातवांस्तत्र स्तब्ध एव व्यतिष्ठत ॥२६॥
तौ कुमारावपि स्तब्धौ ममपश्यन्तावतिष्ठताम् ।
नीलकार्तस्वराभाभिः पूरयन्तौ चतुर्दिशः ॥२७॥
बोधं प्राप्य तु विज्ञाय रामं लक्ष्मणमागतम् ।
संभ्रमेण यदा नन्तुं संयत्तस्तौ तिरोहितौ ॥२८॥
तिरोभूते तु कान्त्योघे तिमिरेण च संवृते ।
उन्मथ्य संभ्रमात्पश्यंस्त्यागेशो मोहमाययौ ॥२९॥
गाढान्धकारमग्नं तद्वीक्ष्य गेहं भृशाकुलः ।
राघवं लक्ष्मणं चैव तत्र तत्र स मार्गति ॥३०॥
गृहाङ्गणेषु मुख्येषु तथैवान्तर्गृहेषु च ।
गृहाद्बहिश्च पर्यन्ते विह्वलोऽमार्गयत्प्रभुम् ॥३१॥
त्वरमाणश्च वीथीषु चाह्वयन्रामलक्ष्मणौ ।
अदृष्ट्वा पुनरायासीद्विह्वलः साश्रुलोचनः ॥३२॥

गृहं पुनः प्रविश्याशु मार्गित्वा राघवं प्रभुम् ।
अपश्यंस्तत्र दीनात्माऽद्रवदन्यत्र सादरम् ॥३३॥
स्थातव्यमत्र रामेण लक्ष्मणेनेति च ब्रुवन् ।
तत्र तत्र चरन्नाममनासाद्य न्यवर्तत ॥३४॥
शिष्यान्पप्रच्छ वीरो मे क्व रामो लक्ष्मणो विभुः ।
तावत्र तु समायातौ पश्यन्तः किं न शंसथ ॥३५॥
पृच्छन्द्रवति वीथीषु क्व राम इति संगतान् ।
विषीदंश्च प्रमत्तश्च विह्वलश्चावशः स्वयम् ॥३६॥
उन्मत्तं तं तु पश्यन्तः केचिज्जहसुरञ्जसा ।
विषेदुश्च पुनः केचित्तस्य चित्तविपर्ययात् ॥३७॥
शिष्याश्च विह्वलास्तस्य कारणं शोकमोहयोः ।
अजानन्तोऽन्वयुः सर्वे प्रष्टुं तं चाप्यनीश्वराः ॥३८॥
त्यागेशोऽपि स धर्मात्मा मार्गयन्सुचिरं तदा ।
अनासाद्यैव तौ वीरौ विह्वलः स्वगृहं ययौ ॥३९॥
व्यजनैर्वीजयामासुर्दृष्ट्वा तद्देहसंक्रमम् ।
शिष्यास्ते दीनमनसो गुरुमोहेन कातराः ।४०॥
विश्रान्तं तं पतिं साध्वी विमला कमलाम्बिका ।
पप्रच्छ सादरं पार्श्वे तिष्ठन्ती साश्रुलोचना ।४१॥
नाथ किं न प्रमत्तोऽसि न ज्वरो बुद्धिमोहकः ।
यदकारणतो मूढश्चरसीत्थं ससंभ्रमः ॥४२॥
भवदायत्तमस्त्यद्य शिष्याणां मम च प्रभो ।
मानः सौख्यं तथा प्राणाः किं कुर्मः कृपणा वयम् ॥४३॥
पश्यत्यद्य भवाञ्शिष्यान्स्वेदक्लिन्नमुखाम्बुजान् ।
भयेन च विषादेन व्याकुलान्दीनचेतसः ।४४॥
कथं भवानिमां प्राप्तोऽवस्थामितरदुःसहाम् ।
यन्मूलं तद्ददातु मे मार्यार्थं मयतः प्रभो ॥४५॥

इत्युक्तः स तु धर्मात्मा प्रेयस्या भृशतान्तया ।
सर्वानुदीक्ष्य तान्दीनान्दीनः प्रोवाच विह्वलः । ४६॥
ज्वराभिभूतो नास्म्यद्य प्रमत्तो मूढधीरपि ।
लज्जया पुनराविष्टो यदद्यापि धराम्यसून् ॥४७॥
राघवो लक्ष्मणश्चैव साक्षादत्र समागतौ ।
मयि नन्तुं कृतोद्योगे क्षणादन्तर्धिमापतुः ॥४८॥
भ्रातरौ रूपसंपन्नौ हैममारकतच्छवी ।
स्पृहणीयतमौ वीरौ चन्द्रवत्प्रियदर्शनौ ॥४९॥
यथैवालंकृतौ मात्रा तुष्टया प्रियपुत्रया ।
विश्वामित्रानुगमने तथा दृष्टौ मया त्विह ॥५०॥
प्राप्तावपि महात्मानौ प्राप्यौ भूरितपोबलैः ।
पश्यन्नेवानयं कालं मोहविह्वलमानसः ॥५१॥
न मया स्वागतं प्रोक्तं न दत्तं पाद्यमप्यहो ।
नाप्युपावेशितौ पीठे न च क्षीरं निवेदितम् ॥५२॥
निरुद्धोऽहं दुष्कृतौघैः पूर्वजन्मकृतैः स्वयम् ।
धिगासाद्यापि दुष्प्रापौ व्यर्थं मां बिभ्रतं वपुः ॥५३॥
अनुभूय च तां दैवीं रुचिरां रूपसंपदम् ।
प्रनष्टायां कथं तस्यां जीवाम्यद्येति विस्मये ॥५४॥
लज्जा कृन्तति चात्मानं प्राप्य दुर्लभदर्शनम् ।
न पूजितो न प्रणतो न च भाषित इत्यपि ॥५५॥
तिष्ठेतां मानिनौ शूरौ कथमस्वागते गृहे ।
अपश्यंस्तौ महात्मानौ नाहं जीवितुमुत्सहे ॥५६॥
इत्युक्तवन्तं त्यागेशं परिम्लानमुखाम्बुजम् ।
शुष्कोष्ठं साश्रुनेत्रं च शयानं च महीतले ॥५७॥
स्वेदधारापरिक्लिन्नवाससं दीनचेतनम् ।
गोहत्यामिव कामेन कृत्वा विप्रं सुतापितम् ॥५८॥

उदीक्ष्य सर्वे संहृष्टा रामदर्शनकौतुकात् ।
विषीदन्तश्च तद्देहसंदष्टकुमविह्वलाः ॥५९॥
ततः शिष्याश्च संहृष्टाः साध्वी च कमलाम्बिका ।
ऊचुर्विनयसंपन्नास्त्यागेशं भृशविह्वलम् ॥६०॥
नायं विषादकालस्तु दृष्टौ साक्षाद्धि राघवौ ।
अगम्यौ श्रुतिभिश्चापि ध्यानयुक्तैर्महर्षिभिः ॥६१॥
शोच्या वयं पुनर्नाथ सर्वदाऽत्रैव सुस्थिताः ।
तयोः समागमे प्राप्ते यतो दृग्दपोहिताः ॥६२॥
स्पृहणीयो भवान्नूनं दृष्टौ यन्नरपुंगवौ ।
उत्तिष्ठतु भवानद्य पूजाकालो विलम्बते ॥६३॥
इत्युक्तस्तु समालोक्य सूर्यमाकाशमध्यगम् ।
माध्याह्निकक्रियाहेतोरुदतिष्ठत्त्वरान्वितः ॥६४॥
स्मरन्नेव तयो रूपं गाम्भीर्यं स्पृहणीयताम् ।
अलंकारविशेषं च माध्याह्निकमथाकरोत् ॥६५॥
आरब्धा तु यदा पूजा तद्गृहं बहुभिर्वृतम् ।
श्रुतवद्भी रघूत्तंसौ प्रत्यक्षं दृष्टवानिति ॥६६॥
त्यागेशस्तांस्तु संदृश्य बहुमानेन कौतुकात् ।
प्रियान्मानयतः सर्वान्विनयेन ननाम सः ॥६७॥
पूजां विधाय रामस्य जने पश्यति विस्मिते ।
अगायत्स कृतिं कृत्वा चैला नीदय राडिति ॥६८॥
सद्यः कृतं तु तद्गीतं श्रुत्वा ते विस्मयान्विताः ।
रामानुग्रहमाजं तं श्लाघन्ते स्म महर्षिणः ॥६९॥
शिष्याश्च परमप्रीता नवकल्पां कृतिं तु ताम् ।
कृत्वा मनःसमारूढां गायन्ति स्म महौजसः ॥७०॥
गुरुश्च त्यागराजस्य श्रुत्वैतां कृतिमुत्तमाम् ।
बहुमानेन चानाय्य तुष्टस्तमिदमब्रवीत् ॥७१॥

त्यागेश कृतकृत्योऽसि शिष्यं त्वां प्राप्य धार्मिकम् ।
कीर्तिश्च भविता लोके त्वयैव मम सुव्रत ।७२॥
प्रत्यक्षेण त्वया दृष्टावित्यद्यैव श्रुतं मया ।
शरण्यौ सर्वलोकानां राघवौ रिपुमर्दिनौ ॥७३॥
कृतं त्वया महत्पुण्यमितरेषां सुदुष्करम् ।
येन प्रेक्षितवान्रामं योगिनामपि दुर्लभम् ॥७४॥
श्रुता कृतिस्त्वदीया च भक्तिपूता मनोरमा ।
सर्वलक्षणसंयुक्ता गीता ते शिष्यपुंगवैः ॥७५॥
महत्फलु त्वया लोकः शुममासादयिष्यति ।
कुरु गीतानि रम्याणि गान्धर्वस्य विवृद्धये ॥७६॥
इत्युक्तस्त्यागराजस्तु गुरुणा च हितैषिणा ।
प्रणम्य च तथेत्याह विनयेन मुदान्वितः ।७७॥
सदा स्मरति तं रामं लक्ष्मणं च समागतम् ।
परिणामं तथा कान्ति ध्यायन्नन्दति चासकृत् ॥७८॥
विषीदति कदाचिच्च तिरोधानं स्मरन्पुनः
क्रन्दत्युच्चैर्वदन्रामलक्ष्मणौ क्व गताविति ॥७९॥
ससंभ्रमश्च जागर्ति सुप्तो रामेति च ब्रुवन् ।
दृष्ट्वा शून्यं गृहं पृच्छत्यद्य रामः क्व वेति च ।८०।
शून्येऽपि गेहे दृष्ट्वेव राघवं सहलक्ष्मणम् ।
स्मेरः पश्यन्विशालेन लोचनेन स मोदते ।८१।
रामदर्शनमारभ्य व्यत्यस्तास्तस्य तु क्रियाः ।
न भुङ्क्ते वा स्वपिति वा प्रमत्त इव दृश्यते ॥८२॥
गुरोराज्ञां वहन्धीमाञ्छिरसा कृतवान्स्वयम् ।
कीर्तनानि महार्हाणि शतसाहस्रकाणि च ।८३॥

॥ इति श्रीसुन्दरेशार्यविरचिते त्यागराजचरिते
'रामदर्शनं' नाम षष्ठः सर्गः ॥

अथ सप्तमः सर्गः ।

ब्राह्मे मुहूर्ते चोत्थाय स्नात्वा जप्त्वा कृताह्निकः ।
राघवं बोधयत्यार्यो निशायां सुप्तमर्चितम् ॥१॥

देशाक्षीदेवगांधारिभूपालैश्च वसन्तया ।
बिलहर्यादिभिर्गीतैः कलप्तैस्तं प्रत्यबोधयत् ॥२॥

निवेदयति गांक्षीरमेलामिश्च सुवासितम् ।
गीतानि स्वकृतान्येष त्वामध्याह्नं च गायति ।३॥

त्यागेशे गायति मुदा संघस्तत्पुरवासिनाम् ।
पुरान्तरागतानां च तुमुलः समजायत ॥४॥

सभाजयित्वा तान्सर्वान्संमान्य च यथार्हतः ।
नवानि कृत्वा गीतानि गायति स्म मुदाऽन्वितः ॥५।

दुरूहानपि शास्त्रार्थान्बोधयन्निजकीर्तनैः ।
सर्वांश्च विवशीकृत्याकरोत्साधुपथे स्थितान् ॥६॥

पारम्यं भक्तियोगस्य तन्मार्गान्विविधांश्च सः ।
विषयीकृत्य गीतानि चकार मतिमांस्तदा ।।७॥

देवतानां महत्त्वं च शिवादीनां दृढव्रतः ।
कीर्तनेषु निधायासौ प्रकटीकुरुते स्म सः ॥८॥

रामचन्द्रस्य वैशिष्ट्यं दैवतेष्वितरेष्वपि ।
शरण्यतां च लोकस्य सौलभ्यं प्रियवक्तृताम् ॥९॥

सत्यसंगरतां चैव सौशील्यं नम्रभावताम् ।
रूपोत्कर्षं च रामस्यावर्णयत्कीर्तनेषु स ।१०॥

पाषण्डा अपि तच्छ्रुत्वा विस्मिता गानलोलुपाः ।
रामे च परमां भक्तिं प्राप्य पूताश्चकाशिरे ।११॥

उपदिश्य महामन्त्रं तारकं तारकं स्वयम् ।
अतारयच्च तान्सर्वांस्तारापतिसमस्तदा ॥१२॥

माध्यंदिनानि सर्वाणि कृत्वा कर्माणि शास्त्रवत् ।
राघवं पूजयामास श्रद्धया नियमेन च ॥१३॥
छात्रानध्यापयामास स्वाः कृतीर्भोजनात्परम् ।
अपराह्णे तु शुद्धात्मा विश्रान्तिमनपाश्रयन् ॥१४॥
पुराणानि च सायाह्ने यथावद्भक्ति संगतान् ।
निर्वर्त्य सायंसंध्यां च तारकं जपति स्म सः ॥१५॥
रामपूजां ततः कृत्वा बहुसंघे समाकुले ।
गायति प्रणतो रामं नैशरागकृताः कृतीः ॥१६॥
संलीयमानमनसः सर्वे नादे सुखात्मके ।
न किंचिज्ज्ञातवन्तस्ते कुत्र च क्व स्थिता इति ॥१७॥
त्यागेशो मानसं वाचमर्पयन्राघवे दृढम् ।
अविज्ञाय च यत्किंचिदानिशान्तं स्म गायति ॥१८॥
बोधितः शिष्यवर्गेण स्वापयित्वा रघूत्तमम् ।
सुखस्वप्नकरैर्गीतैः कावेरीं याति सादरम् ॥१९॥
गीतानां च समं दृष्ट्वा रम्यतां भावपूर्णताम् ।
भावानुसारिणो रागांस्तालांश्च विविधानपि ॥२०॥
अमन्यन्त महात्मानं लोकमेनमुपागतम् ।
तुम्बुरुं वायुसूनुं च गान्धर्वस्य विवृद्धये ॥२१॥
सायाह्ने शिष्यवर्गाणां संगतानां च भक्तितः ।
भक्त्युत्कर्षं प्रवक्ष्येतच्छास्त्राब्धिमथनोत्थितम् ॥२२॥
वाञ्छन्ति प्राणिनः सर्वे सौख्यं दुःखविहीनताम् ।
यतन्ते तदवाप्त्यर्थं प्रपद्यन्ते न तत्पुनः ॥२३॥
संपूर्णसुखलाभाय कृषिवाणिज्यकारकाः ।
आधिव्याधिशतं प्राप्य पीड्यन्ते तेन चैव हि ॥२४॥
यतमानो न चाप्नोति सुखमुप्तस्तु विन्दति ।
कृच्छ्रात्संपादयत्येकोऽनुभुङ्क्ते तत्पृथग्जनः ॥२५॥

निरुद्यमास्तथा मूढाः कातराः कलुषेन्द्रियाः ।
राज्यानि च समासाद्य लभन्ते सर्वपूज्यताम् ॥२६॥
धीराश्च कृतविद्याश्च कुलजाता जितेन्द्रियाः ।
सेवकत्वमनुप्राप्य परिचर्यां हि कुर्वते ॥२७॥
ऊहनीयं त्वनेनैव विद्यते शक्तिरित्यपि ।
अदृश्या सूक्ष्मभूतत्वान्मानुषाद्बलवत्तरा ॥२८॥
सा हि नारायणी शक्तिर्व्याप्य सर्वत्र तिष्ठति ।
नयन्ती सर्वलोकांश्च शुभाशुभफलप्रदा ॥२९॥
तस्मान्नारायणः सेव्यः शुभमाकाङ्क्षता पुनः ।
भक्तिपूतेन मनसा लोकानां यः परा गतिः ॥३०॥
त्रिलोकीसृष्टिकर्तारं तर्पयेत्कथमल्पकः ।
भक्त्यैवानर्घया साध्यस्तुष्टो भवति सोऽनया ॥३१॥
फलं समीक्षमाणस्तु भक्तिं यत्कुरुते नरः ।
वाणिज्यमिति वाच्यं तन्न सा भक्तिरिहोच्यते ॥३२॥
वाणिज्ये तु समं मूल्यं दत्त्वा वस्तु हि लभ्यते ।
अल्पादल्पं मदायासुं महद्धि यतते जनः ॥३३॥
यः पूजयति तं देवं कामनावशगो नरः ।
प्रलोभयति दुष्टात्मा स्वात्मानं तं च केशवम् ॥३४॥
इदमाश्चर्यभूतं मे प्रार्थयत्यखिलो जनः ।
देवान्दूरगतान्सर्वव्यापिनो निर्णयन्किल ॥३५॥
शक्तिमत्तां च देवानां स्वकार्यकरणे पुनः ।
निश्चिन्वन्नेव मनसि प्रार्थयत्यत्र मानवः ॥३६॥
सर्वव्यापी सर्वशक्तः कथमस्याल्पदानतः ।
प्रीतिं तु परमां प्राप्य भूरि दातव्यमित्यपि ॥३७॥
अहो वयं मूढधियो मोक्षसाम्राज्यदायकम् ।
आराध्य काचं याचामोः गर्दभं कौस्तुभाप्तये ॥३८॥

इत्यादिभिर्महावाक्यैर्युक्तियुक्तैर्महामतिः ।
पाषण्डानपि साधून्स भक्तांश्च कुरुते दृढम् ॥३९॥
एकदा त्यागराजः स कृत्वा माध्याह्निकीं क्रियाम् ।
यतमानश्च पूजायै वृद्धं विप्रं ददर्श सः । ४०॥
आयातं दीर्घमध्वानं स्वेदक्लिन्नकलेवरम् ।
पाण्डुरक्षौमसंवीतं रुद्राक्षावृतकंधरम् ॥४१॥
श्वेतमूर्ध्वजसंकल्पनागाभरणभूषितम् ।
सर्वगात्रेषु संलिप्तविभूतिपरिमण्डितम् ॥४२॥
अनिर्णेयवयस्कं च ज्वलन्तं ब्राह्मतेजसा ।
संविग्नपादविन्यासं स्खलद्वचनमङ्गुरम् ॥४३॥
दृष्टमात्रेण चोत्थाय संभ्रमाद्विनयान्वितः ।
आसने समुपावेश्य पाद्यार्घ्यैरुपचर्य च ॥४४॥
वीजयन्व्यजनेनापि स्वेदक्लिन्नं तपोधनम् ।
प्रोवाच त्यागराजस्तु स्वयं मधुरया गिरा ॥४५॥
मम संचितपुण्यानि फलदान्यद्य सर्वथा ।
यद्भवाञ्शंभुसंकाशः स्वयं मे गृहमागतः ॥४६॥
कम्पमानेन शिरसा सांविग्नचरणेन च ।
कथं मे विषयं प्राप्तो दीर्घजीवी श्रमाकुलः ॥४७॥
निवेदितं भगवते गृह्णातु क्षीरमुत्तमम् ।
श्रमापनयनायाद्य भवान्भूसुरसत्तम ॥४८॥
श्रुत्वेदं वचनं प्रोक्तं प्रीत्या च विनयेन च ।
समागतो भूसुरस्तु गम्भीरमिदमब्रवीत् ॥४९॥
त्यागराज महाभाग श्रुत्वा ते शीलमुत्तमम् ।
कृच्छ्रादिदक्षमाणस्ते गृहमद्यागतोऽस्म्यहम् ॥५०॥
प्रत्यक्षतश्च दृष्टोऽसि परा भक्तीं रघूत्तमे ।
ब्राह्मणेषु च विश्वासो विनयः सौहृदं च ते ॥५१॥

पूर्वं तु भोजनादद्य विश्रामं नाभिरोचये ।
माध्याह्निकक्रियाहीनं भोजनं विषमेव हि ॥५२॥
अस्नातश्च कथं कुर्यां क्रिया माध्याह्निकीः पुनः ।
अत्रागच्छामि सुस्नातः कुरु पूजां यथातथम् ॥५३॥
इत्युदीर्य यदा कृच्छ्रादुदतिष्ठत्स्खलत्पदः ।
पपात सूत्रबद्धानि तालपत्राणि चाङ्कतः ॥५४॥
त्यागेशस्तानि संगृह्य संनतः प्रददौ करे ।
भूसुरस्तान्यनादाय तस्मिन्निक्षिप्य संययौ ॥५५॥
याचितोऽपि यदा शिष्यान्नानु नेतुं मनो दधे ।
प्रतस्थे त्यागराजोऽथ निरुद्धः सोऽपि तेन तु ॥५६॥
अचिरेणैव कालेन प्रार्थयन्पुनरागमम् ।
स्नानाय चोत्सुकं विप्रं विमना विससर्ज तम् ॥५७॥
पूजां च विधिवत्कृत्वा व्यग्रो ब्राह्मणदर्शने ।
अध्यतिष्ठद्बहिर्गेहं चिरं पश्यंश्चतुर्दिशः ॥५८॥
न ददर्श समायान्तं स्नातं ब्राह्मणमुत्तमम् ।
शिष्यान्संचोदयामास शीघ्रमानीयतामिति ॥५९॥
मार्गयन्तः सुदूरं ते कावेरीपुलिनेषु च ।
आलयेषु च तीरेषु निवृत्ता असमीक्ष्य वै ॥६०॥
शिष्यास्ते दीनमनसः श्रान्तास्तपनतापिताः ।
समागत्य गुरुं व्यग्रमूचुर्विप्रमनीक्षितम् ॥६१॥
शिष्याणां तु वचः श्रुत्वा दारुणं मरणोपमम् ।
त्यागेशः सहसोत्पत्य विचेतुं तं स्वयं ययौ ॥६२॥
शिष्याश्चान्वगमन्सर्वे श्रान्ताः श्रान्तेन चेतसा ।
मार्गयन्तश्च सर्वत्र ददृशुर्नैव भूसुरम् ॥६३
कूलेषु तं मृगयते नारिकेलवनेषु च ।
आलयं गच्छति पुनः सत्रेषु परिमार्गति ॥६४॥

परिपप्रच्छ दीनात्मा संगतानागतानपि ।
किं दृष्टो ब्राह्मणः कश्चिद्वृद्धो ज्वलनसंनिभः ॥६५॥
अनागतगतिस्तस्य विप्रस्य ज्यायसस्तदा ।
अपराह्णावधि श्रान्तो मार्गंस्तं तत्र तत्र सः ॥६६॥
अन्विष्यन्नपि कृच्छ्रात्स यदा नासादयत्पुनः ।
शोको भयं च सुमहद्विवेश श्रान्तचेतनम् ॥६७॥
कां वा गतिमनुप्राप्तः केन वा कुत्र वा पुनः ।
सुदुर्बलतनुर्वृद्धः प्रस्खलच्चरणः स्वयम् ॥६८॥
अहो महदिदं पापं प्राप्तं पापात्मना मया ।
दुर्लभो ब्राह्मणो गेहमागतो वै न रक्षितः ॥६९॥
संमार्गितं पुरं त्वेतत्सर्वं कृच्छ्रेण सादरम् ।
वर्षीयान्भूसुरस्त्वद्य कथं नासादितो मया ॥७०॥
ब्राह्मणः स तु तेजस्वी तपस्वी नियतात्मवान् ।
किमर्थमनृतं वक्ति पुनरागमनं तु मे ॥७१॥
न चैतदुचितं मन्तुं दुष्टचित्तैरपि स्वयम् ।
पापावहं भवेदद्य यद्धि विप्रवचोऽनृतम् ॥७२॥
प्रविष्टमात्रे कावेरीं स्नानाय गताकिल्बिषे ।
ग्राहेणैव समाकृष्टो जलमध्यं गतो भवेत् ॥७३॥
यादसा बलिनाऽऽकृष्टः कं कं वाऽस्मरदन्ततः ।
दुर्बलः श्लथसंधिश्च स्वादुकामस्तपोधनः ॥७४॥
इत्यादिभिर्दीनदीनैर्विलपन्वचनैरपि ।
साश्रुनेत्रो मृगयते विप्रं बन्धुमिव स्वकम् ॥७५॥
शिष्यैस्तु याचितो दीनैर्गुरुक्षेमैकनिश्चयैः ।
त्यागेशो विह्वलाङ्गश्च कृच्छ्राद्गृहमथाऽऽगमत् ॥७६॥
आहारे व्यवहारे च न रतिं प्राप्तवांस्तदा ।
निराहारोऽभवच्छोचन्पत्न्या चाप्यनुकूलया ॥७७॥

न गानेषु मतिं चक्रे न शिष्याणां तु पाठने ।
विलपन्नेव शुद्धात्मा सायंसंध्यामुपास्त सः ॥७८॥
यथावत्तारकं जप्त्वा पूजां कृत्वा यथाविधि ।
निराहारस्ततः शिश्ये पत्न्या सह यतव्रतः ॥७९॥
शिष्याश्च परमक्लान्ता व्यवसायेन तस्य तु ।
उपवासरतास्तत्र शिश्यिरे दीनचेतसः ॥८०॥
गतायां तु त्रियामायां सुखसुप्ते सुहृद्गणे ।
भासिते जडवल्लोके नैशजन्तौ शमं गते ॥८१॥
विबुध्य त्यागराजस्तु संभ्रमेण तदाऽनघः ।
आजुहाव च तानुच्चैः शिष्यान्पत्नीं च सादरम् ॥८२॥
संभ्रमाच्च तदा सर्वे संययुस्तत्र विस्मिताः ।
तानुवाच ततस्तुष्टस्त्यागराज इदं वचः ॥८३॥
मध्यंदिने समायातः साक्षान्नारद एव हि ।
अनुग्रहकरोऽस्माकं कारुण्यात्स समागतः ॥८४॥
तालपत्राणि यत्पूर्वं प्रभ्रष्टान्यङ्कतः प्रभोः ।
स्वरार्णव इति ख्यातो ग्रन्थो देवैस्तु पूजितः ॥८५॥
दैवीं गानसमृद्धिं तु भूलोके कर्तुमिच्छता ।
नारदेन कृतं ह्येतद्ग्रन्थमर्पयितुं मयि ॥८६॥
स्वप्ने किल समागत्य नारदः प्राह मामिदम् ।
कारुण्यादेव रामस्य सर्वमेतदभून्मम ॥८७॥
इत्युक्तवन्तं त्यागेशं कौतुकात्संभ्रमेण च ।
समागत्य ददौ शिष्यस्तालपत्राणि सत्वरः ॥८८॥
त्यागेशस्तान्युपादाय कौतुकाद्विनयेन च ।
सूत्रबन्धं विमुच्याशु विस्मयेन ददर्श सः ॥८९॥
स्वरार्णवाभिधं ग्रन्थं पूतं दिव्यं निरीक्ष्य तु ।
तोयाम्बुधिनिमग्नोऽसौ तरितुं नैव शक्नुवन् ॥९०॥

दीपमुज्ज्वाल्य पूतात्मा नियतश्चापठत्सुधीः ।
गान्धर्वं गानशास्त्रं तद्विस्मयेन ननन्द च ॥९१॥
नवं च रागसंचारक्रमं गीतांश्च नूतनान् ।
रागांश्च विविधान्दृष्ट्वा निधिं प्राप्येव निर्धनः ॥९२॥
पुनः पुनः पठित्वैतद्धर्षेण महताऽऽप्लुतः ।
श्रीनारदेति गीतेन तुष्टाव मुनिपुंगवम् ॥९३॥
तच्छास्त्रसूक्ष्मं विज्ञाय कृतवान्विविधाः कृतीः ।
नूतनैरपि रागैश्च तालैश्च विविधैस्तथा ॥९४॥
श्रुत्वा तु नवगीतानि सर्वे ते विस्मिता जनाः ।
पुरान्तरात्समायातास्तथा देशान्तरादपि ॥९५॥
दिने च वर्धते संघः संगतानां सहस्रशः ।
श्रोतुं नवागतां दैवीं पूतां तां गानसंपदम् ॥९६॥
त्यागराजस्तु तान्भक्त्या प्रतिनन्द्य यथाऽर्हतः ।
गायति प्रणतो रामं यथा ते विवशीकृताः ॥९७॥

॥ इति श्रीमत्त्यागराजचरिते श्रीसुन्दरेशार्यविरचिते "नारददर्शनम्" नाम सप्तमः सर्गः ॥

अथाष्टमः सर्गः ।

एकदा त्यागराजस्तु सायाह्ने तुष्टमानसः ।
शिष्यानध्यापयन्नास्ते बहिर्गेहे निजाः कृतीः ॥१॥
ततस्तु तुमुलः शब्दः कम्पयन्निव भूतलम् ।
संजज्ञे जनसंयोगोत्थो ह्यदूरादेव तस्य च ॥२॥
विस्मयेन ततः सर्वेऽपश्यंस्तां दिशमादरात् ।
ददृशुश्च समायान्तीं शिबिकां नेत्रहारिणीम् ॥३॥
हैमवस्त्रसमाकल्पसरक्तकौशेयशोभिताम् ।
मुक्तामणिविचित्राङ्गां कल्पां दान्तैश्च राजतैः ॥४॥

परार्घ्यास्तरणोपेतां महार्हशिखरान्विताम् ।
दृश्यैर्महोपधानैश्च पञ्चभिः परिमण्डिताम् ॥५॥
वीरवादित्रसंघैश्च विविधैरनुनादिताम् ।
स्पृहणीयेन महता ध्वजेन समलंकृताम् ॥६॥
वीरघण्टाभिभद्भिर्वीरवादान्भयंकरान् ।
कुर्वद्भिर्बहुभिर्व्याप्तां पुरोभागेषु चोद्धतैः ॥७॥
बालैर्वयःस्थैर्युवभिः संवृतां पुरवासिभिः ।
उच्चघोषैः सतालैश्च नवागमनकौतुकात् ॥८॥
विस्मयेन तदाऽपश्यत्त्यागेशः शिष्यसंवृतः ।
कोऽयं किमर्थमायाति वीथीं कस्माच्च कारणात् ॥९॥
अचिरेणैव तत्संघः शिबिकासहितो महान् ।
समीपमागत्य पुनस्त्यागेशस्य व्यतिष्ठत ॥१०॥
त्यागेशस्तां समुद्वीक्ष्य सुदीप्तां शिबिकां तदा ।
उत्फुल्लनयनद्वन्द्वः प्रैक्षिष्ट कुतुकेन च ॥११॥
स ददर्श समासीनं दृश्यं च मनुजर्षभम् ।
गाम्भीर्येण च धैर्येण रूपेणापि समन्वितम् ॥१२॥
हैमतन्तुसमाक्लृप्तोष्णीषबन्धमनोहरम् ।
नवरत्नमहादीप्रकुण्डलाभ्यामलंकृतम् ॥१३॥
अन्तःस्थितं तमोराशिं प्रकटीकर्तुमुद्यतैः ।
दीर्घकृष्णभ्रुसमानं श्मश्रुजालैर्भयानकैः ॥१४॥
मुक्तावैदूर्यमालाभिर्वराभिः समलंकृतम् ।
अङ्गदान्यर्हकटकान्धारयन्तं महाद्युतिम् ॥१५॥
श्वेतरक्ते दधानं च वाससी हेमचित्रिते ।
उन्नतं भीमकायं च दुर्धर्षमितरैः पुनः ॥१६॥
संवर्धितेन वपुषा महार्हाभरणैश्च सः ।
औद्धत्येन मदेनापि शिक्षणां प्रथमज्ञताम् ॥१७॥

त्यागेशे पश्यति तदा शिविकाया महाद्युतिः ।
दत्तहस्तः शिष्यगणैः स्मयमानोऽप्यवातरत् ॥१८॥
त्यागेशः पुरतो गत्वा पार्श्वं तस्य वपुष्मतः ।
प्रतिनन्द्य यथान्यायमानिनाय च तं गृहम् ॥१९॥
आसने समुपावेश्य पूजयन्वचनैः शुभैः ।
परिपप्रच्छ धर्मात्मा सादरं सस्पृहं च तम् ॥२०॥
को वा नु भवता देशः समलंक्रियते विभो ।
के वा भवन्तमासाद्य तुष्यन्ति सहचारिणम् ॥२१॥
सुदूरागमने किं वा मन्यतेऽत्र प्रयोजनम् ।
किं वा मयाऽद्य कर्तव्यं भवतेऽद्य बहुश्रुत ॥२२॥
इत्युक्तस्त्यागराजेन विनयाद्बहुमानतः ।
समागतो बभाषेऽथ सगर्वं तमिदं वचः ॥२३॥
किं न श्रुतः केशवार्यः संगीताम्भोधिपारगः ।
वोब्बिलीनगरोद्भूतो धरण्या यस्तु भूषणम् ॥२४
पारं गताश्च संगीते पश्यन्तो यं ससंभ्रमाः ।
मूका भवन्ति मूढाश्च राजकीयसभासदः ॥२५॥
सर्वराजकुलैर्दत्तपारितोषिकसंचयान् ।
राज्ञां तु तोषणायैव बिभर्ति किल दुर्वहान् ॥२६॥
तमेव विद्धि सुभगं केशवं पुरतः स्थितम् ।
यत्किंचिज्ज्ञातवान्गीते त्वमित्यद्य श्रुतं मया ॥२७॥
बह्वीनां च कृतीनां त्वं कर्तेति श्रूयते पुनः ।
अनस्तमितचन्द्रे तु शोभन्ते तारकाः कथम् ॥२८॥
नवानि कृत्वा गीतानि शार्दूले मयि जीवति ।
कथं न लज्जसे मूढ त्वां जिगीषुरिहागतः ॥२९॥
दर्शयार्यैव ते विद्यां दर्शयाम्यहमप्यमूम् ।
अभिभूतं प्रपश्येयं त्वामयैव क्षणादिह ॥३०॥

केशवे कथयत्येवं जहसुश्चानुगामिनः ।
करतालान्समाकुर्वन्स्मयमाना मदोद्धताः ॥३१॥
त्यागेशस्य तु ते शिष्या मन्वाना दैवतं गुरुम् ।
सगर्वमुक्तां तां वाचं न शेकुः सोढुमन्ततः ॥३२॥
पार्श्ववर्तितया चैव शीलज्ञानेन ते गुरोः ।
नियच्छन्तश्च तं कोपमपश्यन्क्रूरचक्षुषा ॥३३॥
त्यागराजस्तदा वाक्यं श्रुत्वा तत्केशवस्य च ।
प्रोवाच विनयाद्धीमानर्थयुक्तमिदं वचः ॥३४॥
सर्वे सृष्टा इमे लोका माधवेन चराचराः ।
कथं सर्वसमः कुर्यादेकमुत्कर्षभाजनम् ॥३५॥
सृष्टा भगवता शक्तिः प्राणिनां विविधा किल ।
काकः करोति यत्कर्म न तत्कर्तुमलं नरः ॥३६॥
पिपीलिकाया या शक्तिर्ज्ञाता केन नरेण वा ।
नावमान्यानि भूतानि तस्माज्ज्ञातवता पुनः ॥३७॥
एकमेव हि तद्ब्रह्म ततं नाना प्रदृश्यते ।
तरङ्गा इव पाथोधौ नाम्ना भेदं प्रपद्यते ॥३८॥
स्वर्णं कटकतां याति नूपुरत्वादिकं तथा ।
दारु सर्पगजत्वादि चैकमूलात्समानि हि ॥३९॥
तथैव मनुजाः कीटाः सर्वे ब्रह्ममयाः पुनः ।
तस्मात्तु नावमान्यानि भूतानि ज्ञानशालिना ॥४०॥
ज्ञातवन्तं न मन्येऽहमात्मानमितरात्प्रभो ।
सर्वे किल महात्मानः सर्वे भागवतोत्तमाः ॥४१॥
सर्वेषां तु परं कार्यं राघवस्य प्रपूजनम् ।
तदेव कर्तुं सततं यतेऽहं न तु साधितम् ॥४२॥
विभूष्य सुममालाभिर्यथा नन्दामि राघवम् ।
तथा कीर्तनमालाभिस्तुष्यामि बहुशो विभो ॥४३॥

अवमन्तुं परान्नैव करोमि भगवन्कृतीः ।
प्रकटीकरणार्थं वा स्वोत्कर्षस्य शुभानन ॥४४॥
राघवस्तु परं तुष्येदिति संचिन्तयन्नहम् ।
करोमि विविधं गीतं प्रार्थनावशगः स्वयम् ॥४५॥
किं वा मयाऽपराद्धं ते यदमर्षवशो भवान् ।
अज्ञानाद्यदि वा क्लृप्तं मर्षयत्वद्य पण्डितः ।४६॥
इत्युक्तस्त्यागराजेन केशवो भृशगर्वितः ।
हेलयोत्स्मयमानश्च बभाषे तमिदं वचः ॥४७॥
विज्ञाता भीरुता तेऽद्य यस्माद्वदसि चेदृशम् ।
शुश्रूषाऽस्ति त्वदीयानां गीतानां गीयतामिह ॥४८।
मा भीतिस्तु त्वया कार्या यदस्मत्संनिधाविति ।
क्षमेरंस्तव दोषांस्तु मम सर्वेऽनुगामिनः ।४९॥
इत्युक्त्वा केशवः सर्वानुदैक्षत स हेलया ।
त्यागेशः स तु धर्मात्मा गातुमेव प्रचक्रमे ॥५०॥
सुश्रुतिं तम्बुरुं गृह्णन्ध्यायन्मनसि राघवम् ।
गायति स्म तदा कृत्वा गीतं विधुलकुन्निति ।५१॥
त्यागेशे गायति स्वादु सुस्वरं भक्तिसंयुते ।
सर्वे नादे लीयमाना नाजानन्किंचिदप्यहो ॥५२॥
प्राप्य बोधं मुहूर्तेन केशवस्यानुगामिनः ।
विस्मयेन समाविष्टाः पश्यन्तोऽनिमिषा इव ॥५३॥
श्रुतवन्तो न ते गानमेतादृशमपर्णाः ।
श्रुतिबद्धं भावपूर्णं श्रोत्रमानसहारि तत् ।५४।
केशवस्तु समाकर्ण्य विस्मितश्च बभूव सः ।
कथमस्य तु गीतानि कर्षतीति मनांसि मे ॥५५॥
इत्थं स चिन्तयत्यस्मिन्केशवे भृशगर्विते ।
एन्तरो इति गीतं स सद्यः कृत्वा स्म गायति ॥५६॥

शृण्वतः केशवस्यापि तेषां चाप्यनुगामिनाम् ।
भयं विवेश हृदयं लज्जा च महती तदा ॥५७॥
तालभद्धानि साहित्यरत्नानि विविधान्यपि ।
भक्तिपूतानि तच्छ्रुत्वा केशवो मोहमावहत् ॥५८॥
संगीतस्य तु माधुर्यमियन्नैवानुभूतवान् ।
संगतो भारतं वर्षं श्रुत्वाऽपि निपुणैः कृतान् ॥५९॥
त्यागेशश्च तदाऽगायच्चिरादिव कृतिं तु ताम् ।
चरणैर्बहुभिः कल्पां स्वरमालाविभूषिताम् ॥६०॥
गीते तस्मिन्समाप्ते तु केशवो भृशविस्मितः ।
आसनात्स्वयमुत्थाय वन्दितुं यतते स्म सः ॥६१॥
त्यागेशश्च समुत्थाय संभ्रमाद्विनयेन च ।
अनतं च तदा चक्रे मा मेति च वदन्वचः ॥६२॥
केशवश्च तदा तिष्ठन्विपादःपूर्वकर्मणा ।
प्रसादयंस्त्यागराजमिदमूचे स विह्वलः ॥६२॥
कृतं मया महत्पापं गर्वपर्वतवर्तिना ।
भवतश्चापि विद्याया अज्ञानाद्भक्तपुंगवः । ६४॥
कुलीनः शिक्षितो वाऽपि श्रेयसा यदि योक्ष्यते ।
स हि मूढात्मतां याति मदमात्सर्यदूषितः ॥६५॥
वंशे महति संभूतः शिक्षितश्च महात्मभिः ।
अल्पविद्याग्निगर्वेण भृशं हि कलुषीकृतः ॥६६
भवन्तं हि समासाद्य नारायणमिवापरम् ।
शान्तं क्रूरतरैर्वाक्यैर्लज्जेऽहमभिभूतवान् ॥६७॥
बहूक्तवन्तं दुष्टं मां न दुरुक्तं महात्मना ।
धारितं वाऽपि मनसि प्रियमुक्तं सुते यथा ॥६८॥
कः कुर्यात्कार्यमेतत्तु विना वा भवतः प्रभो ।
क्षमस्व करुणाम्भोधे दुरुक्तानि महामते ॥६९॥

इत्याभाष्य च दीनात्मा पश्चात्तापेन तापितः ।
अवमुच्य महार्हाणि वराण्याभरणानि च ॥७०॥
राजभिर्बहुभिर्दत्तान्दृश्यांस्तान्पारितोषिकान् ।
पादयोः प्रणतः प्रादात्स्वीकर्तुं याचते स्म सः ॥७१॥
त्यागराजस्तु धर्मात्मा कारुण्यादाकुलेन्द्रियः ।
सान्त्वयन्वचनं प्राह साश्रुनेत्रमवस्थितम् ॥७२॥
अस्थाने को न्वयं मोहः प्राप्तोऽद्य भवता विभो ।
पण्डितेन कृतां पूजां प्राप्तेन बहुराजभिः ॥७३॥
किमर्थमयमारम्भः क्रियतेऽद्य विपश्चिता ।
यदाभरणजालानि मह्यं दातुं समुद्यतः ॥७४॥
त्यज तं मोहमस्माशु सद्यो भूतमकारणम् ।
प्रतिष्ठतां भवानद्य प्राप्तया दृढया धिया ॥७५॥
नाहं तदाप्तये युक्तः शिष्याश्चेमे ममानुगाः ।
रक्षितुं नाप्यहं शक्तो न क्षमो धर्तुमप्युत ॥७६॥
प्रकाशतां भवानद्य धारयन्वपुषा स्वयम् ।
शिष्यान्मित्राणि बन्धूंश्च नन्दयत्वद्य भूपितः ॥७७॥
अहं हि नियमाद्वर्ते तुष्यन्प्राप्तेन तु स्वयम् ।
एतद्भूषणमुख्यानि धारये वपुषा कथम् ॥७८॥
कथं वा समुद्दिश्य मम दातव्यमित्यपि ।
मन्यते वा भवानद्य कृच्छ्रसंपादितानि च ॥७९॥
इत्युक्त्वा त्यागराजस्तु यदा नैक्षत भूषणम् ।
भृशसंविग्नहृदयः केशवः प्राह सादरम् ॥८०॥
नैतदाश्चर्यभूतं मे वक्ति यच्चु भवानिह ।
नियतेन्द्रियसंग्रामो राघवे विनिविष्टधीः ॥८१॥
युक्तः किं गर्दभो वोढुं जातीयाश्वीयमण्डनम् ।
कथं वा धारयाम्येतत्तिष्ठतीह भवत्यहम् ॥८२॥

गृध्रस्तूड्डयमानः खे सुदूरमपि दारुणम् ।
आराधनीयस्तु कथं दृश्यो वा गरुडो यथा ॥८३॥
संवृतेऽपि घनैः सूर्ये प्रकाशन्ते न तारकाः ।
शीलगुप्तमहाविद्ये स्थिते भवति के वयम् ॥८४॥
अल्पलाभेन विद्याया गमितोऽहमिमां दशाम् ।
मोहान्धकारमग्नं मां तारयत्वद्य किल्बिषात् ॥८५॥
शिष्यत्वेन गृहीत्वेममनुगृह्णीष्व सादरम् ।
अहं च मम शिष्याश्च दासाः स्मो भवतः प्रभो ॥८६॥
गीतानि भवतः श्रुत्वा न यास्याम्यथ पत्तनम् ।
विना वा भवता ब्रह्मंश्छात्रत्वं वाऽप्यनागतः ॥८७॥
गृह्णातु दक्षिणामेतां प्रियशिष्येण चोद्यताम् ।
मनसा परितुष्टेन चानुगृह्णातु मां भवान् ॥८८॥
इत्युक्त्वा चासकृत्पादौ नमस्कृत्य कृताञ्जलिः ।
प्रार्थयामास नियतः स्वीकृत्य स्वस्य रक्षणम् ॥८९॥
त्यागराजस्य शिष्याश्च केशवस्यानुगामिनः ।
पश्यन्तोऽनिमिषास्तं तु विस्मितास्तेऽभवंस्तदा ॥९०॥
त्यागराजस्ततः प्राह साञ्जलिं पुरतः स्थितम् ।
भद्रमस्तु महाभाग कारुण्याद्राघवप्रभोः ॥९१॥
नाहं वृणे भूषणानि दत्तां यस्तानि वाञ्छति ।
यदीच्छा भवतः स्थातुं भवेयं नास्मि रोधकः ॥९२॥
विद्योत्कृष्टं तु मां मत्वा न स्थातव्यं महामते ।
संपूज्यो राघवोऽस्माभिः सहितैरिति वर्तताम् ॥९३॥
कृच्छ्रात्स यतमानोऽपि यदा नैच्छद्दृढव्रतः ।
भूषणानि ग्रहीतुं स कुटुम्बिभ्यः स चादित ॥९४॥
वियुक्तो गर्वभारेण नियतो नियतेन्द्रियः ।
केशवो न्यवसत्तत्र शिष्यत्वं प्राप्य शान्तधीः ॥९५॥

इतिश्रीत्यागराजचरिते सुन्दरेशार्यविरचिते
" केशवसमागमो " नाम अष्टमः सर्गः ॥

अथ नवमः सर्गः ।

एकदा त्यागराजस्तु मायाह्ने संयतेन्द्रियः ।
कावेर्यां समुपास्ते स्म संध्यां स्नात्वा दृढव्रतः ॥१॥
समाप्याभिगते गेहं तिष्ठन्दूरे विनीतवत् ।
एको ववन्दे नियतो नूतनस्तु समागतः ॥२॥
तमाजुहाव पार्श्वे स त्यागराजो दयानिधिः ।
पप्रच्छ सादरं को नु किमर्थमिह चागतः ॥३॥
समीगतस्ततः प्राह प्राञ्जलिर्विनयान्वितः ।
अनन्तपुरसंस्थोऽस्मि यादवो रामपूजकः ॥४॥
गोविन्ददास इति मां वदन्ति पुरवासिनः ।
भगवान्करुणाम्भोधिः स्वप्ने मामिदमुक्तवान् ॥५॥
गच्छ पञ्चनदं क्षेत्रं दृष्ट्वा मद्भक्तपुंगवम् ।
त्यागराजं महाभागं कृतकृत्यो भविष्यसि ॥६॥
अनन्तस्य तदाज्ञां तु श्रुत्वा प्रीतिसमन्विताम् ।
द्रष्टुं भवन्तं त्वरितो महात्मानमिहागतः ॥७॥
दृष्टमात्रेण हृष्यामि भवन्तं राघवप्रियम् ।
अहो रामस्य करुणा स्वभक्तेषु विशेषतः ॥८॥
उपदेष्टुर्भवन्तं मे त्वविज्ञातं दुरासदम् ।
केन वा प्रतिकुर्वेऽहं राघवस्य दयानिधेः ॥९॥
स्पृहणीयो भवानद्य मानवैरखिलैरपि ।
यद्भवन्तं स्वयं रामो द्रष्टुं मां समचोदयत् ॥१०॥
राघवस्य भवान्नित्यं दर्शनाद्भवतः प्रभोः ।
पावितोऽस्मि महाभाग कृतकृत्योऽस्मि साम्प्रतम् ॥११॥
अभविष्यच्छुभानां तु दुर्लभां साधुसंगतिम् ।
मातेन किमनार्तं वा मया तु पुरुषर्षभ ॥१२॥

दृष्ट्वा भवन्तं तुष्यामि दृष्ट्वेव रघुपुंगवम् ।
दयार्द्रेण कटाक्षेण पालयैनं पदानतम् ॥१३॥
इत्युक्त्वा विनयात्पार्श्वे तिष्ठन्तं राघवप्रियम् ।
ननाम मनसा तं च राघवं शास्त्रनिश्चयात् ॥१४॥
ततः प्रोवाच धर्मात्मा प्रसाद्य विनयान्वितम् ।
आनन्दाश्रुपरिक्लिन्नवासाश्च स्मरणात्प्रभोः ॥२५॥
अहो रामस्य करुणा विषयीकृत्य मामपि ।
अचोदयद्भवन्तं च महाभागवतोत्तमम् ॥१६॥
यथा पितुर्वा मातुर्वा नालं पुत्रो यतोऽपि सन् ।
प्रतिकर्तुं यथा नाहं राघवस्य दयानिधेः ॥१७॥
इत्याभाष्य प्रियं तुष्टो नयंस्तं च गृहं ययौ ।
गृहद्वारे ददर्शाग्रे समवेतान्कुतूहलात् ॥१८॥
समागते त्यागराजे दर्शितश्छात्रसंचयैः ।
ववन्दे नियतस्त्वेकश्चरणौ संभ्रमेण च ॥१९॥
त्यागराजस्तु संवीक्ष्य नूतनं तं समागतम् ।
रुद्राक्षतुलसीकाष्ठमालाशोभितकंधरम् ॥२०॥
पप्रच्छ प्रीतिसंयुक्तः को वा कुत्र समागतः ।
करणीयं मया किं वा किमागमनकारणम् ॥२१॥
ततोऽब्रवीत्समायातो बहुमानात्कृताञ्जलिः ।
काशीवासिनमात्मानं रामदासाभिधं च सः ॥२२॥
अथोवाच भृशं तुष्टस्त्यागराजं दृढव्रतम् ।
आज्ञप्तो विश्वनाथेन स्वप्ने राघवबन्धुना ॥२३॥
गच्छ चोलान्स्वतः पुण्यान्कावेरीतोयमण्डितान् ।
तत्र पञ्चनदं क्षेत्रं पञ्चपापापनोदकम् ॥२४॥
त्यागराजो वसत्यत्र महाभागवतोत्तमः ।
दैवीं गानसमृद्धिं च भुवि विस्तारयन्स्वयम् ॥२५॥

प्रत्यक्षेणापि संदृष्टौ राघवौ तौ महात्मना ।
दृष्ट्वा तं पावयात्मानं भक्तिं तनुमतीमिव ॥२६॥
आदिष्टः शंकरेणेत्थं भवन्तं द्रष्टुमुत्सुकः ।
त्वरयाऽऽगतो विद्वन्पालयैनं महामते ॥२७॥
श्रुत्वा तद्वचनं श्लक्ष्णं श्रोत्रमानसयोः प्रियम् ।
त्यागेशो विस्मयाविष्टो रामप्रीतिमनुस्मरन् ॥२८॥
ततः प्राह मुदा युक्त आगतौ संगतानपि ।
मुञ्चन्नानन्दजं वारि पुलकाङ्कितविग्रहः ॥२९॥
अद्यैव दक्षिणादागाद्गोविन्दाख्यो महामतिः ।
संचोदितस्त्वनन्तेन प्रीत्या स्वप्ने यशस्विना ॥३०॥
सुदूरादौत्तरादद्य काश्या एकः समागतः ।
नियुक्तः प्रभुणा स्वप्ने जनमेनं निरीक्षितुम् ॥३१॥
कथं वा प्रतिकुर्वेऽहं रामस्य विदितात्मनः ।
महात्मनः प्रेषयति यो दीने मयि नित्यशः ॥३२॥
इत्युक्त्वा सह ताभ्यां स प्रविवेश गृहं मुदा ।
नत्वा च राघवं सर्वे पुरतः समुपाविशन् ॥३३॥
समागतौ तु तौ दृष्ट्वा तस्य पूजागृहं पुनः ।
राघवे परमां भक्तिं परां प्रीतिमुपागतौ ॥३४॥
परिवारेण रामोऽयं पूजितश्च विशेषतः ।
मनः प्रह्लादयन्भाति तेजसा द्योतयन्दिशः ॥३५॥
पूर्वजन्मसु वै तप्तमनेन बहुधा तपः ।
राघवं पूजयत्येवमियतीं भक्तिमाश्रितः ॥३६॥
ध्यायन्ताविति तौ हृष्टौ विनीतौ तमयाचताम् ।
त्यागराजं महाभागं गातुमेकां कृतिं तदा ॥३७॥
गायत तदा कृत्वा रामकारुण्यविस्मितः ।
ऋणात्कथं तु भवतस्तरिष्यामीति कीर्तनम् ॥३८॥

द्रवचित्तेन तेनाशु कृत्वा गीतां कृतिं तु ताम् ।
श्रुत्वा ते विस्मितास्तत्र त्यागराजमपूजयन् ॥३९॥
समागतावुभौ तत्र गाननृत्यपरायणौ ।
संघगानं च कुर्वन्तौ चिरायास्तां सुतर्पितौ ॥४०॥
व्यत्यस्तो गुणकर्मभ्यां जप्येशः पूर्वजः स्वयम् ।
नानुमेने च मनसा भ्रातुरेताः कृतीः पुनः ॥४१॥
नियच्छन्नुत्थितं कोपं बहोः कालादपि प्रभुः ।
नासोढ वर्धमानं तं संघं दूरादुपागतम् ॥४२॥
आप्रभातं कृतान्घोषान्गृणद्भी रामनाम तत् ।
वादित्रसंघशब्दांश्च स व्यगर्हयदन्ततः ॥४३॥
परितुष्टोऽपि स भ्रातुः संगीतज्ञानकीर्तितः ।
विव्यथे भ्रातुरुद्वीक्ष्य नैरपेक्ष्यं धनार्जने ॥४४॥
असंपादनशीलोऽपि प्राप्तेनैवापि वर्तयन् ।
बिभर्ति दुर्भरानेतान्किमिति व्याकुलोऽभवत् ॥४५॥
गन्तुमन्तरनीशं मां कुर्वन्नेष महाजनः ।
कोलाहलसमायुक्तः सर्वदा किल तिष्ठति ॥४६॥
पिताऽपि मे भगवति भक्तिमेवाकरोत्तदा ।
किमेष संघः संप्राप्तो घोषो वाऽपि सुदारुणः ॥४७॥
यदि याचति दीनारं स्वं गीतं श्रोतुमागतान् ।
तद्धनं मेरुशिखरमनुकुर्वीत किं न हि ॥४८॥
संभूता तस्य सा कन्या सीता सीतासमा ननु ।
विवाहकरणे किं वा करिष्यति स मूढधीः ॥४९॥
यतमानोऽपि कृच्छ्रेण कृतवानपि दुष्कृतीः ।
न लभे स्वल्पकं धान्यं धनं वा प्रेयसीप्रियम् ॥५०॥
इत्यादिभिर्बहुविधैश्चिन्तयित्वा स मन्दधीः ।
एकान्तमानाय्य सदा त्यागेशं पुनरब्रवीत् ॥५१॥

जाने त्वां बहुभिः शीलैरवृत्तं दुःखितं भृशम् ।
तथाऽपि वच्मि सौहार्दाद्भावृत्वमनुचिन्तयन् ॥५२॥
बुद्धिमांस्त्वं स्वभावेन वेदशास्त्राण्यधीतवान् ।
तथाऽपि बुद्धिमोहेन विपरीतेन वर्तसे ॥५३॥
अल्पज्ञानेन संयुक्ताः सामर्थ्यादुद्यमेन च ।
बहुद्रव्यमुपादाय सुखेन निवसन्ति ते ॥५४॥
अलंकृत्य सुतान्वम्यांस्तथा पत्नीगणानपि ।
भूषणैरतुलैर्दृश्यैर्मोदन्ते देववद्भुवि ॥५५॥
धनमेव हि संग्राह्यं कृच्छ्रादपि विपश्चिता ।
इह वा प्रेत्य वा सर्वं वर्तते तु यदाश्रयः ॥५६॥
धनिनं बहु मन्यन्ते धनिनश्चेतरे तथा ।
विद्वांसः सर्वशास्त्राणां राजानश्च पदे स्थिताः ॥५७॥
न कुलं गणयन्त्येते न वैदुष्यं शुभात्मताम् ।
दातृत्वं न च सौहार्दं महीयन्ते धनेन हि ॥५८॥
उत्सवेषु विवाहेषु संघेषु विविधेषु च ।
ज्वलन्ति किंनरीवच्च तेषां हि परमाः स्त्रियः ॥५९॥
धरन्त्यो बहुरूपाणि महार्हाण्यम्बराणि च ।
भूषा नूतनकल्पाश्च प्रेक्ष्यन्ते सस्पृहं जनैः ॥६०॥
पुमांसोऽपि महान्तस्ते भूषिता वसनैः शुभैः ।
संवृताः सेवकैस्तीक्ष्णैश्चरन्ति किल राजवत् ॥६१॥
पण्डिता अपि दीनास्ते दारिद्र्येणाभिपीडिताः ।
अनुगच्छन्ति तं नित्यं स्तुवन्तश्च तमेव हि ॥६२॥
कथं दृष्ट्वाऽपि तानेतान्बहुविद्यः सुधीरपि ।
नेच्छस्यर्जितुमर्थं वै क्षणाद्भुभ्यस्तु यस्तव ॥६३॥
कृच्छ्राच्च यत्तमानोऽपि नाहं प्राप्तुमलं धनम् ।
यतस्व संपादयितुं रोचते यदि मद्वचः ॥६४॥

भ्रात्रा ज्येष्ठेन कारुण्यादित्थमुक्तस्तदाऽनघः ।
पूजयन्मधुरैर्वाक्यैरित्युवाच महामतिः ॥६५॥
ज्येष्ठभ्राताऽसि संपूज्यः पितुस्तुल्यश्च मे भवान् ।
यदि वक्त्युचितं कर्तुं सर्वथा कृतमेव तत् ॥६६॥
अनर्थे त्वर्थभावोऽसौ प्राप्तो हि भवता विभो ।
संपादनीयं तु कथं धनं ज्ञातवता पुनः ।६७॥
सुखसाधनबुद्ध्यैव धनमिच्छन्ति मानवाः ।
अहिडिम्भं यथा बालो लौल्याद् बुद्धिविमोहतः ॥६८॥
वर्तते कुत्र वा सौख्यमायकालेऽथ रक्षणे ।
व्ययकालेऽथ वा सौख्यं नेक्षेऽहं विमृशन्नपि ।६९॥
जानामि दुःखगम्यं तद्दुःखस्यायतनं महत् ।
दुःखमुत्पादयत्येव दुःखे चैव समाप्यते ॥७०॥
सुखत्वं यदि वित्तस्य गुणो भवति नित्यशः ।
सुखिनः किमु वित्ताढ्याः सर्वे ते सर्वदा नराः ॥७१॥
नर्थैव धनहीनाश्च दुःखेनैवाभिपीडिताः ।
सुखलेशमनासाद्य वर्तन्ते किमु मानवाः ॥७२॥
अस्तु वा सुखदायित्वं वित्तस्य किमु वा फलम् ।
अपायसहितं चैव सर्वथाऽनित्यमेव च ॥७३॥
वित्तसंचयसंपन्ना दिवं गच्छन्ति तं विना ।
अथ वाऽग्रेव तिष्ठन्तं परित्यज्य स गच्छति ॥७४॥
इत्थं त्वनित्ये वित्ते तु को रमेताबुधोऽपि सन् ।
परिहारसमासाद्यचिन्तशान्तिफले नरः ॥७५॥
सार्धं सविनयं चैव साधुशीलेन सादरम् ।
इत्थमुक्तस्तदा ज्येष्ठः क्रोधाद्वचनमब्रवीत् ॥७६॥
किं मन्यसे त्वमात्मानं सर्वज्ञं वाऽपि पण्डितम् ।
पण्डितानिवरार्धेव मूढानपि विगर्हितान् ॥७७॥

यमुपास्से सोऽपि रामः प्रियभ्रात्रोदितं वचः ।
अनादृत्य गतोऽरण्यं कां कां नावाप चापदम् ॥७८॥
तथैव भविता नूनं तव चाद्यैव दुर्भग ।
प्रियेणोक्तं मया वाक्यं यतो नाद्रियसेऽधुना ।७९॥
धिक्त्वां सुगर्वितं क्षुद्रं मूढं पण्डितमानिनम् ।
इत्युक्त्वा क्रोधताम्राक्षः क्षणादन्तर्दधे तदा ॥८०॥
त्यागेशः स तु धर्मात्मा भ्रातृकोपेण विह्वलः ।
राघवं प्रार्थयामास भ्रातृसौशील्यसंपदे ॥८१॥

॥ इति श्रीत्यागराजचरित्रे सुन्दरेशार्यविरचिते
'जप्येशोपदेशो' नाम नवमः सर्गः ॥

अथ दशमः सर्गः ।

भ्रात्रा यवीयसा प्रोक्तमर्थयुक्तं वचः शुभम् ।
श्रुत्वा शान्तिमनापन्नो जप्येशो विह्वलोऽभवत् ॥१॥
अशान्तमनसा चैव दुर्निवारार्थकामतः ।
असुखार्तो भृशं क्रुद्धो व्यपीददपि लज्जया ।२॥
कावेरीं प्रययौ तूर्णं पूर्णां परमवारिणा ।
सायाह्ने निर्वृतिं प्राप्य त्वधिगन्तुं च निश्चयम् ॥३॥
शिलातलमथासाद्य दिशं पश्यंश्च दक्षिणाम् ।
मनसा दूयमानेन मौनेनैवाभ्यवर्तत ॥४॥
चिरात्स चिन्तयामास कथं कृच्छ्रगतोऽस्म्यहम् ।
प्रेयस्या वा सुताया वा प्रतिवक्ष्यामि किं वचः ।५॥
सा तुदत्यर्थकामा मां महार्हव्यसनाय च ।
दृष्ट्वा सुतास्तु धनिनां भूषणेभ्यश्च बालिका ॥६॥
यत्नोऽपि बहुधा कृच्छ्राच्चिकीर्षुरपि दुष्क्रियाः ।
नावापमद्य दीनारं काचं वा काञ्चनं विना ॥७॥

भ्राता स्वयं त्यागराजः सर्वशास्त्रेषु पण्डितः ।
निःस्पृहो निरनुक्रोश उञ्छवृत्त्या तु जीवति ॥८॥
धनान्यपि तु दत्तानि कारुण्यात्पुरवासिभिः ।
सर्वाण्यतिथिसात्कृत्वा मोदते बालवच्छठः ॥९॥
यदहं वच्मि तत्कुर्याद्यवीयानिति निश्चयात् ।
इयन्तं कालमनयं स तिरस्कुरुते वचः ॥१०॥
उपकारेण हीनोऽपि संघं कृत्वा तुदत्ययम् ।
दुःश्रवैरुच्चघोषैश्च दिवारात्रमतन्द्रितः ॥११॥
यत्र कुत्रापि चागत्य चिरायाधिवसन्गृहम् ।
अट्टहासं वितन्वानः किमयं कुरुते जनः ॥१२॥
भक्षयन्निखिलं वस्तु वडवाग्निरिवाम्बुधिम् ।
किमर्थमत्र वसति रामनाम वदञ्जनः ॥१३॥
यदा विवासयाम्येनं दुर्धरं दुर्भगं जनम् ।
गृहादस्मात्तदा शान्तिर्मनसो मे भविष्यति ॥१४॥
संघेनानेन मे भ्राता चोत्पथं गमितो दृढम् ।
कुरुते निखिलं कर्म तेनैव किल चोदितः ॥१५॥
यदि संघेन मुक्तं तं भ्रातरं तु तनोम्यहम् ।
भूत्वा च मद्वशो नूनं स कुर्यान्मे चिकीर्षितम् ॥१६॥
कथं वा प्रोषितं संघं पश्यामि च चिरोषितम् ।
तदा संचिन्तयन्नित्थं नाध्यगच्छत्स निश्चयम् ॥१७॥
समालोच्य चिरं दीनः कुबुद्धिः कोपमास्थितः ।
संभ्रमेण तदोत्तस्थौ निश्चयं प्राप्य चात्मनि ॥१८॥
स एव मार्गस्तान्मूढानल्पान्द्रावयितुं पुनः ।
त्यागराजं वशीकर्तुमिति मन्दमुवाच सः ॥१९॥
अनेनैव हि संघोऽपि घोषमुत्पादयन्महान् ।
विवास्यते मयाऽद्यैव मत्वेत्थं स ननन्द च ॥२०॥

स गत्वा भवनं वेगात्संतुष्टहृदयस्तदा ।
पाकागारं प्रविश्याशु प्रेयसीं प्राह सस्मितः ।।२१।।
इयं सा ह्यन्तिमा रात्रिर्जनौघस्यात्र तिष्ठतः ।
प्रभाते खलु सुश्रोणि सर्वं विद्रावितं भवेत् ।।२२।।
मदधीनस्त्यागराजो भविष्यति सुलोचने ।
संपादितेन वित्तेन स्यावास्य सुखिनौ प्रिये ।।२३।।
इत्यमुक्त्वा स जप्येशो मन्दधीः पापनिश्चयः ।
सस्वजे प्रेयसीं हृष्टः कार्यपूर्तिविनिश्चयात् । २४।।
श्रुत्वैतद्वचनं भर्तुरपूर्वममृतोपमम् ।
प्रहर्षकौतुकाक्रान्ता जगादेदममर्षणा ।।२५।।
केनेदमद्य संपन्नं चिरात्समभिकाङ्क्षितम् ।
को वाऽस्य वक्ता कार्यस्य करणे बुद्धिसत्तमः ।।२६।
ततः प्राह स्म जप्येशः स्मयमानो मनस्विनीम् ।
वक्तव्योऽहं किमन्येन स्वबुद्ध्यैवं विनिश्चितम् ।।२७।।
वदन्नित्थं स मन्दात्मा कथयामास तद्गृहः ।
करिष्यमाणं तत्कर्म श्रुत्वा सा विस्मिताऽभवत् ।।२८।।
चिरं विमृशतोः किं नो पूर्वं चेतसि नास्फुरत् ।
कालं प्रतीक्षते सर्वमित्येतत्सत्यमेव हि ।२९।।
प्रवृत्ते संघगाने त्वं गच्छ प्रीतिं विडम्बयन् ।
निर्वृत्ते निश्चिते न त्वां संदिहीरन्निमे जनाः ।।३०।।
इत्युक्त्वा सा तु भर्तारमसह्यशुभदर्शना ।
त्वरयामास गन्तुं तं पूजाकालकुतूहलात् ।।३१।।
गतस्तत्र ततो दृष्ट्वा धनिकान्पण्डितानपि ।
नानानगरवास्तव्यान्वणिजश्च स्वलंकृतान् ।।३२।।
अनुमोक्तुं गानरसं त्यागराजस्य संगतान् ।
अपाक्रमत किंचीत्स भयेनापि च लज्जया ।।३३।।

आयान्तं भ्रातरं दृष्ट्वा समदृष्टिस्तदा सुधीः ।
संभ्रमेण समुत्थाय विनयेन प्रणम्य च ॥३४॥
पार्श्वे तमुपवेश्यापि चोपविष्टस्तदाज्ञया ।
उवाचेदं वचो मन्दमानन्दाश्रुपरिप्लुतः ॥३५॥
भ्रातरद्य कृतार्थोऽस्मि यद्भवानत्र संगतः ।
चिराय प्रार्थितो विद्वन्नद्यैव करुणां व्यधाः ॥३६॥
पश्यत्वद्य रघूत्तंसं हृदयानन्दकारकम् ।
यथा मे प्राणभूतोऽयं भवतो भवतु प्रभो ॥३७॥
यथा नन्दामि तं दृष्ट्वा पूर्णचन्द्रमिव प्रजाः ।
तथा नन्दतु मे भ्रातः पूज्या च भवतः प्रिया ॥३८॥
यमेव पश्यञ्जीवामि भवेयं च विना मृतः ।
सेयं राघवमूर्तिस्तु प्रयच्छतु भवत्प्रियम् ॥३९॥
संसाराम्बुधिमग्नोऽपि यत्पदं पोतमावहन् ।
मोक्षपारं परं गच्छेदाराधयतु तं प्रभुम् ॥४०॥
अन्तर्बहिश्च यस्तिष्ठञ्ज्ञानंश्च हृदयस्थितान् ।
शिक्षारक्षणकारी तमाराधयतु राघवम् ॥४१॥
इत्युक्त्वा च पुनर्नत्वा पूजां कृत्वा यथाविधि ।
अगायदथ गीतानि भ्रात्रागमनकौतुकी ॥४२॥
बकुलैर्मल्लिकाभिश्च चम्पकैः केतकीदलैः ।
कुसुमैर्भूषितं रामं जप्येशस्तं ददर्श सः ॥४३॥
सर्वैराभरणैश्चैव भूषितं नेत्रहारिभिः ।
तेजसा ज्वलितं दृष्ट्वा नितान्तं मुमुदे तदा ॥४४॥
पूजयामास च पिता तथा मम पितामहः ।
कथमेतत्तु सौन्दर्यं नूतनं प्रतिभाति मे ॥४५॥
अहो दुष्प्रसहं तेजो दिधक्षति च लोचनम् ।
तथाऽपि करुणाऽपाङ्गैर्वर्षतीवामृतं पुरः ॥४६॥

इत्येवं चिन्तयंस्तत्र विस्मयस्तिमितेक्षणः ।
पश्यन्राघवमूर्तिं च स्तब्ध एव व्यतिष्ठत ॥४७॥
समागतास्तथाऽगायन्द्वियामावधि सुस्वरम् ।
सर्वे संतुष्टमनसः सर्वे रामपरायणाः ॥४८॥
बोधितः शिष्यवर्गेण कालात्ययममन्दधीः ।
प्रास्वापयद्रघूत्तंसं क्षीरभक्ष्यं निवेद्य सः ॥४९॥
यथाऽऽगतं गताः सर्वे प्रहृष्टमनसस्तदा ।
जप्येशोऽपि कृतां पूजां प्राप्य भ्रात्रा यवीयसा ॥५०॥
स स्वमन्तर्गृहं गत्वा स्वास्तीर्णशयने स्थितः ।
चिन्तयामास कर्तव्यं विह्वलेनान्तरात्मना ॥५१॥
पण्डिता वित्तवन्तश्च सर्वे ते राजसंमताः ।
समायान्त्यादराद्द्रष्टुं राघवं महदुद्दीपितम् ॥५२॥
यदि ज्ञास्यन्ति ते सर्वे क्रियमाणां तु मत्कृतिम् ।
कथं मया विलज्जेन गन्तुं शक्यं बहिः पुनः ॥५३॥
अथ वा त्यागराजस्तु बहिःप्राणमिव स्थितम् ।
श्रुत्वा प्रनष्टं शुद्धात्मा कथं वा धारयेदसून् ॥५४॥
मन्त्रेणाराधितो रामो लक्ष्मणेनापि संवृतः ।
हरणायोद्यतं मां किं न दहेदसुरान्तकः ॥५५॥
अहो नु खलु मूढेनासमालोच्यैव केवलम् ।
महद्धि कर्तुमारब्धमात्मनाशकरं तु यत् ॥५६॥
मया करिष्यते कर्म नैव कृच्छ्रेण वर्तिना ।
अनिर्णेयफलावाप्ति त्वसंदिग्धाशुभप्रदम् ॥५७॥
इत्यालोच्य चिरं सम्यग्गुणागुणविवेचनम् ।
सुष्वाप शयने स्वस्थः शान्तचित्तेन्द्रियस्तदा ॥५८॥
पूर्वं सुप्ता तु तत्पत्नी प्रबुद्धा प्रेक्ष्य नायकम् ।
प्रसुप्तं गाढनिद्रं तं हस्तेन समताडयत् ॥५९॥

स तु प्रबुद्धः कोपात्मा गर्हमाणः प्रियां तदा ।
शिश्ये पुनर्दृढं बद्ध्वा तूपधानद्वयं मुदा ॥६०॥
ततः सा क्रोधना चण्डी बलादुद्धृत्य तं स्वयम् ।
स्फुरितोष्ठाधरपुटा रोषाद्वचनमब्रवीत् ॥६१॥
किं धाऽद्य शेषे स्वस्थस्त्वं कार्यकालेऽभ्युपागते ।
स्वयमागत्य मामुक्त्वा करिष्ये कर्म तत्त्विति ॥६२॥
अर्धरात्रिरियं भीमा शोभते मग्नतारका ।
आवृता चान्धकारेण महता घोरदर्शना ॥६३॥
संवृतं गगनं मेघैर्वर्षर्तुविभवोद्यतैः ।
हिमशीकरवद्दुर्पद्वारिधारापरिप्लुतैः ॥६४॥
गम्भीरस्वनितेनापि तडिद्भिश्च पथि स्थितान् ।
तर्जयन्तीव जलदाः कुलटास्तस्करानपि ॥६५॥
पुत्री ते दुर्धराऽद्येति सख्याय प्रहितोऽब्धिना ।
दूतवच्छ्वशुराधाशु पुरोवातः प्रसर्पति ॥६६॥
वातायनकपाटानि दृढं बद्ध्वा स्वपन्ति ते ।
रहः करणयोग्यानि दुष्कृतानि भवन्ति हि ॥६७॥
बहूदका च कावेरी बहुसंवर्तसंकुला ।
यतमानैस्तथाऽस्माभिः प्रक्षिप्तो नाभिगम्यते ॥६८॥
भुक्त्वा यथेष्टं विश्रान्ताः स्वपन्त्युदरिणः पुनः ।
संगतः शिष्यवर्गश्च भ्रातुस्तेऽद्य शुभान्वित ॥६९॥
त्यागराजः प्रमत्तस्तु जाग्रद्रात्रिषु नित्यशः ।
प्रलपन्नाम रामेति सर्वथा ननु तिष्ठति ॥७०॥
मद्भाग्यपरिणामेन सोऽपि सुप्तो दृढव्रतः ।
तत्पत्नी कमलाम्बाऽपि कमलिन्या समा निशि ॥७१॥
उत्तिष्ठ कुरु तत्कर्म पुरा यदभिनिश्चितम् ।
धीरोऽपि सर्वकार्येषु कथं भजसि दीनताम् ॥७२॥

व्यवस्यति न काले यः कदाचिदपि संगते ।
पश्चात्तापाभिभूतोऽपि प्राप्नुयात्किमसौ फलम् ॥७३॥
इत्युक्तः प्रियया धृष्टं वचनं मरणोपमम् ।
विषादन्विह्वलः प्राह नैतद्युक्तमितीरयन् ॥७४॥
सुप्तं भुजंगं चरणैर्बोधयन्निव मूढधीः ।
अवोचं निश्चयं तन्वि यन्न सम्यग्विचिन्तितम् ॥७५
यदर्थमयमारम्भः क्रियते वरवर्णिनि ।
न तदाप्यं मया देवि विपरीतफलं नु तत् ॥७६॥
प्रनष्टे रामचन्द्रे तु प्राणभूते मनोहरे ।
त्यागेशः स तु धर्मात्मा वर्तयिष्यति वा कथम् ॥७७॥
मृते वा च मृतप्राये तस्मिन्भवति भामिनि ।
कथं धनार्जनं शक्यं तेन वा तस्य साम्प्रतः ॥७८॥
तस्मिन्हि पुरुषव्याघ्रे विद्यार्हगुणकर्मभिः ।
प्रीतिं परामुपगतो जनः पञ्चनदालयः ॥७९॥
यदि प्रकाशतां याति कुकर्मैतत्कृतं मया ।
अपवादोपसर्गौ च भवेतां मम निश्चितम् ॥८०॥
प्रनष्टे राघवे वाऽपि को वा निश्चितमन्तरः ।
विद्रावयति शुद्धात्मा जनसंघमितस्त्वति ॥८१॥
स चापि मम वश्यत्वं प्राप्नुयाद्वा कथं सुधीः ।
अथ वा स भवेत्खिन्नः शोकेन मयि दारुणः ॥८२॥
दुरुक्तोऽपि निरस्तोऽपि मया न प्रतिवक्ति च ।
कथं धर्मात्मने तस्मै द्रुह्येयमपि पातकी ॥८३॥
उद्योजितस्त्वयाऽद्यैव गतः पूजागृहं प्रिये ।
पश्यत्सु जनसंघेषु पूजां कीदृशमाचरत् ॥८४ ।
पूजिताश्च महीपालैः पण्डितास्तत्र विश्रुताः ।
पार्श्वासने पुरस्तेषां न्यमन्त्रयादिमं यतः ॥८५॥

सर्वे मामेव पश्यन्ति बहुमानेन भामिनि ।
इत्थं प्रियस्य मे भ्रातुः कथं कुर्यां प्रियेऽप्रियम् ॥८६॥
इत्युक्ता साश्रुनेत्रेण प्रियेण सुहृदा तदा ।
जगाद वाक्यं वाक्यज्ञा मन्दं कर्णे त्वरान्विता ॥८७॥
बुद्धिमान्व्यवसायीति देशकालज्ञ इत्यपि ।
मन्वाना ह्यभवं नाथ दृष्ट्वा तेऽद्यैव भीरुता ॥८८॥
त्वया ह्युक्तं पुरा नाथ भृशं संप्रार्थितोऽपि सः ।
नेच्छतीति त्वया श्रोक्तं कर्तुं वा श्रोतुमेव वा ॥८९॥
पितृतुल्यस्य ते वाचमकुर्वति सुदारुणे ।
कथं करिष्यसि दयां श्वपाके कुलजामिव ॥९०॥
त्वयैव पूर्वं रुदितं भ्राताऽयं न ममेति च ।
संप्रार्थितोऽपि दीनेन न करोति यदा वचः ॥९१॥
प्राणभूतास्तु ते भ्रातुर्विग्रहास्ते न संशयः ।
न म्रियेत प्रनष्टेषु पुनर्लाभविशङ्कया ॥९२॥
क्रन्देद् भृशं तथा मुह्येद्विह्वलः स ससंभ्रमम् ।
स्थिरो भवेत यद्यावां कथं वा न वशो भवेत् ॥९३॥
न वृणे चापि वश्यत्वं कृतस्य तु प्रतिक्रिया ।
कर्तव्या मानिना नाथ तस्मात्कुरु सुनिश्चितम् ॥९४॥
त्यजाकारणजातं च कारुण्यं ज्ञातिषु प्रभो ।
विद्राविते च तत्संघे नूनं पश्यसि च क्षणात् ॥९५॥
भजन्ति सर्वे संतुष्टं तथा दुःस्थं त्यजन्ति च ।
कथमेनं नृशंसोऽयं क्रन्दन्तमनुयास्यति ॥९६॥
तस्मादनेन कार्येण गतसंघस्तु मानद ।
निरुपद्रवको नूनं भवता भवतु प्रभो ॥९७॥
कुरु कल्याणचित्तस्त्वं भ्रातुस्तव यवीयसः ।
अद्य विप्रियभूतं तु भविष्यच्छुभदापि तत् ॥९८॥

कथं तु दुर्भरं संघमुञ्छवृत्त्या तु वर्तयन् ।
भरिष्यति स शुद्धात्मा कृपां कुरु सुते यथा ॥९९॥
जानीयुर्वा कथं लोका भवतैव कृतं त्विति ।
यत्र शिष्याश्च पत्नी च संगता बहवः परे ॥१००॥
स्वभावकुशला स्त्रीत्वात्तथा च नयपण्डिता ।
अकार्यं कार्यरूपेण कर्तुं तं सा न्ययोजयत् ॥१०१॥
श्रुत्वैव वचनं तस्या भ्रातू रक्षणसंहितम् ।
मूढात्मा च तथेत्युक्त्वा कर्तुमेव प्रचक्रमे ॥१०२॥
उत्तरीयं दृढं बद्ध्वा कूर्चकेशांश्च सत्वरः ।
पूजागृहं ययौ मन्दं स्खलच्चरणयुग्मकः ॥१०३॥
मन्दं विन्यस्य चरणौ पश्यन्नपि चतुर्दिशः ।
गत्वा पदानि सप्ताष्ट व्यतिष्ठत भयाकुलः ॥१०४॥
ततः स चिन्तयामास दुष्कृतिं कर्तुमुद्यतम् ।
यदि पश्येयुरेते मां किं न कुर्युर्गतायुषः ॥१०५॥
इति संचिन्त्य मनसा भयेन विकलीकृतः ।
यत्र तिष्ठति पश्यन्ती भार्या तत्र समाययौ ॥१०६॥
प्रत्यागतं तु तं दृष्ट्वा ललना सा त्वमर्षणा ।
प्रणयादिव संकुद्धा प्रोवाच वचनं तदा ॥१०७॥
समालोच्यैव भीरुत्वं न करोति वचस्तव ।
अन्यथा तु कथं शक्यमवमन्तुमिहाग्रजम् ॥१०८॥
व्याधिग्रस्तेन वा साध्यं प्रमत्तेनाकुलेन वा ।
अपादपाणिना कर्म न कथंचन भीरुणा ॥१०९॥
न पश्यामि तु तद्धैर्यं कथं पुरुषपुंगव ।
अबलासु च योषित्सु दृश्यते श्रूयतेऽपि च ॥११०॥
न हन्तुं भ्रातरं वच्मि नापि तच्छास्त्रसंचयान् ।
अल्पमेतत्कथं कर्तुं भीरुत्वं प्रतिपाद्यसि ॥१११॥

तिष्ठात्र वसनं दीर्घं छादयन्मम पण्डित ।
द्रुतं गत्वा तु तत्कर्म क्षणान्निर्वर्तयाम्यहम् ॥११२॥
इत्युक्तवत्यां भार्यायां कोपशोकविमोहितः ।
ययौ तूर्णं तु तद्गेहं कार्यं कर्तुं समुद्यतः ॥११३॥
सुगन्धिकुसुमैश्चैव धूपैश्च घ्राणहारिभिः ।
वासितं प्रविवेशाशु गेहं तद्दीपशोभितम् ॥११४॥
प्रविष्टमात्रः सोऽपश्यद्भक्ष्याणि विविधानि तु ।
पश्यतस्तस्य सुस्राव जिह्वाया अम्बुबिन्दवः ॥११५॥
अनादृत्य तु तानार्तो भार्यावाक्यवशंवदः ।
तिरस्करणिकां गत्वा व्यतिष्ठत भयाकुलः ॥११६॥
कम्पमानकराग्रेण व्यपनेतुं तिरस्क्रियाम् ।
अक्षमो विक्लवश्चैव संविग्नचरणस्तदा ॥११७॥
अतिष्ठच्च चिरं तत्र भयसंमोहपीडितः ।
स्वेदाप्लुतशरीरश्च कथंचिदिव दुर्मनाः ॥११८॥
दार्ढ्यमापाद्य मनसः कृच्छ्राद्धैर्यमवाप्य च ।
तिरस्करणिकां सम्यग्मीलिताक्षस्त्वपानयत् ॥११९॥
आहृत्य तां ततो भीरुः किंचित्पृष्ठेऽपसृत्य च ।
उन्मीलितुं तदा यत्तो न शशाक भयेन सः ॥१२०॥
उन्मील्य नेत्रे कृच्छ्रेण भयसंविग्नचेतनः ।
मन्दं मन्दं रामपार्श्वं स्विन्नगात्रोऽभ्युपाययौ ॥१२१॥
सोऽपश्यद्रामचन्द्रं च परिवारसमन्वितम् ।
सुगन्दचन्दनैरक्तं सुमालासुशोभितम् ॥१२२॥
कटकाङ्गदकेयूरवलयादिविभूषितम् ।
पीताम्बरेण कौशेयैः परिधानेन शोभितम् ॥१२३॥
श्वेतच्छत्रेण रम्येण चामरव्यजनैः शुभैः ।
पार्श्वस्थैः शोभमानमयोध्यां यथा पुरा ॥१२४॥

निरीक्षमाणो रामं च लक्ष्मणं जानकीमपि ।
मन्त्रैराराधितं तुष्टः प्रणनाम मुदाऽन्वितः ॥१२५॥
पश्यन्नपि चिरं राममतृप्यन्मुदितस्तदा ।
राम रामेति गायंश्च ननर्त भृशमोहितः ॥१२६॥
उपलभ्य क्षणात्संज्ञां पार्श्वे दृष्ट्वा ससंभ्रमः ।
सभयश्चिन्तयामास किमिदं मामुपस्थितम् ॥१२७॥
रामदर्शनमात्रेण कथमेनां दशां गतः ।
गायामि नृत्यामि पुनर्नमामि च सहस्रशः ॥१२८॥
क्षणादन्तर्दधे तोषो भार्याहेलनचिन्तनात् ।
शनैर्मालाश्च पुष्पाणि करेणाक्षिपदन्यतः ॥१२९॥
भूषणान्यवमुच्याशु वस्त्रे बद्ध्वा दृढं तदा ।
मन्त्रपूताञ्चाघवादिविग्रहांश्च जहार सः ॥१३०॥
मुखवातेन निर्वाप्य दीपान्स च विमूढधीः ।
प्रययौ गृहपृष्ठेन पत्न्या किंचिदनुद्रुतः ॥१३१॥
वस्त्रेणाच्छाद्य गच्छन्तं दृष्ट्वा प्रीता पतिं तदा ।
अनुवव्राज सीमान्तं प्रार्थिता प्रत्युपागता ॥१३२॥
अमार्गेणैव गच्छन्स गृहपृष्ठेषु दुष्टधीः ।
गाढान्धकारे मार्गे च निपपात पुनः पुनः ॥१३३॥
पतन्भूमिषु गर्तेषु स्खलंश्चोन्नतभूमिषु ।
कण्टकाविद्धसर्वाङ्गः पङ्कदूषितलोचनः ॥१३८॥
तिर्यग्गतं च मार्जारं भुजंगं च भयावहम् ।
दृष्ट्वा संविग्नहृदयः प्रस्खलच्चरणश्च सः ॥१३५॥
रात्रौ यामावशिष्टायां गगने गततारके ।
वर्षत्यम्बुधरे मन्दं पुरोवाते भयावहे ॥१३६॥
उल्लूकगणशब्देन शिवानां निनदेन च ।
घोरायामेव रात्रौ स पिशाच इव गच्छति ॥१३७॥

अदूरादेव कावेरीं तोयपूर्णां ददर्श सः ।
आवर्तैर्बहुभिर्गर्तैरगाधां जाह्नवीमिव ॥१३८॥
प्राप्य तीरं तु कावेर्याः पश्यन्नाशां च दक्षिणाम् ।
अपातयन्महागर्ते विग्रहांश्च स मन्दधीः ॥१३९॥
तस्य पातयतो देहः प्राकम्पत भृशं तदा ।
नेत्रे चावर्षतामश्रु हृदयं भयमाविशत् ॥१४०॥
आगतेनैव मार्गेण त्वरमाणो गृहं ययौ ।
पश्यन्नेव चतुर्दिक्षु भूपकेभ्योऽपि शङ्कितः ॥१४१॥
प्रतीक्षमाणा भार्याऽथ प्रत्यागमनमञ्जसा ।
कार्यकारिणमायान्तं भर्तारं प्रेक्ष्य हर्षिता ॥१४२॥
उवाच च वचो मन्दं परितुष्टाऽस्मि सांप्रतम् ।
यद्भवान्व्यवसायेन निश्चितं तन्नयात्सुधीः ॥१४३॥
क्व वाऽऽभरणजालानि महार्हाणि महान्ति च ।
पितुर्गृहमुपादाय करिष्ये नूतनं मम ॥१४४॥
इत्युक्तस्तु तदा पत्न्या रक्तया नूलभूषणे ।
संभ्रमेण तदाऽपश्यत्तद्दद्धं स्वोत्तरीयकम् ॥१४६॥
विषादेन ततः प्राह प्रेयसीं भूरितोषिताम् ।
अहो मूढेन तद्वस्तु पातितं हि सरिज्जले ॥१४६॥
इदं बद्धानि वस्त्रे मे भूषणान्यखिलान्यपि ।
संभ्रमेण निवृत्तेन पातितानि च तान्यहो ॥१४७॥
मा रोषं भज कार्येऽस्मिन्शोकं वा मोहमेव वा ।
शय्यां भज विशालाक्षि स्वप्स्यामि च यथापुरम् ॥१४८॥
इत्युक्त्वा शयनं प्राप्य कृतकृत्यमन्यत ।
भूषानाशाकुला साऽपि कृतकृत्येत्यमन्यत ॥१४९॥

॥ इति श्रीमत्त्यागराजचरिते श्रीसुन्दरेशार्यविरचिते
'रामप्रेषो' नाम दशमः सर्गः ॥

अथैकादशः सर्गः ।

प्रत्यूषे तु ततः प्राप्ते प्राच्यां जातेऽरुणोदये ।
विबुद्धस्त्यागराजस्तु संभ्रमेणाह्वयत्स्थितान् ॥१॥
नृसिंहरामगोपालाः क्षणादिह विबोधत ।
'स्वप्नो मयाऽद्य संदृष्टो दारुणश्च भयावहः ॥२॥
आहूतास्ते तु गुरुणा विबुद्धाः संभ्रमान्विताः ।
आययुर्गुरुमासीनं पत्नी च कमलाम्बिका ॥३॥
तानुवाच स धर्मात्मा विह्वलान्पुरतः स्थितान् ।
दृष्टः स्वप्नो मया ह्यद्य येनाहं कलुषीकृतः ॥४॥
वेपते च शरीरं मे चेतो मुह्यति चासकृत् ।
अश्रूणि वर्षतो नेत्रे किं वक्ष्ये कृपणस्त्वहम् ॥५॥
अत्र चैकः समागत्य सर्वानस्मान्ददर्श ह ।
सुप्तान्संवीक्ष्य संतुष्टो ययौ रामनिकेतनम् ॥६॥
इति ब्रुवन्नेव तदा मोहेन निपपात सः ।
आश्वासितश्छात्रसंघैर्दीनः प्रोवाच सत्वरः ॥७॥
स गत्वा रामनिलयं व्यपनीय तिरस्क्रियाम् ।
इत्थमुक्त्वा त्यागराजः पुनर्मोहमुपाययौ ॥८॥
व्यपीदच्छिष्यवर्गश्च पत्नी च कमलाम्बिका ।
व्यजनैर्वीजयामासुर्बुद्धिमोहस्य शान्तये ॥९॥
लब्धसंज्ञस्ततः प्राह रुदन्नेव महायशाः ।
राघवं लक्ष्मणं सीतां गतस्त्वाहूय दक्षिणाम् ॥१०॥
इत्युक्त्वा त्यागराजस्तु स्विन्नगात्रो रुदंस्तदा ।
स्वेदक्लिन्नशरीरश्च मोहेन निपपात सः ॥११॥
संभ्रान्ताश्च ततः सर्वे परितः समवस्थिताः ।
वीजयन्तश्च ते केचिन्नेत्रे प्रममृजुः करैः ॥१२॥

एवं गुरौ शयाने तु विसंज्ञे प्राप्तसाध्वसे ।
एकोऽद्रवत्तदा तूर्णं द्रष्टुं तद्रामसन्दिरम् ॥१३॥
स गत्वा भवनं तत्र ददर्श भुवि पातिताः ।
सुमनालाश्च रम्यास्ता दीपानिमितानपि ॥१४॥
तिरस्क्रियां व्यपेतां च परिवारेण संयुतम् ।
हृतं तं राघवं चैव सर्वाभरणभूषितम् ॥१५॥
दृष्टमात्रेण चुक्रोश भयसंविग्नमानसः ।
सर्वे समागतास्तत्र संभ्रान्ताश्चाकुलेन्द्रियाः ॥१६॥
तद्दृष्ट्वा सुमहत्कर्म कृतं घोरतमं पुनः ।
सर्वे मूढधियश्चासंस्त्यागेशप्राणरक्षणे ॥१७॥
स्वप्नदर्शनमात्रेण रामप्राणो गुरुः पुनः ।
इमामवस्थां गमितो विसंज्ञश्च भुवं गतः ॥१८॥
कथमेनं पुनर्दृष्ट्वा प्रत्यक्षेण महायशाः ।
असह्यमस्माकमपि स प्राणान्वर्तयिष्यति ॥१९॥
नूनं किल महात्मा स परित्यक्ष्यति जीवितम् ।
सहिष्यते कथं घोरं कार्यमेतदचिन्तितम् ॥२०॥
कमलाम्बा महाभागा वर्तयिष्यति वा कथम् ।
विहाय राघवं चैव पतिं प्राणसमं तथा ॥२१॥
अस्माभिर्वा कथं त्वत्र वर्तितव्यं शुभात्मभिः ।
गुरौ गते सपत्नीके महत्कष्टमुपागमत् ॥२२॥
इत्येवं चिन्तयन्तस्ते विह्वलेनान्तरात्मना ।
न शेकुस्तं तु गुरवे विज्ञापयितुमन्ततः ॥२३॥
चिरेण संज्ञां संप्राप्य पत्नीमेकां निरीक्ष्य च ।
विह्वलस्त्यागराजस्तु प्राह दीनामवस्थिताम् ॥२४॥
वर्तसे कथमेका त्वं क्व च्छात्रास्त्वद्य ते गताः ।
मनो मुह्यति मे कान्ते स्वप्नसंदर्शनादिह ॥२५॥

शक्यते न मयोत्थातुं गन्तुं वा वरवर्णिनि ।
नय मां रामगेहं तद्यत्र निर्वृतिमाप्नुयाम् ॥२६॥
तमेव दृष्ट्वा दीर्घाक्षं चक्षुर्मानसहारिणम् ।
मोहं च विसृजान्येनं प्राप्तवानि बलं पुनः ॥२७॥
इत्युक्तवन्तं भर्तारमामृशन्ती करेण सा ।
मन्दमुत्थापयामास विह्वला विह्वलं स्वयम् ॥२८॥
दत्तहस्तस्तया देव्या मन्दं रामगृहं ययौ ।
अदूरादेव सोऽपश्यच्छिष्यान्बाष्पसमाकुलान् ॥२९॥
तान्दृष्ट्वा दीनवदनान्साश्रुनेत्रान्भृशार्दितान् ।
पप्रच्छ त्यागराजस्तु कारणं शोकमोहयोः ॥३०॥
अहं प्रकृतिमापन्नस्त्यक्त्वा मोहं शुभान्विताः ।
किमर्थं भवतामद्य भयमेतदुपागतम् ॥३१॥
अयथापूर्वमास्तेऽद्य किमिदानीं मुखं तु वः ।
पृच्छन्तं नाभिभाषध्वे भयशोकाकुलाः किमु ॥३२॥
इति मोक्तास्तु ते शिष्या गुरुदेवा जितेन्द्रियाः ।
गुरुणा परमार्तेन न शेकुस्तं समीक्षितुम् ।३३॥
अन्योन्यमेव पश्यन्तो मुखानि कलुषेन्द्रियाः ।
संस्तब्धकण्ठा भीताश्च वर्षन्तोऽश्रूणि विह्वलाः ॥३४॥
तान्दृष्ट्वा दीनवदनान्प्रत्युत्तरपराङ्मुखान् ।
त्यागराजस्तु शुद्धात्मा विषसाद भयान्वितः ॥३५॥
ततः पप्रच्छ कोपेन शोकेन कलुषीकृतः ।
कथं मां बहु पृच्छन्तं नेच्छथ मतिमापितुम् ॥३६॥
शिष्याणां वेतरेषां वा कृत्वा मानसविप्रियम् ।
व्यलीकेन समाक्रान्तो नाहं जीवितुमुत्सहे ॥३७॥
यदि श्रुतं भवद्भिस्तु गुरुक्षेमरतैः पुनः ।
अपवादोऽपि वक्तव्यस्तत्त्वेन परिपृच्छतः ।३८॥

दुःस्वप्नकातर इति न विशङ्का शुभात्मभिः ।
कर्तव्या भक्तिभारेण ब्रूत यन्मनसि स्थितम् ॥३९॥
इत्यादरेण संपृष्टा धर्तुं शोकमनीश्वराः ।
शशंसुस्ते रुदन्तस्तद् गुरवे मृशमप्रियम् ॥४०॥
कथं हन्तापवादस्तु शुद्धात्मानं समीहते ।
धर्मज्ञं सत्यसंधं च भूतानामपि वत्सलम् ॥४१॥
अहो नु खलु दैवेन वञ्चिताः प्रभविष्णुना ।
राघवः परिवारेण येन केनाप्यपाहृतः ॥४२॥
श्रुत्वेदं वचनं तीक्ष्णं वज्रपातस्वनोपमम् ।
विसंज्ञो विह्वलाङ्गश्च पपात धरणीतले ॥४३॥
कमला कमलाकान्तहरणेनाकुला भृशम् ।
रुरोद करुणं दीना कुररीवोत्पथं गता । ४४॥
पतिं समीक्ष्य पतितं विसंज्ञं च पतिव्रता ।
पवमानसमाधूता कदलीवाकुलाऽभवत् ॥४५॥
यमेव पश्यन्धर्मात्मा बहिःप्राणमिवात्मनः ।
तुष्टो विना तु तं देवं धारयेज्जीवितं कथम् ॥४६॥
भ्रात्रा निरस्तः क्रुद्धेन दुरुक्तोऽप्यपमानितः ।
रामं स्निग्धमिव प्राप्य निवेदयति सादरम् ॥४७॥
आधिं व्याधिं तु संप्राप्तः संक्लिष्टहृदयोऽपि सः ।
दृष्ट्वा स्वलंकृतं रामं युवेव भवति प्रभुः ॥४८॥
यत्र कुत्रापि गच्छन्स दृष्ट्वा पुष्पं फलानि च ।
सुगन्धमधुरं रम्यं रामायाहृत्य मोदते ॥४९॥
सुप्तोऽप्युत्थाय रामं तं दृष्ट्वा संप्रीतमानसः ।
लावण्यमोहितश्चैव पुनः स्वपिति शान्तधीः ॥५०॥
अलंकृत्य सदा रामं दृष्ट्वा तं परमोत्सुकः ।
उन्मत्तवत्प्रलपति नृत्यत्यानन्दसंकुलः ॥५१॥

यदि लब्धानि पुष्पाणि महान्ति मृदुलानि च ।
राघवं समलंकृत्य कां तुष्टिं प्राप्तवानयम् ।५२।
करणीयानि मनसि बहून्यासन्मनस्विनः ।
परिवारसमेतस्य राघवस्य विशेषतः ।५३।
कथं शक्ष्यति धर्मात्मा शोकमेनमुपागतम् ।
न विमोचयितुं प्राणान्कि पाप्तः सुमहानयम् ।५४।
इत्यादिभिर्बहुविधैर्विलप्य करुणं बहु ।
पतिं ममार्ज हस्तेन वर्षन्ती चाश्रुसंचयम् ॥५५॥
शिष्यास्ते विह्वलाङ्गाश्च गुरुं दृष्ट्वा तपस्विनम् ।
भवितव्यं किमद्येति बभूवुश्चिन्तयाऽऽकुलाः ॥५६॥
संज्ञां प्राप्य तदाऽपश्यत्संविग्नान्परितः स्थितान् ।
त्यागराजश्च दीनात्मा पुनर्मोहमुपागमत् ॥५७॥
कृच्छ्राल्लब्ध्वा पुनः संज्ञां मन्दमुत्थाय चास्थितः ।
सर्वानुद्वीक्ष्य निर्विण्णान्पप्रच्छ भृशविस्मितः ॥५८॥
दिवा वा रजनी किं वा किं गीतं सुष्ठु चिन्तितम् ।
तिष्ठथात्र किमर्थं वा विना पाठसुचिन्तनम् ॥५९॥
रचिताः सुष्ठु किं माला निर्मितं चन्दनं किमु ।
आनीयतां च कलशो ह्यभिषेक्ष्यामि राघवम् ॥६०॥
इति तं प्रलपन्तं तु दृष्ट्वा सर्वे भयान्विताः ।
कर्तव्यमूढमनसः संविग्नाश्चाभवंस्तदा ॥६१॥
तदा तु कमला शोकं निगूह्यात्मनि संस्थितम् ।
व्यपोहयन्ती तद्दुःखं जगादेदं वचः शुभम् ॥६२॥
रजनीयं प्रभाताऽद्य स्नानकालोऽयमागतः ।
उत्तिष्ठ कुरु कर्माणि यावद्भाति रविः पुरः ॥६३॥
ततः प्रोवाच शुद्धात्मा परितः समवस्थितान् ।
किमर्थमत्र तिष्ठन्तो लम्बास्या दीनचेतनाः ॥६४॥

भर्तारं मोहितं दृष्ट्वा कमला प्रियभर्तृका ।
अविज्ञातगतिः माह वेदयन्ती तदप्रियम् ।।६५।।
अहो नु खलु शुद्धात्मन्न जानीषे महद्भयम् ।
राघवः परिवारेण केनापि हि समाहृतः ।।६६।।
श्रुत्वैतत्तु तदा व्यग्रः समुत्थाय च संभ्रमात् ।
दुद्राव रामनिलयं भयशोकविमोहितः ।।६७।।
अपश्यच्च तदा दीनः प्रकीर्णाः सुममालिकाः ।
राघवं च हृतं तत्र परिवारसमावृतम् । ६८।।
अचिन्तितमिदं दृष्ट्वा दुष्कृतं च भयानकम् ।
स विव्यथे त्यागराजो भृशमार्तो रुरोद च ।।६९।।
केनेदं तु कृतं कर्म मरणाय ममेप्सितम् ।
कस्यापराद्धं तु मया दीनेनाल्पेन भीरुणा ।।७०।।
बन्धुभिस्तु निरस्तोऽपि तथा पौरैरमर्षीभिः ।
रामेव पश्यंस्तुष्टात्मा कथं सोऽद्य विनाशितः ।।७१।।
पितरं मातरं बन्धुं सोदरं स्निग्धमेव च ।
व्यपोह्य रामं वृक्षेन किं वा मम न चाहृतम् ।।७२।।
कृच्छ्रादाराधितो रामः क्षणमागत्य मत्पुरः ।
विमोहेन परिद्यूनं विहायान्तर्दधे पुरा ।।७३।।
तमेव पश्यन्प्रत्यक्षमर्च्यरूपेण सुस्थितम् ।
नन्दामि विस्मरन्दुःखं सहते नापि तद्विधिः ।।७४।।
अहो राम महाबाहो गजवाजिसमन्वितम् ।
वित्तवन्तं पालयेस्त्वं निर्धनं किमु मत्समम् ।।७५।।
कथं वा शबरीं दीनां जटायुमपि गृध्रकम् ।
सुग्रीवं राज्यहीनं चारक्षस्त्वं नियतो भवान् ।।७६।।
नार्च्यते किं मया रामो शबरीमोक्षदायकः ।
जातो दशरथाच्चैव किमन्यः पुनरर्च्यते ।७७।।

नाहं तदनुशोचामि यद्रामोऽद्य विवासितः ।
कस्तस्मै मातराशाय क्षीरमाहारयिष्यति ॥७८॥
स हि सर्वोन्नतो रामो राजतेऽतीव यत्र सः ।
संपूज्यते महार्हैश्च वञ्चितोऽस्म्यहमेव तु ॥७९॥
धन्यास्ते तु महात्मानः पूजयन्ति च तं प्रभुम् ।
अनुभूय परानन्दं शोच्योऽहं तद्विनाकृतः ॥८०॥
नित्योत्सवं वृणे नैव वार्षिकं मासिकं तथा ।
अक्षतैस्तुलसीभिश्च नार्चितुं संनिधास्यति ॥८१॥
गृहमद्य तु मे शून्यं दिशः सर्वास्तथा भुवः ।
महान्धकारमग्नोऽस्मि महाप्रलयवत्स्वयम् ॥८२॥
वज्रेणेति कृतं मन्ये हृदयं मम दुर्भगम् ।
यन्नाभिद्यत दृष्ट्वाऽपि राघवं तमपाकृतम् ॥८३॥
त्यक्त्वा कुकर्म सत्कर्तुं न यतन्ते जनाः पुनः ।
यतेत यदि कश्चित्तमधरीकुरुते कलिः ॥८४॥
राघवस्य तु पश्येयं सुप्रसन्नं मुखं कदा ।
तरङ्गितकृपासारैः कटाक्षैः पाति यत्सदा ॥८५॥
अहो नु खलु दीनेन प्राप्ता शोकपरंपरा ।
दुष्कृतैर्दूयमानस्य सोदरस्येयमागता ॥८६॥
उञ्छवृत्तिमुपादाय कस्य वा पुरतस्त्वहम् ।
निक्षिप्य मङ्गलैर्गीतैरुपस्थास्ये रघूद्वहम् ॥८७॥
अथ वा किमु मद्देहे वस्तुं नाभिरुचिः पुनः ।
असम्यक्पूजकस्यास्य भक्तिहीनस्य सांप्रतम् ॥८८॥
सुग्रीवदण्डभीतांस्तान्वानरान्योऽपालयत् ।
अनन्यगतिकं प्राप्तं कथं त्यजति मां प्रभुः ॥८९॥
संरक्ष्य वानरान्गृध्रं मल्लकानपि राघवः ।
कथं मनुष्यं त्यजति बुद्ध्या पादमुपागतम् ॥९०॥

नाहं रिपोः सोदरस्तु न पत्नीमानघातकः ।
गुहायां भ्रातरं वद्ध्वा तत्पत्नी नाहृता मया ॥९२॥
न वासवे प्रियं प्राप्ता धर्मपत्नी महामुनेः ।
नाहं किराती स्वोच्छिष्टफलमूलप्रदायिनी ॥९२॥
इत्यादिभिर्बहुविधैर्विलप्य करुणं बहु ।
निश्चश्वासाश्रयाशेन गजराज इवावृतः ॥९४॥
स विव्यथे भृशं स्वार्तः सिंहवद्घ्राणघातितः ।
शार्दूलो वागुरावद्ध इव खिन्नो बभूव सः ॥९५॥
भुजंगेनेव संदष्टदेहः स भयमोहितः ।
वातसंध्वस्तकदलीकाण्डवच्छोभते न सः ॥९६॥
अविज्ञाय पुनः किंचित्तत्र तत्र स मार्गति ।
अन्तर्गृहेषु सर्वेषु पुनः पूजागृहेषु च ॥९७॥
प्रलपन्नपि दीनात्मा यत्किंचिदपि वाग्वशात् ।
प्रमत्त इव भूतेनाविष्टवच्च चरत्यहो ॥९८॥
विमानं रामहीनं तत्पश्यन्नश्रूणि मुञ्चति ।
प्रियेत्युक्त्वा तु वचनं न किंचिदपि भाषते ॥९९॥
तिष्ठत्युपविशत्यार्तः पुनश्च परिसर्पति ।
विह्वलश्चरति व्यग्रो मार्गितांश्च विमार्गयन् ॥१००॥
जीवामि वा कथं रामं विहाय जनकात्मजाम् ।
अहो लक्ष्मण यातोऽसीत्यार्तश्च प्ररुरोद सः ॥१०१॥
शान्तधीः स तु धर्मात्मा राघवः सर्वबान्धवः ।
कथं लक्ष्मण तद्भक्तो न दग्धो येन हारितः ॥१०२॥
यथा रामस्य मे पूजा बभूव न मनोहरा ।
तथा न रुचिता किं नु तवापि भृशवत्सल ॥१०३॥
अन्यथा तत्कथं साध्यं हर्तुं त्वयि च पश्यति ।
त्वामप्यार्यापहर्तुं वा किं करोम्यद्य दीनधीः ॥१०४॥

भक्तानां रक्षणे पूर्वमुद्योजयसि राघवम् ।
मां वा न मन्यसे भक्तं त्यक्ता किं वाऽपि तत्कृतिः ॥१०५॥
अहो जानकि मे मातः परित्यजसि किं सुतम् ।
अन्धं च बधिरं मूकं परसाहाय्यजीविनम् ॥१०६॥
संप्रार्थ्य समये तुष्टं शय्यागारमधिष्ठितम् ।
भर्तारं कुशला देवि रक्षेर्मामित्यचिन्तयम् ॥१०७॥
मात्राऽपि स परित्यक्तः कथं जीवति वा सुतः ।
बहुभिर्बहुधा पुष्टो नाशमेव समृच्छति ॥१०८॥
अम्ब मां तु परित्यक्तुं धीः कथं ते प्रियात्मजे ।
कुपुत्रो भवति प्रायो न कुमातेति गद्यते ॥१०९॥
शुद्धात्मभिर्भवद्भिस्तु दुष्कृतं कृतमेव हि ।
अनन्यगतिकं त्यक्त्वा परिवारेण गन्तृभिः ॥११०॥
प्राप्ता कीर्त्तिस्तु या नाथ रामदासस्य रक्षणात् ।
मूर्तीः प्रतिष्ठापयतः सेदानीं नाशिता पुनः ॥१११॥
पूजकं प्रेमभारेण वञ्चयित्वा कथं नु माम् ।
अन्तर्धानगतस्यापि युक्ता कीर्त्तिस्तु सा पुनः ॥११२॥
पितरावपि संत्यज्य गतानां युक्तमेव तत् ।
कथं भरतशत्रुघ्नावनघं त्यजतः स्म माम् ॥११३॥
मारुतात्मज यातोऽसि क्व वा वानरपुंगव ।
कथं त्वयि स्थिते कर्तुं साध्यं वा कर्म चेदृशम् ॥११४॥
राक्षसेष्वेव ते वीर्यं प्रभवत्यनिशं किमु ।
न तु राक्षसकल्पेषु मानुषेष्वपि शत्रुषु ॥११५॥
किमियं दर्शिता भक्तिर्नरश्रेष्ठे च राघवे ।
दुष्कृतिस्तु कथं साध्या त्वयि वीरे च पश्यति ॥११६॥
शतशीर्षेण पातालं नीते ते राघवे स्वयम् ।
प्रदर्श्य सुमहद्वीर्यं सुखसुप्तोऽसि सांप्रतम् ॥११७॥

कथं त्वमपि गन्ताऽसि दुस्त्यजं मां विहाय च ।
किं पादमूलं रामस्य परित्यक्तुमनीश्वरः ॥११८॥
अहं पुरुषकाराय राघवस्य महात्मनः ।
त्वयि विन्यस्तविस्रम्भः सुखेनासं मरुत्सुत ॥११९॥
परित्यजथ मां यूयं कथं वा भक्तवत्सलाः ।
अनन्यगतिकं दीनं पादमूलमुपाश्रितम् ॥१२०॥
प्रलपन्निति दीनात्मा विषीदन्विह्वलश्च सः ।
परिभ्रमति शोकेन कलुषीकृतचेतनः ॥१२१॥
जप्येशस्तु तमुद्वीक्ष्य प्रलापं सोदरस्य तु ।
लज्जाशोकसमाविष्टः कारुण्येनापि संकुलः ॥१२२॥
जहास तस्य पत्नी तु मूलं तस्याश्च दुष्कृतेः ।
प्रमत्ता कृतकृत्येव सुतं क्षिप्त्वा सरिज्जले ॥१२३॥
पौराः श्रुत्वा प्रनष्टं तज्जप्येशेनैव तां कृताम् ।
निश्चिन्वन्तो गदन्तश्च प्रत्यक्षं तमकुत्सयन् ॥१२४॥
साधोर्भक्तस्य शुद्धस्य त्यागराजस्य धीमतः ।
कथं ज्येष्ठस्त्वयं प्राप्तो दुर्वृत्तश्चाल्पजीवितः ॥१२५॥
कथं धरति धर्मात्मा प्राणानद्य विनाकृतः ।
प्राणभूतेन रामेण जानक्या लक्ष्मणेन च ॥१२६॥
कदा वा शृणुमस्तानि गीतानि मधुराण्यहो ।
संतुष्टहृदयेनाशु रचितानि तदा तदा ॥१२७॥
कदा वा प्रेक्षणीयो नस्तत्संघः सकुतूहलः ।
रामनाम स्तुवन्नित्यं गायन्नृत्यंश्च तद्गृहे ॥१२८॥
प्रनष्टं पुरसौन्दर्यं तथा चित्तस्य शान्तिभूः ।
श्रोत्राणां च परं भाग्यं नेत्राणाममृतं तथा ॥१२९॥
इत्थं प्रणयिनस्तस्मिन्नूचुश्च विविधा गिरः ।
तत्र तत्र च संगत्य विह्वलाः पुरवासिनः ॥१३०॥

चरितान्यर्धमिथ्यानि पूर्णमिथ्यानि वा पुनः ।
जगदुः पूर्ववृत्तानि कुभ्रात्राऽनुष्ठितानि च ॥१३१॥
जप्येशोऽपि तदा तेन भार्यया सह मार्गति ।
आर्तवद्विनिवृत्तार्थो दुःशीलो दुष्टधीरयम् ॥१३२॥
आमध्याह्नं मार्गयन्स कृच्छ्रादपि दृढव्रतः ।
न प्राप्तवांस्तदा रामं परिवारसमावृतम् ॥१३३॥
समाश्वस्तः शिष्यवाक्यैः श्रेयस्या भृशतप्तया ।
संप्रार्थ्यमानः स्नातश्च कर्माणि च तदाऽकरोत् ॥१३४॥
आहारे व्यवहारे वा न धीस्तस्य जगाम हि ।
विलपन्नेव दीनात्मा कृच्छ्रात्कालमनीनयत् ॥१३५॥
प्रलापा अपि गीतानि हृद्यानि निरगुस्तदा ।
शोको मोहोऽपि महतां लोकानामुपकारकः ॥१३६॥
तदाऽस्तुवंश्च जप्येशं तत्पत्नीमपि गार्हिताम् ।
कीर्तनैर्मोहिताः सर्वे रम्यैः शोकसमुद्भवैः ॥१३७॥
पुरान्तरागताश्चैव सशोकास्तमनुव्रताः ।
तथा कृच्छ्रगतं तं तु विमोक्तुं चाप्यनीश्वराः ॥१३८॥
इत्थं स्थिते च त्यागेशऽनेके हि ऋतवो गताः ।
संवत्सरस्तदा पूर्णो वर्षर्तुः पुनरागमत् ॥१३९॥
एकदा त्यागराजस्तु विग्रहाणामलाभतः ।
रुरोद भृशमायस्तो निशायां जाग्रदेव सः ॥१४०॥
तेन शोकेन महता विलप्य बहुशस्तदा ।
सुष्वाप भूमौ दीनात्मा दुर्मना विह्वलश्च सः ॥१४१॥
अरुणे दिवमारूढे कुक्कुटैरभिनादिते ।
शीतवाते सुखस्पर्शे प्रबुद्धस्तूपासि स्वयम् ॥१४२॥
आजुहावाथ सर्वान्स स्वोच्चघोषैः कुतूहलात् ।
प्रबुद्धाः संभ्रमेणैव प्रययुस्तत्र संघशः ॥१४३॥

तदा प्रोवाच नृत्यन्स वर्षन्नानन्दजं जलम् ।
राघवः स्वप्न आगत्य वचस्त्वेवमभाषत ॥१४४॥
त्यागराज समुत्तिष्ठ कावेरीं गच्छ मा चिरम् ।
तत्र द्रक्ष्यसि चाश्वत्थं जलाभिमुखमुन्नतम् ॥१४५॥
तत्रोदकं स्तब्धभूतं गाधमेवाभिवर्तते ।
प्रेक्षिष्यसे विग्रहांस्तान्सैकतान्तरवस्थितान् ॥१४६॥
इत्युक्तवान्स रामो मामित्युक्त्वा स त्वरान्वितः ।
प्रदुद्राव च कावेरमिनुयातः सकौतुकः ॥१४७॥
दक्षिणाभिमुखाश्वत्थं तत्र दृष्ट्वा ससंभ्रमाः ।
सर्वे जले निमग्नाश्च स्वेनैवाहर्तुमुद्यताः ॥१४८॥
त्यागराजोऽपि धर्मात्मा निमग्नः सलिले शुभे ।
सैकते कलशहस्तः स क्षणादासाद्य चोद्धृतः ॥१४९॥
सर्वे विग्रहहस्तं तं दृष्ट्वा तुष्टाः प्रचुक्रुशुः ।
विस्मृत्य गुरुसांनिध्यं ननृतुर्हृष्टचेतसः ॥१५०॥
ततः शिष्यः समुद्धृत्य वसनं पादमूलगम् ।
दृष्ट्वा सर्वाणि संतुष्टो भूषणानि करेऽग्रहीत् ॥१५१॥
त्यागराजश्च तान्दृष्ट्वा विग्रहान्पूर्ववत्स्थितान् ।
तोयाम्बुधिनिमग्नश्च न पारं प्राप्तवांस्तदा ॥१५२॥
तांश्च संगृह्य हस्तेन वक्षसाऽऽलिङ्ग्य सत्वरम् ।
गायन्गृहं ताननयद्वारा मा इष्टिकीति च ॥१५३॥
तत्र पीठे प्रतिष्ठाप्य राघवं भक्तबान्धवम् ।
प्रदक्षिणशतं कृत्वा प्रमुमोद सहानुगः ॥१५४॥
वृत्तमेतदुपश्रुत्य पौरजानपदा जनाः ।
तुष्टुवुस्त्यागराजं च रामकारुण्यभाजनम् ॥१५५॥
सपत्नीकश्च जप्येशो दृष्ट्वैतद्भृशविह्वलः ।
कोपेन महताऽऽविष्टो ज्वलति स्माग्निसंनिभः ॥१५६॥

॥ इति श्रीत्यागराजचरिते सुन्दरेशार्यविरचिते
'विग्रहलाभो' नामैकादशः सर्गः ॥

अथ द्वादशः सर्गः ।

काले प्रदोषे त्यागेशो गत्वा पञ्चनदालयम् ।
प्रणतार्तिहरं स्तौति गीतैः श्रोत्रमनोहरैः ॥१॥
इलली प्रणतार्तीति गीतं गायन्महामतिः ।
भक्त्या च परया युक्तो ववन्दे शंकरं विभुम् ॥२॥
इत्थं ध्यानस्थिते तस्मिन्नुपविष्टो गृहाद्बहिः ।
ताम्बूलं सेवमानस्तु जप्येशः समवर्तत ॥३॥
श्रुत्वा तुरगशब्दं स समीपागमनोत्थितम् ।
विस्मयात्कौतुकेनापि ददर्शादरतो दिशः ॥४॥
योधाञ्शताधिकान्वीरान्सर्वायुधसमन्वितान् ।
उन्नतानुन्नतोष्णीषान्समायातान्ददर्श सः ॥५॥
अपश्यच्च समायातः पञ्च षट् तुरगांस्तदा ।
भूषणैरतुलैर्युक्तान्रम्यानुच्चैःश्रवःसमान् ॥६॥
सेनाग्रयायिनोऽद्राक्षीत्तत्पृष्ठेष्वप्यवस्थितान् ।
भीमान्भीमायुधान्धीरान्भीमवद्बलशालिनः ॥७॥
तेषां मध्ये महाकायं महाभरणभूषितम् ।
श्वेतं श्वेतेतरास्तीर्णं श्वेतचामरभूषितम् ॥८॥
पादे जानौ च पृष्ठे च मुखे पार्श्वे तथा गले ।
नवरत्नैः शोभमानैर्भूषणैः समलंकृतम् ॥९॥
महार्हास्तरणास्तीर्णं महारश्मिविभूषितम् ।
ददर्श विस्मितस्तत्र कौतूहलसमन्वितः ॥१०॥
ततो ददर्श तत्पृष्ठे स्थितं पुरुषपुंगवम् ।
गम्भीराध्यासितं तत्र गम्भीरहृदयं पुनः ॥११॥
रक्तच्छत्रेण दीप्तेन शोभितं रक्तचन्दनैः ।
परिधाय परं वस्त्रं परार्घ्यं परमाद्भुतम् ॥१२॥

गाम्भीर्येण प्रभावेण तथा परिजनेन च ।
शोभितं राजवत्तत्र सोऽपश्यद्भृशविस्मितः ॥१३॥
राजा वा राजकल्पो वा यत्र कुत्रापि गच्छति ।
इति संचिन्तयंस्तं तु पश्यन्नेवाभ्यवर्तत ॥१४॥
तुरगास्त्वरितं याताः पुरस्तस्य गृहस्य च ।
व्यतिष्ठन्तोज्ज्वलाङ्गास्ते वारयन्तो जनान्बहून् ।१५॥
दृष्ट्वा तान्संभ्रमात्सोऽपि भयेन विकलीकृतः ।
उत्थाय विनयेनापि व्यतिष्ठत भयाकुलः ॥१६॥
अवारोहंस्तुरंगेभ्यो वपुष्मन्तो दृढव्रताः ।
दृढबद्धासिगोधास्ते दृढधन्वभिरावृताः ॥१७॥
तान्दृष्ट्वा स तु जप्येशः संविग्नहृदयः पुनः ।
प्रत्युद्गम्य प्रसाद्यापि प्रणनाम भयान्वितः ॥१८॥
एकः समागतेष्वाह जप्येशं विनयान्वितम् ।
गम्भीरनिनदेनापि क्षेपां यदाभिकाङ्क्षितम् ॥१९॥
सचिवोऽयं महाभागः शरभोजिमहीपतेः ।
त्यागराजं तु संद्रष्टुं त्वरयाऽत्र समागतः ॥२०॥
इत्येतद्वचनं श्रुत्वा जप्येशो विमचेतनः ।
उवाच सेवकं तं तु मुखे कृत्वा करं स्वयम् ॥२१॥
त्यागराजस्तु मे भ्राता कुतो वा स तु मृग्यते ।
निर्वर्तयिष्ये तत्कर्म यदि तन्मपि कथ्यते ॥२२॥
विज्ञापितः सेवकेन सचिवस्तु महीपतेः ।
अवरुह्य तुरंगात्स गृहवेदिं पुनर्ययौ ॥२३॥
संभ्रान्तः स तु जप्येशो दृष्ट्वा मन्त्रिणमागतम् ।
भयगद्गदया वाचा प्रतिनन्द्य मनागिव ॥२४॥
कम्पमानकरो दूरे व्यतिष्ठत स विह्वलः ।
तं दृष्ट्वा मधुरिदाह्वं मन्त्री प्रोवाच सादरम् ॥२५॥

त्यागराजस्य किं ब्रात्तर्महनीयोऽसि सांप्रतम् ।
यो महाराजकारुण्यदृष्टेः पात्रं भविष्यसि ॥२६॥
महानभिनिवेशस्तु विन्यस्तस्तव सोदरे ।
यन्मामचोदयद्राजा सचिवं स्वयमेव तु ॥२७॥
विद्वांसो गानशास्त्रेषु सर्वशास्त्रेषु पण्डिताः ।
उपासते च राजानं वासवं किंनरा इव ॥२८॥
न रतिं कुरुते तेषु गीतीः श्रुत्वा मनोहराः ।
भ्रातुस्तव महाभागमुत्सुकस्तं दिदृक्षते ॥२९॥
महार्हाणि च वस्त्राणि भूषणान्यतुलान्यपि ।
दापयत्यद्य ते भ्रातुर्मयैव नियतात्मना ॥३०॥
पश्येमान्यम्बराण्यद्य भूषणानि महान्ति च ।
भ्रातरं भूषयित्वाऽद्य प्रेषयाशु मया सह ॥३१॥
इत्युक्त्वाऽदर्शयत्सर्वान्महार्हान्राजसंमतान् ।
दृष्ट्वा तानर्थलोभेन मोहमाप स मन्दधीः ॥३२॥
तान्दृष्ट्वा विस्मयाविष्टो मन्त्रिणं पुनरब्रवीत् ।
कृतार्थाः स्म वयं त्वद्य राज्ञां च भवतां मताः ॥३३॥
स्वीकरोम्यद्य सचिवाः सर्वमेतदहं पुनः ।
भ्राता शिवालये व्यर्थं सायाह्ने भ्रमति प्रभो ॥३४॥
अचिरेण समागच्छेत्प्रेषयिष्यामि सांप्रतम् ।
एतानि भूषणान्यन्तर्नयाम्यद्य किमु प्रभो ॥३५॥
सचिवस्तु ततः प्राह लुब्धं तं मोहितं तदा ।
तस्य हस्ते त्विदं देयं न भ्रातरि न बन्धुषु ॥३६॥
इत्युक्तः सचिवेनापि भूषणेष्वेव सक्तधीः ।
तान्येव पश्यन्नास्ते स मस्पृहं सादरं तदा ॥३७॥
श्रुत्वा तु निनदं रम्यं घुष्टं राघवनाम तत् ।
जप्येशः प्राह सचिवं त्यागेशं पुनरागतम् ॥३८॥

रामनाम ततः श्रुत्वा श्रुतिगं समुदाहृतम् ।
पुलकाङ्कितसर्वाङ्गः सचिवस्तु बभूव सः ॥३९॥
अतिमात्रं हि माधुर्यं रामनाम्नोऽत्र वर्तते ।
हृदयं कम्पयच्चेतो मोहयत्परिसर्पति ॥४०॥
इत्थं च चिन्तयत्येव सचिवे भृशगर्विते ।
समीपमगमच्छत्रैस्त्यागराजः समावृतः ॥४१॥
दृष्ट्वा तुरंगान्योधांश्च गृहद्वारे व्यवस्थितान् ।
विस्मयेन समाविष्टो गृहद्वारं समाययौ ॥४२॥
अपश्यद्भ्रातरं तत्र स्वस्याभिमुखमागतम् ।
तं दृष्ट्वा विनतः पादौ ववन्दे नियतस्तदा ॥४३॥
जप्येशः सोदरं तं तु सादरं पुनरब्रवीत् ।
नाहं वृणे वन्दनं ते विनीतिं स्तुतिमेव वा ॥४४॥
बुद्धिमत्त्वं तु तेऽद्यैव निश्चीयेत महामते ।
पादमूलगता लक्ष्मीर्न तिरस्कारमर्हति ॥४५॥
श्रूयते हि महाराजः शरभोजिर्विशां पतिः ।
रक्षतीदं महद्राज्यं स्वदण्डेनापि तेजसा ॥४६॥
कारुण्यपूर्णा तद्दृष्टिर्यस्मिन्पतति सोदर ।
सद्यः स हि भवेद्राजा राज्यानामपि पालकः ॥४७॥
तथैव कोपसंदष्टो महीपतिरपि स्वयम् ।
सद्यो विनाशमायाति सपुत्रज्ञातिबान्धवः ॥४८॥
दुर्धर्षस्य नरेन्द्रस्य सचिवो बुद्धिसत्तमः ।
अद्यास्मद्विषयं प्राप्तः पूर्वपुण्येन चोदितः ॥४९॥
यं द्रष्टुमभिकाङ्क्षन्ताश्चिरं पण्डितसत्तमाः ।
गृहद्वारेषु वर्तन्ते सोऽयमत्र समागतः ॥५०॥
यस्य प्रसादादल्पोऽपि महद्वित्तमवाप्य च ।
देववच्छोभते नित्यं सोऽयमत्र समागतः ॥५१॥

अद्यापि च महार्हाणि भूषणान्यम्बराणि च ।
अस्माकं दातुमुद्युक्तः करे निक्षिपति प्रभुः ॥५२॥
किमर्थं भजसे दैन्यं प्रतिष्ठस्व नरर्षभ ।
राज्ञा संमानिता ये ते पूज्यन्ते च पृथग्जनैः ॥५३॥
प्राप्य संमानितान्राज्ञा पूजयिष्यसि राघवम् ।
विशेषद्रव्ययोगेण भक्तेभ्यश्च प्रदास्यसि ॥५४॥
समर्च्य रामं दातेति त्याज्यं किं ददति भ्रमाः ।
युनक्ति योगे रामस्तु नरानेव न तु स्वयम् ॥५५॥
अचिंतो राघवो राजा राज्ञा त्वां योजयत्यहो ।
यदि त्वमत्रमन्तेमं राघवो ह्यभिभूयते ॥५६॥
प्रतिनन्द्य महाराजमन्त्रिणं गृहमागतम् ।
यत्तद्वदति तत्कर्म कुरु नित्यमतन्द्रितः ॥५७॥
इत्युक्तस्त्यागराजस्तु भ्रात्रा लुब्धेन भीरुणा ।
अविज्ञाय च यत्किंचित्सचिवस्य पुरो ययौ ॥५८॥
तमागतं ततो दृष्ट्वा सचिवः पूर्वमागतः ।
उत्थाय विनयात्तं च ववन्दे साञ्जलिस्तदा ॥५९॥
मन्त्रिणं तं ततो दृष्ट्वा त्यागराजो महामतिः ।
प्रतिनन्द्य यथान्यायं समुपाविशदहितम् ॥६०॥
ततोऽब्रवीत्तं सचिवः परिवारसमावृतः ।
संवृतं बहुभिश्छात्रैर्भ्रात्रा ज्येष्ठेन संगतम् ॥६१॥
त्यागराज महाभाग राज्ञस्त्वं श्रोत्रमागतः ।
पण्डितः सर्वशास्त्रेषु गान्धर्वे त्वसमस्त्विति ॥६२॥
पण्डितेनापि न कथं त्वया राजा स दृश्यते ।
उपासते हि सर्वेऽपि पण्डिताः पदकाङ्क्षिणः ॥६३॥
महात्मनि त्वय्यद्यैव कटाक्षाः प्रसरन्ति हि ।
कालज्ञ कालमाज्ञाय चात्मानं दर्शय प्रभुम् ॥६४॥

तवैतत्सुकृतं मन्ये दिदृक्षुस्त्वां विशां पतिः ।
संप्रार्थ्य गत्वा यो दृश्यः पण्डितैः स हि वाञ्छति ॥६५॥
यदि पश्यसि राजानं दातारं सकलश्रियाम् ।
नूनं प्राप्स्यसि वित्तानि ग्रामांश्च नगराणि वा ॥६६॥
न कृच्छ्रं साधितव्यं ते कर्तव्या द्विस्त्रगीतयः ।
सुलभा वाग्वशा यास्तु राज्ञः कीर्तिपरिष्कृताः ॥६७॥
बहूनि किल गीतानि वर्तन्ते रचितान्यहो ।
त्वद्भाग्यपरिणामेन रोचन्ते न महौजसे ॥६८॥
मया समर्पितं विद्वन्गृहीत्वा पारितोषिकम् ।
महाराजं तु संद्रष्टुं प्रस्थानमभिरोचय ॥६९॥
इत्युक्त्वा पुरतस्तस्य सर्वाण्याभरणानि सः ।
महार्हाणि च वस्त्राणि सुकल्पानि चकार सः ॥७०॥
श्रुत्वा तद्वचनं घोरं नरस्तुतिभिरीडितम् ।
विव्यथे त्यागराजस्तु तान्यनालक्ष्य चेतसा ।७१॥
कथं स्तुत्वा रघूत्तंसं शरण्यं सर्वजीविनाम् ।
तयैव जिह्वया दीनं स्तुवीय नरमद्य तु ॥७२॥
अहो नु खलु रामेण परीक्ष्ये मूढधीरहम् ।
अन्यथा तु कथं राज्ञो मामानाययितुं स्पृहा ॥७३॥
नृत्यत्येष मम भ्राता धनलोभविमोहितः ।
कथं न्वद्याशुभादसादुत्तरेयं सुसंकटात् ।७४॥
इत्यालोच्य चिरं धीरः संप्रधार्य मनः सुखम् ।
निधिसालेति गीतं च गायति स्म यतात्मवान् ॥७५॥
अवोचदथ धैर्येण विनयेन च मन्त्रिणम् ।
उपस्पृष्वति च ज्येष्ठे निश्चितं मनसा तु यत् ॥७६॥
परितुष्टोऽस्मि यद्राजा मयि कारुण्यमास्थितः ।
भवताऽपि कृतस्नेहात्कृतज्ञोऽस्मि महामते ।७७॥

नियोजयति यत्कर्तुं भवान्मां प्रीतिसंयुतः ।
क्षमस्व तदशक्यं मे कृच्छ्रेष्वपि च तिष्ठतः ॥७८॥
यदर्थेषु महान्स्नेहः सेव्यो राजा न संशयः ।
नाहं वृणे तदर्थं तु यदधःपातसाधनम् ॥७९॥
अवमन्तुं न हीच्छा मे भवन्तं वाऽपि भूपतिम् ।
न स्तौति राघवादन्यं जिह्वा मे मानवं पुनः ॥८०॥
पूज्यो मान्यश्च मे राजा भवानपि तथैव मे
उल्लङ्घिते शासने तु क्षन्तुमर्हथ मन्त्रिणः ॥८१॥
त्यागेशस्य वचः श्रुत्वा दारुणो लोभमोहितः ।
जप्येशो भृशमुद्विग्नस्तमपश्यद्दहन्निव ॥८२॥
इत्युक्तवन्तं त्यागेशं कोपेन कलुषीकृतः ।
मन्त्री प्रोवाच हस्तेन मार्जयञ्श्मश्रुसंचयम् ॥८३॥
धिक्त्वामद्य विनश्यन्तं दुर्भगं दुरनुष्ठितम् ।
दुरहंकृतिमत्तस्त्वं श्रुतो राज्ञा त्वमर्पिणा ॥८४॥
तस्मादेवाहमाज्ञप्तो नेतुं त्वामल्पकं स्वयम् ।
अवमत्य च राजानं को वा सुखमवाप्नुयात् ॥८५॥
प्रजा त्वमसि राज्ञस्तु यः सर्वकरणक्षमः ।
उल्लङ्घ्य शासनं तस्य कथं शक्ष्यसि जीवितुम् ॥८६॥
प्राणानपि परित्यज्य किं धर्मं परिरक्षसि ।
धर्माभिज्ञ महाराजस्तोत्रे पापं किमाप्स्यसि ॥८७॥
त्वत्तोऽपि पण्डितान्पश्य समर्थान्विदुषश्च ते ।
उपासीनास्तु राजानं मोदन्ते प्राप्य भूरिशः ॥८८॥
अपापकर्म तत्कृत्वा किं प्राप्यं भूरि वा धनम् ।
व्यवसायेन च स्थित्वा जीवितं नाश्यतां किमु ॥८९॥
एतयोरुभयोः किं वा परं पण्डित मन्यसे ।
ब्राह्मणे प्रीतियुक्तोऽहं पूर्वं मन्ये परं शुभम् ॥९०॥

शरीररक्षणायैव कुर्वन्तः पापमप्युत ।
अपापाः स्वर्गमायान्ति सन्तः साधुभिरीप्सिताः ॥९१॥
शरीररक्षणायैव रामो विव्याध ताटकाम् ।
पूतनादींस्तथा कृष्णो न किं ते धर्मचारिणः ॥९२॥
कथंचिदपि तु प्राणो रक्षितव्यो विपश्चिता ।
येनैव चं परो लोको मोक्षश्चाप्यधिगम्यते ॥९३॥
अत्र किं विद्यते पापं राज्ञः स्तोत्रे महात्मनः ।
बुद्ध्या सम्यग्विचिन्त्यैव कुरु यत्सौख्यमात्मनः ॥९४॥
भयं जनयता चैव स्पृहां च धनसंचये ।
मन्त्रिणा पुनरित्युक्तस्त्यागराजस्तमब्रवीत् ॥९५॥
सर्वशास्त्रार्थविदुषा महाराजस्य मन्त्रिणा ।
नैतद्युक्तं तु मां वक्तुं प्राकृतेनेव दुर्धिया ॥९६॥
महाराजस्य धर्मोऽसौ प्रजानां परिपालनम् ।
यथा तु मोक्षसाम्राज्यं प्राप्नुवन्ति मनीषिणः ॥९७॥
न चोद्धतेन दण्डेन नासमुद्रक्षितीश्वरात् ।
राज्ञो धर्मः प्रयात्यन्तं नैतच्चाविदितं विभोः ॥९८॥
कारयित्वा मया राज्ञो गुणकीर्त्तिसुविस्तृतिम् ।
कथं मां भूपतिर्मोक्षं प्रापयिष्यति सांप्रतम् ॥९९॥
उद्योगं च महाराजस्यासम्यक्चिन्तनागतम् ।
निवर्तयतु नीतिज्ञः सचिवो बुद्धिसत्तमः ॥१००॥
कथं भीषयते विद्वान्भवान्भीरुं पदे स्थितः ।
मशकं हन्तुमुद्युक्तो गजः किं बलमीप्सति ॥१०१॥
इत्युक्तवन्तं त्यागेशं रोषामर्षवशानुगः ।
परित्यज्य धिगित्येव मन्त्री गन्तुं प्रचक्रमे ॥१०२॥
विनश्यन्तं क्षणादद्य पश्यामि त्वां नराधम ।
रामभक्तसुतो विप्र इति त्वयि दया कृता ॥१०३॥

इत्युक्त्वा स तु कोपेन तुरङ्गमधिरुह्य च ।
वेगेन पत्तनं प्रायादनुयातृभिरन्वितः ॥१०४॥
इत्थं गते च सचिवे सोपायनमुपागते ।
जप्येशः क्रोधताम्राक्षस्तं विव्याध दुरुक्तिभिः ॥१०५॥
मूढ त्वया सोदरेण कथं कृच्छ्रगतोऽस्म्यहम् ।
राज्ञस्तु सचिवः कोपान्महद्धि कलुषीकृतः ॥१०६॥
स एव दण्डयेदस्मान्मन्त्री राज्ञः प्रियो दृढः ।
अशिक्षयन्नेव कथं निवृत्त इति तर्कये ॥१०७॥
सोदरेण त्वया मूढ हतोऽस्मि व्यवसायिना ।
कथं वा सहते मानी स्वावमन्तृप्रजां नृपः ॥१०८॥
अवमान्य कथं ज्येष्ठं पितृवद् भृशवत्सलम् ।
तथा च नृपतिं धीरं सुखेन तु निवत्स्यसि ॥१०९॥
अद्यैव हन्मि त्वां मूढ राज्ञः प्रियचिकीर्षया ।
पश्यामि रामरक्षां ते यद्बलेनासि धृष्टधीः ॥११०॥
इत्युक्त्वा हस्तलब्धेन दण्डेनाताडयद् भृशम् ।
वार्यमाणोऽपि शिष्यैश्च नायं तत्कुरुते वचः ॥१११॥
भृशं संताडितो भ्रात्रा दुर्बलो बलिना तदा ।
विसंज्ञो विह्वलश्चार्तः पपात धरणीतले ॥११२॥
पतितं च तदा दृष्ट्वा चुक्रोधामर्षितो भृशम् ।
दण्डाघातस्रवद्रक्तधारासंप्लाविताङ्गकम् ॥११३॥
गच्छ वा नरकं पाप किमत्र वसता त्वया ।
आज्ञप्तः प्रार्थितो दीर्घात्कुरुषे न वचो मम ॥११४॥
भ्रातेति मन्यमानेन सोढमेतावदप्रियम् ।
को वा दुर्विषहं घोरं कर्म चैतत्सहिष्यते ॥११५॥
इत्युक्त्वा स तु निःश्वस्य पदा तमभिहत्य च ।
जगाम क्रोधवशगः शयनागारमार्तधीः ॥११६॥

गते तस्मिन्विषण्णश्च संत्रस्तश्छात्रसंचयः ।
तिष्ठंस्तं परिवार्यापि नेत्रैरश्रूण्यवर्षयत् ॥११७
श्रुत्वा तु घोरं तत्कर्म कमला प्रियमर्दकी ।
अभिदुद्राव वेगेन पार्श्वं पत्युर्मनस्विनी ॥११८॥
तथा शयानं भर्तारं विसंज्ञं पांसुषु प्रियम् ।
रुधिरक्लिन्नसर्वाङ्गं तपस्विनमिवाहतम् ॥११९॥
अश्रूणि च विवर्षन्तमनन्यगतिकं पुनः ।
उच्छ्वसन्तं च दीर्घेण श्वासेनायासितं कृशम् ॥१२०॥
दृष्ट्वा तु भयविद्धाङ्गी जीवितच्युतिशङ्कया ।
पार्श्वतः समुपाविश्य कुररीव रुरोद सा ॥१२१॥
हतमेव कथं हन्ति दैवं हतकमेव तत् ।
कथं वा सहते नैव किंचित्संतुष्टमात्मना ॥१२२॥
प्रनष्टराघवः पूर्वं प्राप्याद्य मुदमाप्तवान् ।
नूनं चासहमानेन प्रापितः प्राणसंकटम् ॥१२३॥
सोदरस्यापि यद्भस्तो विधेर्दुष्करकर्मणः ।
हन्तुं सहायः संप्राप्तः प्रहरिष्यति कैर्नवा ॥१२४॥
सुकृतेन भवान्नूनं सुखस्यैवोचितः स्वयम् ।
मम हस्तग्रहादेव दुर्भगाया गतो व्यथाम् ॥१२५॥
पिता मम महामेधा भवतो लग्नपत्रिकाम् ।
दृष्ट्वा सर्वोत्तमां मत्वा कीदृशं तोषमाप्तवान् ॥१२६॥
तथोत्तमेषु जातस्त्वं सर्वदाऽपि कथं विभो ।
कृच्छ्रेण वर्तसे नूनं मद्भाग्यस्य परिक्षयात् ॥१२७॥
सत्यवानपि सावित्र्या दीर्घमायुरवाप्य च ।
व्यपोह्य चान्ध्यं पित्रोश्च देववद् भुव्यराजत ॥१२८॥
अहं पुनर्ममालक्ष्म्या दुर्गतिं पत्युरार्पयम् ।
चिरं जीवामि पश्यन्ती तत्खेदमतुलं स्वयम् ॥१२९

विदीर्यते कथं त्वेतदायसं हृदयं न मे ।
असृग्धाराप्लुतं दृष्ट्वा विसंज्ञं पतितं प्रियम् ॥१३०॥
अहो नु खलु दैवज्ञैर्वञ्चिताऽसि शुभात्मभिः ।
यन्माङ्गल्यसमायुक्तां मामूचुः परलोकगाम् ॥१३१॥
कथं चेमं प्रपश्यामि संज्ञां प्राप्य समुत्थितम् ।
ताडनव्रणखिन्नोऽयं कदा वा सुखमाप्नुयात् ॥१३२॥
किं द्रक्ष्यामि मुखं पत्युः प्रसन्नं रामदर्शनात् ।
समाहूय च मां तोषाद्दर्शयद्राघवाननम् ॥१३३॥
इत्यादिभिश्च विविधै रुरोद करुणं तदा ।
मृगीव मृगमावद्धं दृष्ट्वा संविग्नमानसा ॥१३४॥
शार्दूल इव बाणेन पाशितः स तु विभ्यथे ।
मन्दं मन्दं निःश्वसंश्च चेष्टमानो महीतले ॥१३५॥
अश्रूण्यवर्षंस्ते रक्तं क्षालयन्त इव स्रुतम् ।
दीर्घोच्छ्वासेन तु च्छात्रा वीजयन्त इवाभवन् ॥१३६॥
चिरात्स संज्ञां संप्राप्य संविग्नाङ्गश्च विह्वलः ।
सर्वानुदैक्षत त्रस्तः स्रवद्वारिविलोचनः ॥१३७॥
तदा तु कमला साध्वी दृष्ट्वा तं दीनचेतसम् ।
प्रावेपत भृशं चिन्ना स्वज्ञातभवितव्यता ॥१३८॥
अपृच्छदथ भर्तारं वेपमानमुदीक्ष्य सा ।
असह्यवेदनः किं नु भवानद्याभिवर्तते ॥१३९॥
श्रुत्वा तु वचनं पत्न्याः प्रेमशोकाकुलाक्षरम् ।
समाश्वस्तस्तदा किंचित्स्वस्थो बोधमवाप सः ॥१४०॥
अक्षमश्च तदा वाचा वक्तुं पत्नीमपि प्रियाम् ।
ह्रिया शोकेन च प्लुष्टो व्यथितो भृशताडनात् ॥१४१॥
व्यजनैर्वीजयाञ्चक्रुश्छात्रास्ते विह्वलाङ्गकम् ।
चुक्रुशुश्च तमुद्वीक्ष्य श्रुत्वा पौराः समागताः ॥१४२॥

त्यागराजस्तु धर्मात्माऽबोधयत्संज्ञया स्वयम् ।
नेतुं रामस्य पार्श्वं तु स्वात्मानमकुतोभयम् । १४३॥
ततश्च संनताः शिष्या दीनं संगृह्य पाणिभिः
रामसंनिधिमानाय्य पुरतः समवेशयन् ॥१४४॥
दृष्ट्वैव राघवं दीप्तं कारुण्यामृतवर्षिणम् ।
तत्याज शोकं मोहं च शनैरेव महायशाः ॥१४५॥
चिराद् ग्लानिसमाप्लुष्टो नाशक्नोदभिभाषितुम् ।
कृच्छ्रेण धैर्यमालम्ब्य सदुपाविशदासने ॥१४६॥
ततो दृष्ट्वा मुखाम्भोजं राघवस्य गतव्यथः ।
चलमेलरगीतेन प्रार्थयामास राघवम् ॥१४७॥
मनसुलोनीति गीतेन तथाडिकिसुलं त्यिति ।
गीतैस्तु प्रार्थयामास राघवं भक्तबान्धवम् । १४८॥
तदा हि शिष्यस्त्वेकस्तु जघ्येशं तस्य दुष्क्रियाम् ।
विगर्हमाणस्तत्रास्त भृशकोपाकुलान्तरः ॥१४९॥
त्यागराजस्तमाहूय समीपं शिष्यवत्सलः ।
इदमूचे महाप्राज्ञो ह्यनिच्छन्भ्रातृगर्हणाम् ॥१५०॥
मा रोषं भज सच्छील सोदरे मे त्वकारणात् ।
संचोदितस्तु दैवेन कुरुते ह्यवशो जनः ॥१५१॥
तज्ज्ञापुरनिवासस्य पण्डितैः संवृतस्य च ।
आनेतुं मां कथं बुद्धिरुदपद्यत भूपतेः ॥१५२॥
यथा दैवेन तद्भाव्यं तथा भ्रातुर्ममाप्ययम् ।
उत्पादितो महाकोपः कस्तं निन्देत्तु बुद्धिमान् ॥१५३॥
सुखदुःखानि जायन्ते पुण्यपापैः पुरा कृतैः ।
संचोद्यमानं कुर्वन्तं को निन्देदल्पधीरपि ॥१५४॥
इत्युक्तो गुरुणा तेन लज्जया पुनराकुलः ।
शिष्यः शान्तिमवाप्याशु निर्वृतोऽभूत्तदाऽनघः ॥१५५॥

॥ इति श्रीमत्त्यागराजचरिते सुन्दरेशार्यरचिते
'मन्त्रिसमागमो' नाम द्वादशः सर्गः ॥

अथ त्रयोदशः सर्गः ।

सचिवस्तु महात्राज्ञः कोपेन महताऽऽवृतः ।
विवक्षुस्तस्य दुर्वृत्तं राज्ञो गेहं ययौ जवात् ॥१॥
तत्रापश्यत्समासीनं पर्यङ्के हेमचित्रिते ।
महीपतिं महात्मानं गन्धर्वमिव रूपिणम् ॥२॥
दीप्तिमद्भिर्महार्हैश्च भूषणैर्भूषिताङ्गकम् ।
महार्हवस्त्रसंवीतं महार्हमणिकुण्डलम् ॥३॥
रूपेण तेजसा चापि स्पृहणीयं भयानकम् ।
शोधितैर्योधवर्गैश्च मित्रैश्चापि सुरक्षितम् ॥४॥
वपुष्मन्तमिवानन्दं गाम्भीर्यमिव मूर्तिमत् ।
स्पृहणीयं सुहृद्वर्गैर्दुराधर्षं पृथग्जनैः ॥५॥
शरभोजिं महाराजं दृष्ट्वा दूरात्प्रणम्य च ।
तदाज्ञया समासीनो वचनं पुनरब्रवीत् ॥६॥
हन्तायं त्यागराजस्तु वर्तते च यथाश्रुतः ।
धृष्टधीरप्यमर्षात्मा दुर्विनीतश्च राक्षसः ॥७॥
बहुशः प्रियमुक्तोऽपि कारणैर्बहुभिर्दृढः ।
स तु न प्रतिजग्राह वचनं मम मन्दधीः ॥८॥
कृच्छ्रेण यतमानोऽहं तमानेतुमिह प्रभो ।
तिरस्करोति मूढात्मा वानरः प्रार्थितो यथा ॥९॥
संप्रार्थितश्च ज्येष्ठेन बहुशो बहुधाऽपि सः ।
नेच्छत्येव समागन्तुं व्यवसायसमन्वितः ॥१०॥
सज्जोऽस्म्यद्यैव तत्कर्तुं यदाज्ञापयति प्रभुः ।
उल्लङ्घिते शासने तु प्रजां शिक्षितुमर्हति ॥११॥
इत्युक्तो मन्त्रिणा व्यग्रो भृशकोपातुरश्च सः ।
किंचिदुत्थाय पर्यङ्कादन्तान्कटकटाप्य च ॥१२॥

तिर्यगूर्ध्वं ततो दृष्ट्वा हस्तं हस्तेन पीडयन् ।
नेत्राभ्यां कोपरक्ताभ्यां स्फुलिङ्गानिव वर्षयन् ॥१३॥
पादौ भूम्यां दृढं क्षिप्त्वा श्मश्रूण्यामृश्य पाणिना ।
जगाद वाक्यं दुर्धर्षः शरभोजिः सुदारुणः ॥१४॥
किं त्यागेशेन मूढेन ममाज्ञा प्रतिहन्यते ।
कथं वा रक्षति प्राणान्मत्करद्वन्द्वनिष्ठितान् ॥१५॥
दुःसहा त्वियमेकैव राज्ञामाज्ञातिरस्कृतिः ।
वध्य एवाविचार्यैव यो वा स भवतु प्रभुः ॥१६॥
योधानाज्ञापय क्षिप्रं तं बद्ध्वाऽप्यानयन्त्विह ।
वधिष्यामि जडं सद्यो दुर्भगं दुरनुष्ठितम् ॥१७॥
पश्यन्तु लोकाः सर्वेऽपि फलं पापस्य कर्मणः ।
यस्तिरस्कुरुते मूढो राज्ञः संदेशमात्मनः ॥१८॥
इत्थमुक्ते महीपेन कोपेन च मदेन च ।
अहल्या तु तदा साध्वी प्रोवाच महिषी प्रियम् ॥१९॥
किमर्थमाहारयति राजा क्रोधमकारणम् ।
किं स निन्दति राजानमितरान्वा महात्मनः ॥२०॥
उपद्रवति किं साधूनकार्याण्यनुतिष्ठति ।
आनेतव्यः किमर्थं वा राज्ञा गेहं बलेन सः ॥२१॥
श्रूयते रामभक्तः स दृष्टाविति च राघवौ ।
नावमान्यः स शुद्धात्मा शान्तः संनियतेन्द्रियः ॥२२॥
यदि स्पृहा तु वित्तेषु पूर्वमेव स्वयं किल ।
अन्नाभिगृद्धेदीनात्मा पण्डिता इतरे यथा ॥२३॥
अनाकाङ्क्षितवित्तस्य किमस्माभिः प्रयोजनम् ।
किमर्थं वा समायाति मन्त्रिणा प्रार्थितोऽपि सः ॥२४॥
यद्यास्ते विरतो वित्ते स हि पूज्यो विशेषतः ।
समादेशति तं पूज्यं बद्ध्वाऽऽनेतुं कथं प्रभुः ॥२५॥

साधूनामवमन्तृत्वं च्यावयत्यपि वज्रिणम् ।
तस्मादाज्ञां पुरा दत्तां प्रतिसंहरतु प्रभुः ॥२६॥
इत्युदीर्य प्रियं साध्वी प्रेमाकुलहृदम्बुजा ।
प्रार्थयामास राजानं स्वसंदेशनिवर्तने ॥२७॥
शरभोजिर्महाराजो दीनां संप्रेक्ष्य तु प्रियाम् ।
चभाषे वचनं धृष्टं निश्चितं कर्तुमुद्यतः ॥२८॥
स्त्रीत्वाद्ब्रवीषि वचनं यन्न सम्यग्विचिन्तितम् ।
अनिवर्तितसंदेशः कथं वा भवति प्रभुः ॥२९॥
बहुच्छिद्रं राज्यतन्त्रं दुर्वहं दीनचेतनैः ।
धार्यते धृतदण्डेन न हि याच्ञाबलेन तु ॥३०॥
राजा यदाज्ञापयति युक्तं वाऽयुक्तमेव वा ।
प्रजाभिस्तत्तु कर्तव्यं न कर्तव्यं विमर्शनम् ॥३१॥
इत्थं चेत्पृथिवीमेनां पतिभिः शासितुं क्षमम् ।
बहुजातिसमाकीर्णां बहुचित्तैश्च संकुलाम् ॥३२॥
ज्ञात्वा न्यकृतसंदेशमुदासीने मयि स्थिते ।
लङ्घेयुर्मम सर्वेऽपि धैर्यमालम्ब्य शासनम् ॥३३॥
पालयिष्ये कथं भीरु राज्यमेतदुरासदम् ।
दुर्वृत्तमानवैर्जुष्टमहमाज्ञापनाक्षमः ॥३४॥
तस्मात्स त्यागराजोऽपि दण्ड्य एव न संशयः ।
महात्मा वा स भवतु योगी वा भक्तपुंगवः ॥३५॥
नाहं मन्ये साधुशीलं यो ज्येष्ठं नानुवर्तते ।
कथं भवति धर्मात्मा रामभक्तो विशेषतः ॥३६॥
इत्थमुक्त्वा प्रियां भार्यां विनीतां पार्श्वतः स्थिताम् ।
संदिदेश पुराऽऽज्ञप्तं कर्तुं मन्त्रिणमेव सः ॥३७॥
सचिवस्तु तथेत्युक्त्वा यदा प्रस्थातुमुद्यतः ।
शरभोजिः पपातोर्व्यां दग्धगात्र इवाग्निना ॥३८॥

क्रोशंश्च घोरं चरणौ हस्तौ संचालयन्नपि ।
स्वेदक्लिन्नशरीरश्च कम्पमानशिराश्च सः ॥३९॥
धरण्यां वेष्टमानश्च लुठत्याकुलचेतनः ।
सर्वे विषण्णाः संत्रस्ता राज्ञो दृष्ट्वा विपर्ययम् ॥४०॥
परामृशन्ती हस्तेन भर्तारं पृच्छति स्म सा ।
किमकाण्डेन तु भवाल्लुठत्यत्र महाबलः ॥४१॥
भूताभिविष्टः किं नाथः प्रमत्तो व्याधिपीडितः
असह्यवेदनो जातः कथमद्य विशां पतिः ॥४२॥
इत्युक्तः प्रियया दीनं विह्वलो विह्वलाङ्गकः ।
उदरे च स्वहस्तौ स दृढं बद्ध्वा जगाद ताम् ॥४३॥
क्षणेनैव शरीरं मे दहतीव विभावसुः ।
उदरे मूर्ध्नि मेऽसह्या व्यथा कृन्तति भामिनि ॥४४॥
इत्थं यदि मुहूर्तेन न जीवेयं व्यथाकुलः ।
त्वरयन्तेऽद्य मे प्राणा गन्तुं लोकान्तरं प्रिये ॥४५॥
वर्षतोऽश्रूणि नयने कथते हृदयं मम ।
क्षणादियं कथं प्राप्ता दुःसहा वेदना च माम् ॥४६॥
महीपतिरिदं प्रोच्य क्रोशन्दुः सहवेदनः ।
लुठति स्म सपर्यङ्के सर्वान्पश्यंश्च दारुणम् ॥४७॥
आनीताः सहसा वैद्या राजगेहं विचक्षणाः ।
मान्त्रिकाश्च महाप्राज्ञा मन्त्रशास्त्रविशारदाः ।४८।
त्रिस्कन्धपण्डिताश्चापि ज्योतिषप्रथितास्तथा ।
आयाताः प्रेक्ष्य राजानमजानत न किंचन ॥४९।
सुधातुकं तमूचुस्ते वैद्या धातुविशारदाः ।
अभूतापहृतं चैव मान्त्रिका मन्त्रकोविदाः ।५०॥
सुकालमेवामन्यन्त ज्योतिषज्ञा नृपप्रियाः ।
अज्ञातमूलाः सर्वेऽपि बभ्रमुः कलुषेन्द्रियाः ॥५१॥

तप्यते स महाराजो व्यथां सोढुमशक्नुवन् ।
क्रन्दल्लुठञ्श्वसंश्चापि चालयंश्चरणावपि ॥५२॥
परिवार्य स्थिता दीनं विषण्णाः प्रमदाजनाः ।
वर्षन्त्योऽश्रूणि नेत्राभ्यां चक्रन्दुर्दारुणं शुचा ॥५३॥
समानीतस्तदा राज्ञो गुरुर्भागवतोत्तमः ।
शान्तो जितेन्द्रियो विप्रः सर्वशास्त्रविचक्षणः ॥५४॥
स ददर्श भृशं तप्तं कीटं पक्ष्मामिवाहतम् ।
राजानं विह्वलं दीनं लुठन्तं घोरदर्शनम् ॥५५॥
ततः स चिन्तयामास कथमेतदुपस्थितम् ।
अस्य राज्ञः क्षणेनैव महाबलयुतस्य च ॥५६॥
समालोक्य चिरं साधुर्निश्चयं चाधिगत्य सः ।
प्रोवाच मन्त्रिणं दीनं वचनं पार्श्वतः स्थितम् ॥५७॥
नेयं व्याधिर्न भूतेन चाहतिर्दुःसहा पुनः ।
महतस्त्वपराधेन संप्राप्तं प्राणसंकटम् ॥५८॥
राज्ञाऽपराद्धं कस्मै वा भक्ताय च महात्मने ।
अज्ञानाद्यदि वा ज्ञानात्तच्छंसत रहःस्थितम् ॥५९॥
प्रतीकारः क्षणात्कार्यः प्रयत्नात्प्रणतात्मभिः ।
विलम्बे भूपतिः प्राणसंशयं प्राप्नुयाद् ध्रुवम् ॥६०॥
इत्युक्तवति देवर्षिप्रतिमे च पुरोहिते ।
सत्यसंधस्तदा मन्त्री जगाद वचनं सुधीः ॥६१॥
क्षेत्रे पञ्चनदे पुण्ये त्यागराज इति श्रुतः ।
रामभक्तो गीतशास्त्रे पण्डितो वसति द्विजः ॥६२॥
समानाय्य गृहं चेदं गीतं कारयितुं नृपः ।
मामेव प्रेषयत्सद्यो नैच्छदागन्तुमत्र सः ।६३॥
उच्छ्रितानं तं विप्रं वद्ध्वाऽऽनेतुं कृतत्वरः ।
अथादिशच्च मां राजा नैतदन्यकृतं प्रभो ॥६४॥

श्रुत्वैतद्वचनं घोरं संविग्नः स पुरोहितः ।
किमध्यवसितं मन्त्रिन्नराज्ञा वा पदगर्विणा ॥६५॥
इदमाश्चर्यभूतं मे कथं राजाऽद्य जीवति ।
तस्य धर्मात्मनो धैर्यादपकारं समादिशन् ॥६६॥
कुबेरो वासवो वाऽपि भक्तानां धर्मशालिनाम् ।
चिकीर्षुर्विप्रियं कर्म मस्मीभवति तत्क्षणात् ॥६७॥
इत्थमुक्त्वा रघूत्तंसं ध्यायन्मनसि राघवम् ।
हस्तेनामृशदङ्गानि राज्ञस्तु सदयं गुरुः ॥६८॥
तत्क्षणाद्विनिवृत्तार्तिः स्वस्थश्चाभून्महीपतिः ।
शान्तेन मनसा सर्वान्साश्चर्यं समुदैक्षत ॥६९॥
तुतुषुश्च ततः सर्वे विनष्टोपद्रवं नृपम् ।
अहल्या च निरीक्ष्याशु महिषी मुदमावहत् ॥७०॥
तत उत्थाय पर्यङ्काद्दृष्ट्वा गुरुमुपस्थितम् ।
सहसा विनयाच्चैव गौरवाच्च ननाम तम् ॥७१॥
आशीर्भिः प्रतिनन्द्यैनं राजानं प्रणतं गुरुः ।
बभाषे श्लक्ष्णमधुरैर्वचोभिः प्रीणयन्मुदा ॥७२॥
सुशिक्षितोऽपि धर्मात्मन्कथं वाऽविनयं प्रभो ।
कुरुषे साधुशीलेषु महात्मसु महीपते ॥७३॥
किमर्थं त्यागराजं तं रामभक्तं तपोधनम् ।
त्यक्तवित्तस्पृहं बद्ध्वा समानेतुं त्वमिच्छसि ॥७४॥
तेनैव पापयोगेन त्वया प्राप्तेदृशी दशा ।
असह्यमिममत्युग्रं प्राप्तवानस्युपद्रवम् ॥७५॥
त्वरमाण इतो गत्वा प्रसादय महाधियम् ।
येनैव शान्तपापस्त्वं क्षेमं पुनरवाप्नुयाः ॥७६॥
आदिष्टो गुरुणा प्रेम्णा कारुण्यनिलयेन सः ।
जगाद विनयान्निष्पुँल्लज्जयाऽवनताननः ॥७७॥

मौढ्येनैवेदमारब्धं क्षमस्व करुणानिधे ।
प्रसादये महात्मानं गत्वा पश्चनदं स्वयम् ॥७८॥
इत्युक्तवन्तं राजानं शरभोजिं महामनाः ।
आशीर्भिरभिनन्द्यापि जगाम गृहमात्मनः ॥७९॥
उपस्थेव तदा राजा प्रस्थानमभिरोचयन् ।
संदिदेश धनाध्यक्षं योधाधीशं च सत्वरः ॥८०॥
सज्जीकुर्वन्तु सर्वेऽपि प्रस्थानार्हांस्तुरंगमान् ।
अन्यानप्यखिलान्भक्तः संपूज्यानेतुमर्हति ॥८१॥
महाराजेन संदिष्टाः संघीभूय त्वरान्विताः ।
प्राप्ते चोषसि सज्जं तद्भूपतेस्ते न्यवेदयन् ॥८२॥
समलंकृत्य चात्मानं प्रयाणाभिमुखं प्रियम् ।
प्रार्थयामास भर्तारं स्वस्यानुगमनं प्रिया ॥८३॥
परितुष्टः प्रियावाक्यात्तया सह दृढव्रतः ।
आरुह्य शिबिकां यान्मुक्तामणिविचित्रिताम् । ८४
पदातयः पुरो जग्मुः शरचापासिपाणयः ।
वादयन्तश्च पटहाननुजग्मुर्नराः शतम् ॥८५॥
तुरगाधिष्ठिता वीरा दृढबद्धासिखेटकाः ।
वपुष्मन्तश्च सोष्णीषा धरन्तः कवचं दृढम् ॥८६॥
जग्मुस्ते दर्शनीयाश्च पङ्क्तिशः पङ्क्तिशश्च ते ।
कथयन्तो राजसिंहापदानानि च भूरिशः ॥८७॥
मन्दं ययुर्गजाः पश्चात्सर्वभूषणभूषिताः ।
महार्हास्तरणोपेता महाघण्टाविनादिताः ॥८८॥
गाम्भीर्यात्परिणामेन चलत्पर्वतसंनिभाः ।
श्वेतचामरसंशोभिशूर्पश्रोत्रमनोहराः ॥८९॥
ततो ययुर्वादयन्तः श्रोत्रमानसहारिणः ।
तन्त्रीकृतान्रन्ध्रकृतांस्तथा चर्मकृतानपि ॥९०॥

ततः प्रभुर्महाराजः शरभोजिर्महामतिः ।
शिबिकां दर्शनीयां तामधिरुह्य ययौ मुदा ॥९१॥
अलंचकार सा साध्वी वामं तस्य महीक्षितः ।
वृत्रहेव शचीयुक्तस्तदा भाति स्म भूपतिः ॥९२॥
पार्श्वयोरुभयोस्तस्य रक्षिणः सुदृढायुधाः ।
धीराश्च धृतिमन्तश्च योधा राज्ञः सुसंमताः ॥९३
पृष्ठतोऽनुययौ मन्त्री सेनाध्यक्षश्च वाहनैः ।
धनाध्यक्षोऽनुयाति स्म बहुकोशसमन्वितः ॥९४॥
पृष्ठं रक्षुर्योधाश्च तुरंगाधिष्ठिताः पुनः ।
पदातयश्च ते वीराः पश्यन्तश्च चतुर्दिशः ॥९५
शरभोजिस्तदा राजा दिदृक्षुर्भक्तपुंगवम् ।
शंकरं द्रष्टुमुद्युक्तो मघवेव व्यराजत ॥९६॥
प्रयात्येवं महाराजे पूर्वानावेदितागमे ।
संभ्रमाच्च समुत्थाय मार्गावासा ववन्दिरे ॥९७॥
तदा तु वातमार्गेण राजागमनदर्शिनः ।
अतिजग्मुस्तदा शङ्कां जनाः पञ्चनदालयाः ॥९८॥
किमर्थं तु महाराजः संभ्रमेणोपसि प्रभुः ।
समायाति सपत्नीको ह्यनावेद्यैव केवलम् ॥९९॥
अनुचिन्त्य च पौरास्ते शङ्कमानाः सहस्रशः ।
बहून्वदन्तः कृच्छ्रेण हेतून्राजागतौ स्थिताः ॥१००॥
संभ्रान्ताश्च विषण्णाश्च संविग्नाश्च जनास्तदा ।
न्यवसन्गृहपृष्ठेषु भीतभीताश्च भूपतेः । १०१॥
शुश्राव च स जप्येशः शरभोजेः समागमम् ।
अकम्पत भृशं त्रासात्पूर्ववृत्तमनुस्मरन् ॥१०२॥
शशाप त्यागराजं स बहुधा विमनेतनः ।
आत्राऽनेनाधुना घोरामापदं प्राप्तवानहम् ॥१०३॥

अहो नु खलु मूढेन नायं त्यक्तः स गर्वितः ।
निवसेयं गृहेऽन्यस्मिन्न च मां दण्डयेत्तदा ॥१०४॥
दुर्धर्षस्तु महाराजः कोपनो भृशमत्सरः ।
अपमानं कृतं भ्रात्रा कथं वा स सहिष्यते ॥१०५॥
मन्त्रिणा चोद्यमानस्तु स्वयमायाति सत्वरम् ।
न करिष्यति किं वाऽद्य तं मां च बलसंयुतः ॥१०६॥
अहो नष्टोऽस्मि मन्दात्मा भ्रात्राऽनेनाद्य गर्विणा ।
कथं वा जीवितुं शक्यं प्रेयस्या वा मयाऽपि वा ॥१०७॥
रामब्रह्मकुलं नष्टं दुर्विनीतसुतेन हि ।
केनाधुना तराम्येनं शोकाम्बुधिमुपस्थितम् ॥१०८॥
इत्येवं चिन्तयन्दीनो जप्येशो भयमोहितः ।
गृहद्वारमुपेत्याशु दृष्ट्वाऽन्तश्च न्यवर्तत ॥१०९॥
पाकागारे कवाटान्ते क्षणं तिष्ठति विह्वलः ।
गृहपृष्ठं द्रवन्याति निलीनः स भयाकुलः ॥११०॥
क्व लीनं मां न पश्येयुः सेवका इत्यमार्गयत् ।
प्रेयसीं विह्वलां वीक्ष्य वर्षाश्रूणि विह्वलः ॥१११॥
संभ्रान्तहृदया साऽपि पत्युर्दृष्ट्वा कृशं मुखम् ।
कलभे पङ्कलग्ने तु करेणुरिव विव्यथे ॥११२॥
तदा सोवाच भर्तारमनुचिन्त्य सुमध्यमा ।
मा स्म भीतिस्त्वया कार्या राज्ञस्त्वागमनं प्रति ॥११३॥
सचिवस्तु पुराऽऽयातो ज्ञातवानस्मदीप्सितम् ।
गजभक्तिं तथाऽस्माकं भ्रातृदौःशील्यवेदनात् ॥११४॥
आवेदयेच्च तन्नूनं सत्यवादी महौजसः ।
किमर्थं दण्डयेदस्मान्निरपायांस्तस्य तु भूपतिः ॥११५॥
विहाय शोकं मोहं च भज धैर्यं महामते ।
गच्छ पूर्वं च तद्राज्ञे विज्ञापय कृतं त्वया ॥११६॥

लगुडं च करे कृत्वा ताडितो येन सोदरः ।
दर्शयाद्य स्वयं राज्ञे स तु तुष्टो भवेत्कृती ॥११७॥
इत्युक्तः प्रियया धृष्टं किंचित्संप्राप्तधैर्यवृत् ।
प्रययौ धृतदण्डश्च राज्ञस्त्वभिमुखं ततः ॥११८॥
संविग्नाश्च ततः शिष्याः कम्पमानाङ्गयष्टयः ।
शशंसुस्त्यागराजाय तं महीपतिमागतम् ॥११९॥
मन्त्रिणा श्रुतवृत्तान्तः समायाति प्रकोपनः ।
शरभोजिर्महाराजः सर्वयोधसमावृतः ॥१२०॥
किं करिष्यति वा सोऽस्मान्भवन्तं वाऽत्यमर्षणः ।
पौरा भयेन संविग्ना गृहपृष्ठे वसन्ति ते ॥१२१॥
संभ्रमागमने शङ्कां प्राप्तवन्तो मनीषिणः ।
व्यामियन्ते स्वकीये न कर्तव्ये भयमोहिताः ॥१२२॥
समागच्छति सेनाभिर्दुर्धर्षः शत्रुमर्दनः ।
केन वाऽद्य भयादस्मात्तरेम गुरुपुंगव ॥१२३॥
भयकम्पितसर्वाङ्गा गद्गदैर्वचनैः पुनः ।
इत्यमुक्त्वा गुरुं दीनं व्यतिष्ठन्तातिविह्वलाः ॥१२४॥
तान्दृष्ट्वा भयविद्धाङ्गांस्त्यागराजः स्मिताञ्चितः ।
इदमूचे महाप्राज्ञो महाभागवतोत्तमः ॥१२५॥
पुरुषं पुरुषा यूयं दृष्ट्वा किं भीतिमाप्नुथ ।
दृष्ट्वैव हस्तमितरं हस्तवत्किल भीरवः ॥१२६॥
कृतानां पुण्यपापानामनुभोक्तुं फलानि तु ।
जीवाः प्राप्य भुवं यान्ति फले भूते पुनर्दिवम् ॥१२७॥
जीवः स एकः संप्राप्तोऽनुभोक्तुं तत्फलानि तु ।
तथैवाहं च यूयं च भेतव्यं केन कस्य वा ॥१२८॥
कृतानि तेन पुण्यानि राज्यश्रीप्रापकाणि च ।
अनुभुङ्क्ते च तान्यद्य व्ययन्निव पुरार्जितम् ॥१२९॥

अन्ये तु सेवकास्तस्य कृत्वा तत्प्रापिकां कृतिम् ।
सेवकत्वमनुप्राप्य भुञ्जते तत्फलं त्वमी ॥१३०॥
तस्माद्भेदो न जीवेषु सर्वे ह्येकगुणान्विताः ।
मा भैष्ट दृष्ट्वा राजानं मन्त्रिणं वा भटांस्तथा ॥१३१॥
उत्सवेषु यथा दृष्टा भूतास्त्वन्तर्नरोद्भूताः ।
तथा जीवैरुह्यमानाश्चरन्ति नृप सेवकाः ॥१३२॥
अस्माकं तु शुभं कर्म प्रारब्धं यदि वर्तते ।
राज्ञ वा तस्य योधैर्वा न साध्यं हन्तुमुद्यतैः ॥१३३॥
अशुभं यदि तत्कर्म हन्तुमस्मानलं नृणैः ।
एवं विचिन्त्य शास्त्रार्थं निर्भया भवत प्रभोः ॥१३४॥
यद्येष राजा हन्त्यस्मान्हीयते किमु वा ततः ।
प्रारब्धहीनो जीवोऽयं जन्मान्तरमुपैष्यति ॥१३५॥
तस्मात्त्यक्त्वा भयं मोहं धैर्यमालम्ब्य तिष्ठत ।
यद्यत्कर्म तु कर्तव्यं कुरुध्वं तान्यतन्द्रिताः ॥१३६॥
श्रुत्वैतद्वचनं सार्थं सर्वे त्यक्तभयाः पुनः ।
प्रातःकालोचितं कर्म चक्रिरे श्रद्धयान्विताः ॥१३७॥
त्यागराजश्च रामाय प्रातः क्षीरं निवेद्य च ।
माकेलरेति गीतेन संनिधौ गायति स्म सः ॥१३८॥
जप्येशो दण्डहस्तस्तु चलन्मन्दं पदात्पदम् ।
पुरोऽभिगच्छन्दीनात्मा मार्गे भीरुर्व्यतिष्ठत ॥१३९॥
अदूरादागतान्योधांस्तथा राज्ञः परिच्छदान् ।
वितत्रास तदा दृष्ट्वा वृक्षमूले व्यलीयत ॥१४०॥
दृष्ट्वैनं भृशसंविग्नं कश्चित्पूर्वादिनागतः ।
योधो गृहीत्वा हस्तेन राज्ञे तस्मै व्यजिज्ञपत् ॥१४१॥
आताऽयं त्यागराजस्य जप्येश इति नामतः ।
धृतदण्डेनैव भवान्स्वभावं वेत्तुमर्हति ॥१४२॥

यमदूतनिकाशेन योधेन स करे धृतः ।
पुरो ददर्श राजानं वैवस्वतमिवापरम् ॥१४३॥
भयविह्वलचेताः स कम्पमानकराञ्जलिः ।
ऊचे सगद्गदं वाक्यं जप्येशो राजसंनिधौ ॥१४४॥
भ्राताऽहं त्यागराजस्य नाहं तमभिरोचये ।
तस्य कार्येषु विघ्नानि यथाशक्ति करोम्यहम् ॥१४५॥
विग्रहांश्च पुरा हृत्वा प्राक्षिपं च सरिज्जले ।
पुनः केनापि संप्राप्य पूजयत्यार्य सांप्रतम् ॥१४६॥
यदा तु मन्त्रिणाऽऽज्ञप्तः पूर्वेद्युर्नाकरोद्वचः ।
अनेन लगुडेनैव गर्वितं तमताडयम् ॥१४७॥
मृत इत्येव निश्चिन्वन्सुखेनासं पुरा निशि ।
जीवन्नेव स मूढात्मा किंचित्कृच्छ्रेण वर्तते ॥१४८॥
न द्वेष्म्यहं तु राजानं करोमि वचनं प्रभोः ।
तेनाद्यापराध्यन्तं भवान्क्षिक्षितुमर्हति ॥१४९॥
इत्थमुक्ते तदा राजा प्रहसन्नेव चाब्रवीत् ।
कुत्र ते त्यागराजस्तु दुरात्मा भृशगर्वितः ॥१५०॥
हस्तं कृत्वा मुखे सोऽपि विनयेन प्रणम्य च ।
गृहस्थितं त्यागराजमवोचत्पृथिवीपतिम् ॥१५१॥
गच्छ पूर्वमिति प्रोच्य विससर्ज च तं नृपः ।
पुनर्जातमिवात्मानं विसृष्टः समचिन्तयत् ॥१५२॥
त्वरमाणो महाराजस्त्यागराजगृहं ययौ ।
अनादृत्यैव तान्पौरा॥ल्लाजमोदकधारिणः ॥१५३॥
समागते महाराजे गृहद्वारं स धर्मवित् ।
प्रतिजग्राह तं हृष्टः सोपायनकरः स्वयम् ॥१५४॥
त्यागराजं तदा दृष्ट्वा भक्तिं मूर्तामिव स्थितम् ।
विनयेनान्वितो भूपः शिविकायां अवातरत् ॥१५५॥

ननाम च महाप्राज्ञस्त्यागराजं महीपतिः ।
प्रार्थयामास धर्मात्मा स्वापराधक्षमापणम् ॥१५६॥
तपोनिधे महाभाग क्षन्तुमर्हति मां भवान् ।
राज्याधिकारमत्तेन कृतमप्यविचिन्तितम् ॥१५७॥
विचक्षणोऽपि मे मन्त्री दुष्कृतेर्न न्यवारयत् ।
प्रसादनार्थं भवतः सपत्नीकः समागतः ॥१५८॥
इत्युक्तवन्तं राजानं पश्चात्तापाभितापितम् ।
प्रतिगृह्य च पाणिभ्यां त्यागेशस्त्विदमब्रवीत् ॥१५९॥
किमर्थं भजते दैन्यं राजा संपूर्णमानसः ।
पराक्रमेत न कथं प्रजासु पृथिवीश्वरः ॥१६०॥
अनेनैव मनःशान्तिं प्राप्नुवन्ति नराधिपाः ।
बहुच्छिद्रैर्दुर्वहाया भर्तारो राज्यसंपदः ॥१६१॥
इत्थं स बहुमानेन प्रोच्य राजानमादरात् ।
आनिनाय स तुष्टात्मा पूजागृहमनिन्दितम् ॥१६२॥
राजा तु दृष्ट्वा साश्चर्यं राघवं तेन पूजितम् ।
संतुष्टो मोहितस्तत्र लावण्येन च तेजसा ॥१६३॥
प्रणयेण कथाः पूर्वाश्चिरं संलपतोर्गतम् ।
माध्याह्निकक्रियाकालमनुचिन्त्याब्रवीन्नृपः ॥१६४॥
नेमं व्यर्थयितुं युक्तं भवतः कालमर्हितम् ।
आमन्त्रये पुनर्द्रष्टुं भवन्तं भक्तपुंगव ॥१६५॥
इत्युक्त्वा पुरतस्तस्य महार्हाण्यम्बराणि च ।
भूषणानि च रम्याणि तदा राजा न्यवेशयत् ॥१६६॥
तत्र तं प्रार्थयामास ग्रहणाय समाहितः ।
समग्रहीत्प्रीतिदानं परित्यक्तुमनीश्वरः ॥१६७॥
ततोऽभिवन्द्य नियतो राजा च महिषीसखः ।
पुरं प्रतस्थे मेधावी परिवारैः समावृतः ॥१६८॥

गते तस्मिन्महाराजे जप्येशमभिवाद्य सः ।
सर्वाणि च महाराजदत्तानि नियतो ददौ ॥१६९॥
गृहीत्वा तानि सर्वाणि लज्जयाऽवनतस्तदा ।
पश्चात्तापाभिभूतश्च द्वेषं तस्मिञ्जहौ ततः ॥१७०॥
ततः प्रभृति जप्येशः प्रेम तस्मिन्न्यवेशयत् ।
त्यागराजोऽपि धर्मात्मा मुमोद ज्येष्ठलालितः ॥१७१॥

॥ इति श्रीत्यागराजचरित्रे सुन्दरेशार्यविरचिते
'शरभोजिसमागमो' नाम त्रयोदशः सर्गः ॥

अथ चतुर्दशः सर्गः ।

एकदा त्यागराजस्तु गायन्नास्त पुरः प्रभोः ।
बहिर्गेहे समासीनाः शिष्या गीतानि तेऽपठन् ॥१॥
नेत्रे निमीलयन्गीते लीयमानमनास्तदा ।
सुश्रुतिर्गायति स्मेति सर्वलोकदयानिधे ॥२॥
गृहकृत्येषु सुव्यग्रा पत्नी सा कमलाम्बिका ।
यदृच्छया गता तत्र द्वारं पूजागृहस्य तु ॥३॥
साऽपश्यद्विस्मयाक्रान्ता रामं सीतां च लक्ष्मणम् ।
तथा भरतशत्रुघ्नौ मारुतिं पुरतः स्थितम् ॥४॥
वर्षतः करुणासारं स्वभर्तरि कृपान्वितान् ।
शृण्वतः सुप्रियं भर्तुर्गीतानि मधुराणि च ॥५॥
साद्भुतं तांस्तु पश्यन्ती नेत्राभ्यां सुमनोहरान् ।
तस्थौ सा सुचिरं कालं पतिस्तन्नावबुध्यत ॥६॥
हृदये राघवं कृत्वा तद्गुणेषु मनः स्थिरम् ।
निर्व्यापारेन्द्रियैरास्त संयमीव स निश्चलः ॥७॥
बद्धाञ्जलिपुटा साध्वी भक्तिपूता मनस्विनी ।
आपिबन्तीव नेत्राभ्यां तस्थौ तद्रूपसंपदम् ॥८॥

चिरेण तु यदा भर्ताऽपश्यदुन्मील्य चक्षुषी ।
ते त्वन्तर्दधिरे क्षिप्रं विद्युज्ज्वलितवर्चसः ॥९॥
संभ्रमेण पतिं प्राप्य विह्वला विनताऽनना ।
समागत्य गतं रामं प्राह भ्रातृसमन्वितम् ॥१०॥
अनुन्मीलितनेत्रेण भवता नेक्षिताः प्रिय ।
अत्रागता महाभागा देवास्तेऽतुलवर्चसः ॥११॥
अहो नु खलु सौन्दर्यमहो तेजो दुरासदम् ।
किं वक्ष्ये मूढचित्ताऽहं तेषां तु परमां प्रभाम् ॥१२॥
उपविष्टः पुरो वायुसुतः शुश्राव कीर्तनम् ।
तिष्ठन्रामो दत्तहस्तो जानक्यंसे मनोहरे ॥१३॥
पार्श्वे भरतशत्रुघ्नौ लक्ष्मणश्च महामतिः ।
अन्योन्यं श्लिष्टहस्तौ तौ गीतं ते शृणुतः प्रभो ॥१४॥
इत्युक्तवत्यां जायायां त्यागराजः सुदुःखितः ।
उवाच वचनं साध्वीं प्रियामप्रतिमां भुवि ॥१५॥
वञ्चितोऽसि महाभागे रामेण विदितात्मना ।
ददता दर्शनं तेऽद्य मीलिताक्षो ह्यहं स्थितः ॥१६॥
पापं कृतं मया साध्वि पूर्वजन्मनि दारुणम् ।
यदत्रोपस्थितास्तेऽपि न दृष्टाः पापकर्मणा ॥१७॥
कृतपुण्याऽसि भद्रं ते तान्प्रेक्षितवती यतः ।
श्लाघनीयाऽसि नारीणां कृतकृत्याऽसि साम्प्रतम् ॥१८॥
इति श्रुत्वा वचः पत्युर्लज्जयाऽवनताऽनना ।
पतिं प्रदक्षिणीकृत्य नत्वा चान्तर्गृहं ययौ ॥१९॥
इत्थं काले गते पुण्यक्षेत्राणि स सिषेविषुः ।
संवृतः शिष्यसंघेन प्रतस्थे बुधसत्तमः ॥२०॥
ख्यातं भूलोकवैकुण्ठं सद्यजातीरशोभितम् ।
श्रीरङ्गं स ययौ यत्र शयानो हरिरर्च्यते ॥२१॥

तत्र दृष्ट्वा रङ्गनाथं तुष्टाव मधुसूदनम् ।
करुणा जूटवय्येति रङ्गशायीति कीर्तनैः ॥२२॥
ततः स पुण्यतोयेषु स्नात्वा च विधिवत्तदा ।
प्रेक्षमाणो दृष्टिरम्यक्षेत्राणि विचचार च ॥२३॥
गत्वा च सुचिरं कालं वेङ्कटाचलमाययौ ।
आरुह्य शिष्यवर्गेण शिखरं तस्य भूभृतः ॥२४॥
पुष्करिण्यां ततः स्नात्वा नियतो नियतेन्द्रियः ।
जगामालयमानन्दतुन्दिलश्च रमापतेः ॥२५॥
तत्रापश्यत्स्थितान्भीमान्रक्षकान्सेवकानपि ।
योधानिव युयुत्सूंस्तांस्तोत्रवेत्रकरान्बहून् ॥२६॥
चिरं सुविमृशन्कालं तेषां तु स्थितिकारणम् ।
सुधीर्विचक्षणः सोऽपि नाध्यगच्छद्विनिश्चयम् ॥२७॥
बलिनो भीमकायाश्च दण्डेनापि समन्विताः ।
चरन्त्यत्र किमर्थं वा शान्तिपूते महालये ॥२८॥
मधुश्च निहतः पूर्वं तथाऽन्ये रजनीचराः ।
जिघांसू राक्षसं कं वा प्रभुरेतैश्च वर्तते ॥२९॥
नैते तु पार्षदास्तस्य दृश्यन्ते राक्षसा इव ।
हन्तुं किमभिवर्तन्ते श्रीशं चाऽस्मांस्तदीप्सितान् ॥३०॥
इत्यादिभिस्तु विविधैश्चिन्तयित्वा महामतिः ।
वार्यमाणोऽपि वीरैस्तैः कृच्छ्रादुल्लङ्घ्य तान्ययौ ॥३१॥
प्रभोः श्रीवेङ्कटेशस्य पावनं प्राप्य संनिधिम् ।
विरस्करणिकारुद्धदृष्टिर्नावाप दर्शनम् ॥३२॥
तेरतीयकरादेति गीतेन प्रार्थयत्प्रभुम् ।
करुणाम्बुनिधिस्तां तु निरास्थत्तत्क्षणात्तदा ॥३३॥
वेङ्कटेशं तथाऽपश्यद्दिव्यतेजःसमुज्ज्वलम् ।
मन्दस्मेरमुखाम्भोजस्पृहणीयाकृतिं प्रभुम् ॥३४॥

कर्पूरशोभिसर्वाङ्गं सर्वाभरणभूषितम् ।
नानाकुसुममालाभिः परिशोभितपार्श्वकम् ॥३५॥
तं दृष्ट्वा परितुष्टश्च तुष्टाव मधुसूदनम् ।
मध्यंदिने च संप्राप्ते वेङ्कटेशनिगुत्विति ।३६।
दृष्ट्वा स्तुत्वा तु सुप्रीतो वेङ्कटेशं मधुद्विषम् ।
अवातरच्च शिखराच्छिष्यवर्गसमावृतः ॥३७॥
मूलेऽपश्यत्सुन्दरेशं पूर्वस्निग्धं मनःप्रियम् ।
स्वस्यागमनमाकाङ्क्ष्य चिरेण स्थितमादरात् ॥३८॥
दृष्ट्वा तु तं परं मोदं प्राप प्रणयिनां वरः ।
चिराद्विरहितं बन्धुं प्राप्येव हृदयप्रियम् ॥३९॥
सोऽपूजयत्त्यागराजं स्नानपानादिभिः प्रियम् ।
कोवूरित्याह्वयं ग्रामं स्वस्य चानीनयत्ततः ॥४०॥
तत्रापि तं महार्हैश्च भोजनाच्छादनैः प्रियैः ।
सशिष्यं पूजयामास पूजार्हं प्रीतिसंभृतः ॥४१॥
न्यवसत्तत्र सुखितः सुन्दरेशेन पूजितः ।
चेतःप्रियस्य मित्रस्य सङ्गेनात्यन्तनिर्वृतः ॥४२॥
नित्यं शिवालयं गत्वा तुष्टाव परमेश्वरम् ।
सौन्दर्यनायिकायुक्तो यत्रास्ते सुन्दरेश्वरः ।।४३॥
कोरिसेविम्परारेति नम्मिवाचिन नन्विति ।
तथा वसुधनीवाण्टि कीर्तनैर्बहुभिस्तदा ॥४४॥
संपूजयन्नपि चिरं सुन्दरेशः प्रियातिथिम् ।
नोपालभत तृप्तिं स मोक्षकाङ्क्षीव सिद्धिभिः ॥४५॥
त्यागराजस्तु धर्मात्मा क्षेत्राटनकृतोद्यमः ।
प्रार्थयामास सुस्निग्धं प्रस्थानमभिरोचयन् ।।४६॥
सुन्दरेशस्तदा दीनो दृष्ट्वा गन्तुं समुत्सुकम् ।
प्रास्थानिकानि कृत्यानि विमनाः स तदाऽकरोत् ॥४७॥

शिबिकां सम्यगास्तीर्णां सज्जीकृत्य न्यवेदयत् ।
तामारोहत्यागराजो वाह्यमानां दृढैर्नरैः ॥४८॥
शिष्यास्तमन्वयुर्हृष्टाः पश्यन्तो नगराणि च ।
सरांसि सरितश्चैव कान्तारााणि विशेषतः ॥४९॥
इत्थं गच्छत्सु सर्वेषु संध्याकालोऽभ्यवर्तत ।
पतङ्गं मज्जयन्नब्धौ पतगान्निलयेषु च ॥५०॥
कृतस्नानास्तदा संध्यां विनिर्वर्त्य शुचौ जले ।
प्रतस्थिरे शुभात्मानो रामनामपरायणाः ॥५१॥
गच्छन्तो दूरमध्वानं काननं भीषणं महत् ।
तिष्ठन्मार्गं समावृत्य ददृशुस्ते भयान्विताः ॥५२॥
शिबिकान्तःस्थितस्त्यागराजः संयमिनां वरः ।
ध्यानयोगमुपादाय न किंचिज्ज्ञातवान्पथि ॥५३॥
गुरवे तु तदा वक्तुमनीशा भयमोहिताः ।
शिबिकामन्वगुश्छात्राः सर्वतः परिशङ्किताः ॥५४॥
वर्षर्तुद्योतका मेघाः पीत्वा चाम्बुनिधेरपः ।
जगर्जुराकाशगताः पीत्वेव मदिरां नराः ॥५५॥
अम्बुधेरुद्गतश्चन्द्रस्तोयेन सह पीतवत् ।
मेघोदरान्तर्मग्नश्च ददृशे न पृथग्जनैः ॥५६॥
पतिं बद्ध्वा निवेश्यान्तस्तदीया ललना इव ।
तारका मेघवृन्दैस्तु ग्रस्यन्ते तत्र तत्र च ॥५७॥
मेघावृते शशाङ्के च तथा तारागणेष्वपि ।
तमसा चावृतं सर्वं क्रव्यादानां यथा मनः ॥५८॥
बहुशाखास्तथा वृक्षा वर्धयन्ति स्म तत्तमः ।
उदर्या इव सिंहानां बह्वयो मानसं तमः ॥५९॥
शब्दस्तु शीतवातानां संविग्नानकरोन्नरान् ।
मृगानुत्कुछिनपवनाञ्शार्दूलनिनदो यथा ॥६०॥

बबृषुस्तोयदा मन्दमश्रूणीव भयाकुलाः ।
दृष्ट्वा शरासनं पार्श्वे पत्युः स्वस्यासुरद्विषः ॥६१॥
इत्थं भयानके सर्वकान्तारे तमसाऽऽवृते ।
जग्मुस्ते भयविद्धाङ्गाः कलुषेन्द्रियमानसाः ॥६२॥
अचिरेण पपातोर्व्यां शिबिकायाः पुरस्तदा ।
घनशब्देन पाषाणः पर्वतादुद्धृतो महान् ॥६३॥
तेन शब्देन वित्रस्ताः पुरतो गन्तुमक्षमाः ।
दिशश्चतस्रस्तेऽपश्यन्सर्वे संजातसंभ्रमाः ॥६४॥
पपातान्यश्च पाषाणः पार्श्वे तेषां च पश्यताम् ।
वाहास्तु शिबिकां भूमौ न्यक्षिपन्भीरवो भृशम् ॥६५॥
शिष्या जातभयास्तत्र पूर्वमेवाभिशङ्किताः ।
कम्पमानेन गात्रेण व्यतिष्ठन्त विमोहिताः ॥६६॥
अथैक्षन्त दिशः सर्वाः संप्राप्तप्राणसंशयाः ।
संघं नराणां ददृशुर्दूरदेशे स्थितं तदा ॥६७॥
कृपाणपाणिभिर्जुष्टं तथा धृतशरासनैः ।
भीमायुधैर्भीमकार्यैर्बहुभिश्च समावृतम् ॥६८॥
धृत्वा बहूनि रूपाणि प्राप्तं वैवस्वतं यथा ।
मन्वानास्तान्भृशं घोरान्व्यलीयन्त विचेतसः ॥६९॥
ध्यानानन्दाम्बुधौ मग्नस्त्यागराजो महायशाः ।
न किंचिज्ज्ञातवांस्तत्र काननं वाऽपि तस्करान् ॥७०॥
अनन्यगतिकाश्छात्रा गुरुं ते तं व्यबोधयन् ।
सुरा इवासुरग्रस्ताः केशवं योगमास्थितम् ॥७१॥
प्रबुद्धस्त्यागराजस्तु दृष्ट्वा तान्संभ्रमाकुलान् ।
छात्रान्पप्रच्छ संविग्नांस्तेषां दैन्यस्य कारणम् ॥७२॥
शिष्या विज्ञापयामासुर्हस्तैः संदर्श्य तां दिशम् ।
तस्करानागतांस्तत्र भयविह्वलचेतसः ॥७३॥

श्रुत्वैतत्त्यागराजस्तु प्रत्युवाच स्मितेन च ।
अस्मान्संभर्त्स्य संताड्य कमर्थं प्राप्नुयुस्तु ते ॥७४॥
अर्थार्थिनस्तानाहूय दर्शयध्वं च शून्यताम् ।
येन प्रशान्तचित्तास्ते प्रतिगच्छेयुरन्ततः ॥७५॥
इत्थमुक्तास्तु गुरुणा विषीदन्तश्च लज्जया ।
पीडयन्तः स्वहस्तौ त इदमूचुस्तदा गुरुम् ॥७७॥
हन्त किं वाऽद्य वक्ष्यामः सुन्दरेशो महद्धनम् ।
पूजायै रामचन्द्रस्य शिबिकायां न्यवेशयत् ॥७७
अस्माभिश्च निरस्तं तद्गुरुभीतैस्तपोधन ।
स्नेहवात्सल्ययुक्तेन तेनेदं स्थापितं धनम् ॥७८॥
पूजार्थमेव रामस्य दत्तं स्निग्धेन तद्धनम् ।
नोक्तपूर्वं मयेनाद्य मयान्नः क्षन्तुमर्हति ॥७९॥
श्रुत्वैतद्वचनं घोरं शिष्याणां मूढचेतसाम् ।
उपास्थितमिदं घोरं तेनैवेति स विव्यथे ॥८०॥
पश्यताद्यार्थलोभस्य फलं पापमुपस्थितम् ।
भविष्यदशुभानेव यान्ति चित्तानि बालिशाः ॥८१॥
समाहूय च तेभ्योऽत्र देयमेतन्न संशयः ।
प्राप्नुयाम सुखं नैव यावच्चिष्टेत्तदत्र हि ॥८२॥
इत्युक्ता गुरुणा ते तु विह्वलेन दयालुना ।
विनयेन ततः प्रोचुः प्रसाद्य च भयान्विताः ॥८३॥
यद्भवान्वक्ति चास्माभिस्तत्कार्यमविचारतः ।
तथाऽपि पूर्वं यद्वृत्तं तद्भवाञ्श्रोतुमर्हति ॥८४॥
सुन्दरेशस्तु धर्मात्मा शुचिश्च भवतः सखा ।
पुनः पुनः प्रार्थयंश्च प्रोक्तवानिदमीप्सितम् ॥८५॥
संपादितं यद्द्रव्यं न्यायमार्गेण तन्मया ।
पात्रदानेन तद्देयं नान्यथा नाशमर्हति ॥८६॥

परीक्षते मयाङ्कि नु यदाऽगायद्भयान्वितः ।
तदाऽस्माकं दृष्टिपथं गतौ सद्यः समागतौ ॥११३॥
समोन्नतौ समाकारौ समरूपौ समप्रभौ ।
समाभरणशोभाढ्यौ समचेष्टागतौ तथा ॥११४॥
स्पृहणीयाकृती दीप्तौ दृश्यालंकारशालिनौ ।
रक्तोष्णीषधरौ वीरौ रक्तनेत्रान्तशालिनौ ॥११५॥
रक्तजिह्वाधरौ रक्तनलिनामपदान्वितौ ।
रक्तौ च भवतो दास्ये रक्तचन्दनरूपितौ ॥११६॥
धारयन्तौ कुण्डले च श्वेते तारा इव स्वतेजसा ।
धिक्कुर्वाणौ दीप्तिमन्तौ नीलमारकतच्छवी ॥११७॥
कण्ठे धरन्तौ मालाश्च नवरत्नकृताः शुभाः ।
कौशेयं परिधायाङ्गे हेमतन्तुविनिर्मितम् ॥११८॥
पीताम्बरे दधानौ च दृश्ये चोत्तरवाससी ।
निधायांसे च तूणीरं दधानौ चापसायकौ ॥११९॥
यज्ञोपवीतवच्चिह्नं धरन्तौ सेवकस्य च ।
विधाय करमेकं तु शिबिकायां त्वरान्वितौ ॥१२०॥
लोलयन्ताविपुं घोरमितरेण करेण च ।
स्रवत्क्षीरमुखेणापि पश्यन्तावसकृद्दिशः ॥१२१॥
नूपुरालंकृतौ पादौ शिरीषकुसुमोच्चयौ ।
संकोचाद्विक्षिपन्तौ च मन्दं मन्दं शिलासु च ॥१२२॥
हैमवर्णस्तयोरेको ह्यन्यो नीलाम्बुदद्युतिः ।
शुचिस्मितस्सदा नीलो हैमो रोषारुणाननः ।१२३।
उद्युक्तं बाणपाताय हैमक्ष्णा निवारयन् ।
लीलया च हसन्नीलः पृष्ठमन्वगमत्किल ॥१२४॥
पुनः पुनः कौतुकेन प्रेक्षमाणौ तवाननम् ।
तथा चास्मान्सुसंत्रस्तानागतौ क्व गताविह ॥१२५॥

उद्युक्तावपि तावस्मान्प्रहर्तुं हन्तुमेव वा ।
वाञ्छत्येव सदा द्रष्टुमस्माकं हतकं मनः ॥१२६॥
सुकृती तु भवान्नूनं येन प्राप्तौ दुरासदौ ।
सेवकौ चारुसर्वाङ्गौ दृष्टिमानसहारिणौ ॥१२७॥
श्रुत्वा तु वचनं तेषां कम्पमानशरीरकः ।
शिविकाया अवप्लुत्य संभ्रमेण ननाम तान् ॥१२८॥
न नूनं तस्करा यूयं महाभागवतोत्तमाः ।
यद्दृष्टौ राघवौ साक्षाद्भवद्भिर्नरपुंगवौ । १२९॥
चिराय प्रार्थ्यमानौ तौ क्षणमेव पुरा मम ।
दृष्टेर्भूत्वाऽथ विषयौ तिरोधानं गतौ नृपौ ॥१३०॥
क्षणं संदर्शनं पत्न्या लब्धं च यतमानया ।
त्रियामकालं द्रष्टुं तौ कैर्भाग्यं सुकृतैः कृतैः ॥१३१॥
स्पृहणीया भवन्तोऽद्य द्रष्टारो नरसिंहयोः ।
वन्दनाद्भवतामद्य कृतार्थोऽस्मि नरोत्तमाः १३२॥
इत्युक्त्वा च भृशं दीनः पश्चात्तापाभितापितः ।
विह्वलश्च गतानन्दो विललाप भृशं तदा ॥१३३॥
अहो मूढेन नो पृष्टास्ते तु दूरानुयायिनः ।
किमर्थं मां प्रपश्यन्तो दूरेणागच्छथेत्यपि ॥१३४॥
मया किल महान्तौ तौ घोरकान्तारवर्त्मनि ।
शिलाकण्टकविद्धाङ्गौ संयातौ वाहकैः समम् १३५॥
अङ्के कुसुमसंकीर्णे जानक्या यत्तु लालितम् ।
वेदनां कां पदं प्राप्तं द्रवद्बाहानुयायि तत् ॥२३६॥
त्रिलोकीसृष्टिकर्तारौ त्रैलोक्यस्याप्यधीश्वरौ ।
कथं चिह्नं स्म धरतः सेवकस्य नरेश्वरौ ॥१३७॥
अधिष्ठायाद्य शिविकां राजवन्मयि गच्छति ।
महात्मानौ कथं वीरौ पद्भ्यां यातौ नृपात्मजौ ॥१३८॥

परीक्षते भवान्किं नु यदाऽभायद्भ्यान्वितः ।
तदाऽस्माकं दृष्टिपथं गतौ सद्यः समागतौ ॥११३॥
समोन्नतौ समाकारौ समरूपौ समप्रभौ ।
समाभरणशोभाढ्यौ समचेष्टामती तथा ॥११४॥
स्पृहणीयाकृती दीप्तौ दृश्यालंकारशालिनौ ।
रक्तोष्णीषधरौ वीरौ रक्तनेत्रान्तशालिनौ ॥११५॥
रक्तजिह्वाधरौ रक्तनलिनाभपदान्वितौ ।
रक्तौ च भवतो दास्ये रक्तचन्दनरूपितौ ॥११६॥
धारयन्तौ कुण्डले च श्वेते तारा इव स्वतेजसा ।
धिक्कुर्वाणौ दीप्तिमन्तौ नीलमारकतच्छवी ॥११७॥
कण्ठे धरन्तौ मालाश्च नवरत्नकृताः शुभाः ।
कौशेयं परिधायाङ्गे हेमतन्तुविनिर्मितम् ॥११८॥
पीताम्बरे दधानौ च दृश्ये चोत्तरवाससी ।
निधायांसे च तूणीरं दधानौ चापसायकौ ॥११९॥
यज्ञोपवीतवच्चिह्नं धरन्तौ सेवकस्य च ।
विधाय करमेकं तु शिबिकायां त्वरान्वितौ ॥१२०॥
लोलयन्तावियुं घोरमितरेण करेण च ।
स्रवत्क्षीरमुखेणापि पश्यन्तावसकृद्दिशः ॥१२१॥
नूपुरालंकृतौ पादौ शिरीषकुसुमोच्चयौ ।
संकोचाद्विक्षिपन्तौ च मन्दं मन्दं शिलासु च ॥१२२॥
हैमवर्णस्तयोरेको ह्यन्यो नीलाम्बुदद्युतिः ।
शुचिस्मितस्सदा नीलो हैमो रोषारुणाननः । १२३।
उद्युक्तं बाणपाताय हैमपक्ष्णा निवारयन् ।
लीलया च हसन्नीलः पृष्ठमन्वगमत्किल ॥१२४॥
पुनः पुनः कौतुकेन प्रेक्षमाणौ तवाननम् ।
तथा चास्मान्सुसंत्रस्तानागतौ क्व गताविह ॥१२५॥

उद्युक्तावपि तावस्मान्प्रहर्तुं हन्तुमेव वा ।
वाञ्छत्येव सदा द्रष्टुमस्माकं हतकं मनः ॥१२६॥
सुकृती तु भवान्नूनं येन प्राप्तौ दुरासदौ ।
सेवकौ चारुसर्वाङ्गौ दृष्टिमानसहारिणौ ॥१२७॥
श्रुत्वा तु वचनं तेषां कम्पमानशरीरकः ।
शिबिकाया अवप्लुत्य संभ्रमेण ननाम तान् ॥१२८॥
न नूनं तस्करा यूयं महाभागवतोत्तमाः ।
यद्दृष्टौ राघवौ साक्षाद्भवद्भिर्नरपुंगवौ । १२९॥
चिराय प्रार्थ्यमानौ तौ क्षणमेव पुरा मम ।
दृष्टेर्भूत्वाऽथ विषयौ तिरोधानं गतौ नृपौ ॥१३०॥
क्षणं संदर्शनं पत्न्या लब्धं च यतमानया ।
त्रियामकालं द्रष्टुं तौ कैर्भाव्यं सुकृतैः कृतैः ॥१३१॥
स्पृहणीया भवन्तोऽद्य द्रष्टारो नरसिंहयोः ।
वन्दनाद्भवतामग्र कृतार्थोऽस्मि नरोत्तमाः १३२॥
इत्युक्त्वा च भृशं दीनः पश्चात्तापाभितापितः ।
विह्वलश्च गतानन्दो विललाप भृशं तदा ॥१३३॥
अहो मूढेन नो पृष्टास्ते तु दूरानुयायिनः ।
किमर्थं मां प्रपश्यन्तो दूरेणागच्छथेत्यपि ॥१३४॥
मया किल महान्तौ तौ घोरकान्तारवर्त्मनि ।
शिलाकण्टकविद्धाङ्गौ संयातौ वाहकैः समम् १३५॥
अङ्के कुसुमसंकीर्णे जानक्या यत्तु लालितम् ।
वेदनां कां पदं प्राप्तं द्रवद्बाहानुयायि तत् ॥१३६॥
त्रिलोकीसृष्टिकर्तारौ त्रैलोक्यस्याप्यधीश्वरौ ।
कथं चिह्नं स्म धरतः सेवकस्य नरेश्वरौ ॥१३७॥
अधिष्ठायाद्य शिबिकां राजवन्मयि गच्छति ।
महात्मानौ कथं वीरौ पद्भ्यां यातौ नृपात्मजौ ॥१३८॥

परीक्षते भवान्कि नु यदाऽगायद्भ्रयान्वितः ।
तदाऽस्माकं दृष्टिपथं गतौ सद्यः समागतौ ॥११३॥
समोन्नतौ समाकारौ समरूपौ समप्रभौ ।
समाभरणशोभाढ्यौ समचेष्टागती तथा ॥११४॥
स्पृहणीयाकृती दीप्तौ दृश्यालंकारशालिनौ ।
रक्तोष्णीषधरौ वीरौ रक्तनेत्रान्तशालिनौ ॥११५॥
रक्तजिह्वाधरौ रक्तनलिनाभपदान्वितौ ।
रक्तौ च भवतो दास्ये रक्तचन्दनरूपितौ ॥११६॥
धारयन्तौ कुण्डले च श्वेते ताराः स्वतेजसा ।
धिक्कुर्वाणौ दीप्तिमन्तौ नीलमारकतच्छवी ११७॥
कण्ठे धरन्तौ मालाश्च नवरत्नकृताः शुभाः ।
कौशेयं परिधायाङ्गे हेमतन्तुविनिर्मितम् ॥११८॥
पीताम्बरे दधानौ च दृश्ये चोत्तरवाससी ।
निधायांसे च तूणीरं दधानौ चापसायकौ ॥११९॥
यज्ञोपवीतवच्चिह्नं धरन्तौ सेवकस्य च ।
विधाय करमेकं तु शिबिकायां त्वरान्वितौ ॥१२०॥
लोलयन्तावियुं घोरमितरेण करेण च ।
स्रवत्क्षीरमुखेणापि पश्यन्तावसकृद्दिशः ॥१२१॥
नूपुरालंकृतौ पादौ शिरीषकुसुमोचयौ ।
संकोचाद्विक्षिपन्तौ च मन्दं मन्दं शिलासु च ॥१२२॥
हैमवर्णस्तयोरेको ह्यन्यो नीलाम्बुदद्युतिः ।
शुचिस्मितस्सदा नीलो हैमो रोषारुणाननः । १२३।
उद्युक्तं बाणपाताय हैममक्ष्णा निवारयन् ।
लीलया च हसन्नीलः पृष्ठमन्वगमत्किल ॥१२४॥
पुनः पुनः कौतुकेन प्रेक्षमाणौ तवाननम् ।
तथा चास्मान्सुसंत्रस्तानागतौ क्व गताविह ॥१२५॥

सर्वथा तु कृतं पापं मया विकृतबुद्धिना ।
कथं युक्तं मया प्राप्तुं नरवाहं प्रियादपि ॥१३९॥
कार्यमेतत्करिष्यन्तं मामचोदयतां ध्रुवम् ।
नैवारोक्ष्यामि शिबिकामधन्योऽहमितः परम् ॥१४०॥
इत्यादिभिश्च विविधैर्दीनदीनः प्रलप्य च ।
तस्करान्बहुमानेन समुदैक्षत बुद्धिमान ॥१४२॥
अदृष्टावेव तौ ज्ञात्वा त्यागराजेन तस्कराः ।
विस्मिताः पुनरूचुस्तं विनीता गतसाध्वसाः ॥१४२॥
न न्याय्यं शोचितुं नाथ यद्भवान्भक्तपुंगवः ।
अन्यथा तु कथं साध्यं प्राप्तुं तौ स्वस्य रक्षकौ ॥१४३॥
तयोर्दर्शनपुण्येन भवतश्च महागिरा ।
वयं पूता महाभाग साधुशीला अभूम हि ॥१४४॥
अस्मान्विधेयान्स्वीकृत्य चानुगृह्णातु पण्डितः ।
न त्याज्या भवता नाथ पादमूलमुपागताः ॥१४५॥
इत्युक्त्वा विह्वला दीनाश्चरणौ ते ववन्दिरे ।
पुनः पुनस्तमेवार्थं प्रार्थयामासुरन्ततः ॥१४६॥
वहन्तः शिबिकां नाथ करिष्यामश्च सत्क्रियाम् ।
साधयामश्च तान्सर्वान्यद्वक्ति भगवान्गुरुः ॥१४७॥
इत्थं प्रार्थयतस्तांस्तु कारुण्यादानृशंस्यतः ।
नाकाङ्क्षदनु नेतुं तु त्यागराजो महामतिः ॥१४८॥
ज्ञात्वा तस्य च सौशील्यं कारुण्यं साधुचित्तताम् ।
सर्वे प्रीतिं च संजग्मुस्तस्यानुगमने स्पृहाम् ॥१४९॥
न दुर्भरा भविष्यामो भवतः सत्यसंगर ।
न्यायवृत्त्यार्जितैः सौम्य वर्तयिष्यामहे वयम् ॥१५०॥
इति संप्रार्थितस्तैस्तु दृढचित्तैः शुभान्वितैः ।
दाक्षिण्यादनुमेने तानेनगन्तुं नरोत्तमः ॥१५१॥

समाहूय ततः पार्श्वे शिबिकायानवाहकान् ।
इदमूचे त्यागराजो निवर्तनकृतोद्यमः ॥१५२॥

भवद्भिः सुकृता यत्तैर्भर्तुराज्ञाविशेषतः ।
निवर्तध्वं शिबिकया येनाहं तोषमाप्नुयाम् ॥१५३॥

मम प्रियं सुन्दरेशं वदन्तु प्रियसेवकम् ।
अनामयं च कुशलं पृष्टवानहमित्यपि ॥१५४॥

भवद्भिरपि यद्दृष्टं कान्तारे गहने पुनः ।
निवेदितव्यं स्निग्धाय श्रुत्वा तोषमवाप्स्यति ॥१५५॥

अन्ततस्तस्य वक्तव्यं परिद्यूनं भृशं तु माम् ।
वाहारूढं नरव्याघ्रौ यत्पद्भ्यामनुजग्मतुः । १५६॥

तेनेदं निश्चितं विद्वन्नारोक्ष्यामि च वाहनम् ।
प्रतिगृह्णीध्व शिबिकां मा क्रोधं गच्छ तन्मयि ॥१५७॥

इत्युक्तवन्तं कृच्छ्रेण भर्तुस्तु प्रियकारिणः ।
संप्राप्यार्यापुर्यदा मोघं निवृत्ताः स्वस्य पत्तनम् ॥१५८॥

त्यागराजश्च धर्मात्मा स्तेनभक्तैर्नयागतैः ।
पूर्वानुयायिभिश्छात्रैः प्रतस्थे स्नानकर्मकृत् ॥१५९॥

ततः काञ्चीं समासाद्य दृष्ट्वा निखिलदेवताः ।
विनतासुतवाहेति वरदेशं समस्तवीत् ॥१६०॥

ततः क्षेत्राणि रम्याणि प्रेक्षमाणोऽतुलप्रभः ।
स्नात्वा पुण्येषु तीर्थेषु जगाम स्वपुरं मुदा ॥१६१॥

॥ इति श्रीमत्त्यागराजचरिते सुन्दरेशार्यविरचिते
'क्षेत्राटनम्' नाम चतुर्दशः सर्गः ॥

अथ पञ्चदशः सर्गः ।

पूजयन्राघवं देवं भ्रात्रा च प्रतिनन्दितः ।
विविधानि च गीतानि गायन्कालमयापयत् ।१।।
एकदा प्रेयसीं भार्यां वयोवृद्धां पतिव्रताम् ।
असह्यवेदनां दृष्ट्वा भृशं शोकाकुलोऽभवत् ।।२।।
उपविश्य च तत्पार्श्वे हस्तेनामृश्य मस्तकम् ।
विवर्णं वदनं दृष्ट्वा प्राह स्म विनयान्विताम् ।।३।।
मन्येऽहं राघवो देवस्त्वां निनीषति सादरम् ।
सांतानिकं महाभागः पतिदेवामपांसुलाम् ।४।
सीता तनूजा भर्तारमखिलाण्डपुरे परम् ।
अनुकूलं प्रियं प्राप्य मोदते पतिसंमता ।।५।।
परत्र गमने शोकं मा गमः पुण्यशालिनि ।
राघवः करुणाम्भोधिर्नूनं त्वाऽनुग्रहीष्यति ।।६।।
यदा वधूरिदं गेहमागता वरवर्णिनि ।
मनःशान्तिश्च तोषश्च तदाप्रभृति वर्धते ।।७।।
मातेव सोदरीवच्च दासीवच्च सखीव च ।
मासमाना यथाकालमकरोमों सुनिर्वृतम् ।।८।।
मया नाथेन चाप्तानि दुःखानि विविधानि च ।
बन्धुवर्गसमुत्थानि क्षमस्व करुणालये ।।९।।
इत्युक्तवन्तं भर्तारं शोकाकुलमनाथवत् ।
उवाच गद्गदैर्वाक्यैः कमला विमला तदा ।।१०।।
लोकान्तरस्य संप्राप्तिः सौमङ्गल्येन योषिताम् ।
स्पृहणीयाऽपि देयेऽहं चिन्तयन्ती भवत्क्षमम् ।।११।।
पुना तु पतिना दत्तान्भुक्त्वा भोगाननुत्तमान् ।
परित्यजेत्कथं साध्वी जराजर्जरितं पतिम् ।।१२।।

भवानद्य जराजीर्णः कम्पमानशिरोऽङ्गकः ।
करोति निखिलं कर्म परसाहाय्यमाश्रितः ॥१३॥
कथं त्यजेयं वा नाथ भवन्तं विह्वलाङ्गकम् ।
परिज्ञाय मनोवृत्तिं का वा परिचरिष्यति ॥१४॥
न विप्रियं कृतं नाथ मनसा वचसाऽपि वा ।
स्त्रीत्वाच्चपलचित्तत्वात्कृतं चेत्क्षमतां भवान् ॥१५॥
इत्युक्तवत्यां भार्यायां प्रियभार्यस्तदाऽनघः ।
रुरोदान्तर्भृशं विप्रो वर्षन्नश्रूण्यधृष्टधीः ॥१६॥
क्षणेनैव च तत्रत्याश्चुक्रुशुर्दीनचेतनाः ।
बुबोध च तदा सोऽपि गतप्राणां प्रियां सतीम् ॥१७॥
दृष्ट्वा तां प्रेयसीं दीनो गतासुं कलुषेन्द्रियः ।
उच्चैरुरोदाश्रुमुखो हृतसर्वस्ववत्तदा । १८॥
हृतां मृगवधूं दृष्ट्वा मृगवत्क्रन्दति स्म सः ।
भोगीव चेष्टते भूमौ कृपाणेन द्विधाकृतः ॥१९॥
चिरेण बन्धुवर्गैश्च मित्रैः पौरैश्च नैगमैः ।
स्मारितो जीवतत्त्वानि करोति स्नानतर्पक्रियाम् ॥२०॥
परिज्ञाततत्त्वोऽपि जानानो नश्वरं जगत् ।
भार्यागुणसमाकृष्टो विव्यथे स मुहुर्मुहुः ॥२१॥
इत्थं गच्छति काले स पश्यन्दीर्घमरण्यमात्मनि ।
मां नेष्यते कदा राम इति चिन्तापरोऽभवत् ॥२२॥
माध्यंदिनानि कर्माणि कर्तुं तां पुण्यनिम्नगाम् ।
कदाचित्प्रययौ श्वेतमूर्धजः कम्पिताङ्गुलिः ॥२३॥
आगमश्रमरिक्तोयं निषसाद शिलातले ।
निधिप्य कलशं पार्श्वे निद्रयाभृत च विह्वलः ॥२४॥
वत्सेत्याह्वानशब्दं तु श्रुत्वा कर्णसुखायनम् ।
चकम्पे कलशोऽप्यस्मात्कौतुकाक्रान्तमानसः ॥२५॥

व्याप्नुवन्नपि सर्वाणि भुवनानि स्वमूर्तिभिः ।
आगमोक्तविमानाघोलिङ्गाकृतिरहं स्थितः ॥५२॥
मत्पूजनात्तु भक्तानां यच्छ्रेष्ठ्यं युक्तमेव तत् ।
कथं तस्तु स्तुतः श्रेष्ठ इतीदं विस्मयावहम् ॥५३॥
भक्तत्रिके वरं लिङ्गमेकेनापि स्तुतं विदुः ।
स्तुतस्त्वया च भक्तेन चतुर्भिरहमीडितः ॥५४॥
प्रीतोऽस्मि कीर्तनस्तेऽद्य त्यागराज महामते ।
भक्तिमान्स्थापितो लोकस्तारितो भवसागरात् ॥५५॥
कलौ युगे पवित्राणि गीतानि तव सुव्रत ।
भागीरथीजलानीव प्लावयिष्यन्ति भूतलम् ॥५६॥
आचन्द्रार्कं भविष्यन्ति तर्पकाणि मनीषिणाम् ।
गीतानि चित्तपापौघक्षालकानि तपोधन ॥५७॥
गीतानि ये च गायन्ति ये च शृण्वन्ति भक्तितः ।
ये ते समाधिं द्रक्ष्यन्ति ते लप्स्यन्ते मनोरथान् ॥५८॥
पुत्रकामास्तु पुत्रांश्च धनकामा धनं तथा ।
आयुष्कामास्तथाऽयुश्च दीर्घं प्राप्स्यन्ति मानवाः ॥५९॥
एतदाकर्ण्य वचनं मन प्रह्लादकं परम् ।
त्यागराजो विनीतात्मा जगादेदं वचो मुदा ॥६०॥
शंभुः क्षिप्रप्रसादीति वचनं सत्यमेव तत् ।
यद्भवान्परितुष्टात्मा वरदोऽस्यल्पपूजया ॥६१॥
प्रभुणानुगृहीतोऽस्मि प्रसन्नेन दयाब्धिना ।
यत्काङ्क्षितं तु तत्सिद्धं भवद्वचनगौरवात् ॥६२॥
एवं ब्रुवति ते सर्वे क्षणादन्तर्हिता ययुः ।
संपरिज्ञातवेद्यः स माध्याह्निकमथाकरोत् ॥६४॥
चिन्तयन्वचनं तेषां विस्मितश्च गतक्रमः ।
हस्तौ संचालयन्वेगाद्गेहं पुनरुपागमत् ॥६५॥

व्याप्नुवन्नपि सर्वाणि भुवनानि स्वमूर्तिभिः ।
आगमोक्तविमानाधोलिङ्गाकृतिरहं स्थितः ॥५२॥
मत्पूजनात्तु भक्तानां यच्छ्रेष्ठ्यं युक्तमेव तत् ।
कथं तैस्तु स्तुतः श्रेष्ठ इतीदं विस्मयावहम् ॥५३॥
भक्तत्रिके वरं लिङ्गमेकेनापि स्तुतं विदुः ।
स्तुतस्त्वया च भक्तेन चतुर्भिरहमीडितः ॥५४॥
प्रीतोऽस्मि कीर्तनैस्तेऽद्य त्यागराज महामते ।
भक्तिमान्स्थापितो लोकस्तारितो भवसागरात् ॥५५॥
कलौ युगे पवित्राणि गीतानि तव सुव्रत ।
भागीरथीजलानीव प्लावयिष्यन्ति भूतलम् ॥५६॥
आचन्द्रार्कं भविष्यन्ति तर्पकाणि मनीषिणाम् ।
गीतानि चित्तपापौघक्षालकानि तपोधन ॥५७॥
गीतानि ये च गायन्ति ये च शृण्वन्ति भक्तितः ।
ये ते समाधिं द्रक्ष्यन्ति ते लप्स्यन्ते मनोरथान् ॥५८॥
पुत्रकामास्तु पुत्रांश्च धनकामा धनं तथा ।
आयुष्कामास्तथाऽयुश्च दीर्घं प्राप्स्यन्ति मानवाः ॥५९॥
एतदाकर्ण्य वचनं मन प्रह्लादकं परम् ।
त्यागराजो विनीतात्मा जगादेदं वचो मुदा ॥६०॥
शंभुः क्षिप्रप्रसादीति वचनं सत्यमेव तत् ।
यद्भवान्परितुष्टात्मा वरदोऽस्यल्पपूजया ॥६१॥
प्रभुणानुगृहीतोऽस्मि प्रसन्नेन दयाब्धिना ।
यत्काङ्क्षितं तु तत्सिद्धं भवद्वचनगौरवात् ॥६२॥
एवं ब्रुवति ते सर्वे क्षणादन्तर्हिता ययुः ।
संपरिज्ञातवेद्यः स माध्याह्निकमथाकरोत् ॥६४॥
चिन्तयन्वचनं तेषां विस्मितश्च गतभ्रमः ।
हस्तौ संचालयन्वेगाद्गेहं पुनरुपागमत् ॥६५॥

आसाद्य राघवं देवं प्रणम्य च सहस्रशः
स्तुत्वा संपूज्य विधिवत्प्रतस्थे स गृहाद्बहिः ॥६६॥
त्वचं भोगीव स श्वेतं तत्याज वसनं शुभम् ।
गार्हस्थ्येन सहैवाशु स्रोपवीतं जहौ मुदा ॥६७॥
कापायवसनं पूतं जग्राह जनसंनिधौ ।
अभयं सर्वभूतेभ्यो मत्त इत्यप्यघोषयत् ॥६८॥
उपदिष्टं महावाक्यं गुरुणा वरयोगिणा ।
सर्वज्ञस्यापि मर्यादामनुल्लङ्घ्य विधेस्तदा ॥६९॥
एषणात्रयहीनश्च प्रशान्तात्मा जितेन्द्रियः ।
संन्यासाश्रममासाद्य बभौ व्यास इवापरः ॥७०॥
ववन्दिरेऽखिलास्तं तु पौरजानपदा जनाः ।
श्रुत्वैतत्तु समायाता भक्त्या च विनयेन च ॥७१॥
ब्रह्मसूत्राणि गीतां च तथा श्रुतिशिरांसि च ।
शांकराणि च भाष्याणि पठन्कालं समत्यगात् ॥७२॥
नैमिशारण्यवद्भाति कावेरीतीरमण्डपः
संन्यासिभिश्च बहुभिर्मुनितुल्यैर्जनैर्वृतः ॥७३॥
उदाहरन्तः प्रणवं तारकं नाम ते शुभाः ।
पावयन्तः स्ववासेन भुवं पुण्यतमास्तदा ॥७४॥
त्यागराजः प्रशान्तात्मा तेषां शेखरवत्स्थितः ।
पश्यन्योगेन निखिलं ब्रह्मरूपमनामयम् ॥७५॥
दिवसाः केचनेत्येवं क्षणवज्जग्मुरञ्जसा ।
प्रकटीकुर्वतामत्र ब्रह्मलोकमनुत्तमम् ॥७६॥
कदाचित्संगवे काले त्यागराजं तपोधनम् ।
उपासाञ्चक्रिरे शिष्या मुनयः शंकरं यथा ॥७७॥
दूरादप्यागताः शान्ताः पण्डिता वणिजः शुभाः ।
परिचार्याभ्यवर्तन्त पश्यन्तश्च तमेव हि ॥७८॥

तुर्विंशे च दिवसे वासरे शशिपुत्रके ।
पञ्चम्यामसितेपक्षे प्रायात्सांतानिकं विभुः ॥१०४॥

स्वाराधकं न मनुते स्वालयागामिनं न च ।
स्वनामोच्चारकं नैव भक्तप्राणो रघूत्तमः ॥१०५॥

परितुष्यति पूतात्मा भक्तानां पूजयैव हि ।
भक्तदेहो रघूत्तंसश्चरत्यत्र महीतले ॥१०६॥

प्राप्य पञ्चनदं पूतं स्नात्वा पुण्यसरिज्जले ।
सेव्यः समाधिर्महतो यदीच्छेज्जन्मनः फलम् ॥१०७॥

समाधिरूपस्त्यागेशो रामसालोक्यभागिह ।
स्मरतां गृणतां चैव कुरुते सर्वमङ्गलम् ॥१०८॥

ग्रथितं सुन्दरेशेन विद्याबालेन केवलम् ।
श्रुत्वेवौरसबालस्य वचस्तुष्यन्तु पण्डिताः ॥१०९॥

मङ्गलायतनं विष्णुर्मङ्गलायतनं शिवः ।
तयोः संमेलनाद्रामः कुर्यान्नः सर्वमङ्गलम् ॥११०॥

॥ इति श्रीत्यागराजचरिते सुन्दरेशार्यविरचिते
सांतानिकगमनं नाम पञ्चदशः सर्गः ॥

समाप्तोऽयं ग्रन्थः ।

श्रीरामो जानकीजानिः शरणम् ॥

शोधनपत्रम् ।

पुटम्	पङ्क्तिः	शुद्धपाठः
viii	9	paeon
x	6	भवद्म्बु०
xii	10	०भूषणो नारदादि०
xiii	11	०पद एव
३	११	शीतजलेन
४	२०	०स्ततस्ततः
१५	२५	बहूः समाः
२०	१२	प्रतीचीं दिशमास्थाय
२२	६	संप्रेक्ष्य
,,	२३	समागमात्
२४	१४	तटोद्यानै०
,,	२५	भृशविस्मितः
३२	११	०प्राप्तकृच्छ्रैः
३३	१९	चेष्टितानि
४०	७	०वशी नित्यं यथोक्तं
४१	२१	सः
४९	२१	स्वकार्यकरणे
,,	२६	याचामो गर्दमं कल्पका०
५४	३	मेलांश्च नूतनान्
,,	२१	जनमङ्गोत्थो
५८	२५	संचिन्तय०
५९	१६	०पुंगव
६३	१०	तथा नाहं
६७	२२	०चित्तशान्ति०
७०	७	पापनिश्चयः
,,	२६	किंचित्स
७४	१७	किं वा

८३	२५	भृशमप्रियम
,,	२५	अलंकृत्य
८४	६	प्राप्तः
८९	१४	गदन्तश्च
९६	१०	त्वमवमन्तासि
९८	१८	उच्छ्वच
१०१	१६	कैर्न वा
१०३	८	०मालम्ब्य
१०४	२०	संप्रार्थितश्च
१०७	१७	०दुःसहवेदनः
,,	१८	स पर्यङ्के
१०८	१३	नायं
११४	२	भुञ्जते
११७	२१	०बुध्यते
१२२	१	०स्तोयदा
१२३	२१	०स्तत्कार्य०
,,	२६	०दानेन
१२५	१२	तुष्यत पुत्रिणः
,,	१९	०मानतः
१२६	२२	०सितः सदा
१२९	५	मम प्रियम्
१३३	५	प्राप्य चाश्रमम्
१३४	११	आचन्द्रार्कं
,,	१४	लप्स्यन्ते
,,	१७	मनःप्रह्ला०
१३५	११	पौर०
१३८	२	०मसिते पक्षे